GOVERNMENT OF INDIA

ARCHÆOLOGICAL SURVEY OF INDIA

CENTRAL
ARCHÆOLOGICAL
LIBRARY

ACCESSION NO 9066.

CALL No. Sa 2HS/AbL/Kau.

D.G.A. 79

Vol 5

Vol. 5


OFFICE OF THE DIRECTOR GENERAL OF ARCHAEOLOGY
Library Regr No
INDIA.

THE KASHMIR SERIES

OF

TEXTS AND STUDIES.



9066

Kashmir Series of Texts and Studies

No. XXXV

THE

TANTRĀLOKA

OF

ABHINAVA-GUPTA

With Commentary

BY

RĀJĀNAKA JAYARATHA.

Edited with Notes

BY

PANDIT MADHUSUDAN KAUL, SHASTRI, M.A., M.O.L.,

Superintendent, Research Department,

JAMMU AND KASHMIR STATE,

SRINAGAR.

Published under the authority of the Government of

His Highness Lieut.-General Mahārāja

SIR PRATAP SINGH SAHIB BAHADUR,

G.C.S.I., G.C.I.E., G.B.E., LL.D.,

Maharaja of Jammu and Kashmir State.

VOLUME V

CENTRAL ARCHAEOLOGICAL LIBRARY New Delhi

Vol. 5

Sa2.Hs Abh/Kau

RESEARCH DEPARTMENT JAMMU & KASHMIR STATE

Allahabad:

PRINTED BY ATHARVA KRISHNA BOSE, AT THE INDIAN PRESS, Ltd.,

1922.

OFFICE OF THE DIRECTOR GENERAL OF ARCHAEOLOGY

Library Regd. No. 159/26

D2825 - vol 35

INDIA

CENTRAL ARCHAEOLOGICAL
LIBRARY NEW DELHI.
Acc. No. 9066
Date. 24-7-57
Call No. Sa2HS
Ahl/Kau

श्रीसोमानन्दनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पटिमनि घटनामीश्वराद्वैतवादः
कश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन्सर्वदेशान्
देशेऽन्यस्मिन्नदृष्टो घुसृणविसरवत्सर्ववन्द्यत्वमाप ॥ १ ॥

तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तःसमुल्लवदायिनम् ॥ २ ॥

ॐ

काश्मीर-संस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ३५

श्रीतन्त्रालोकः ।

N.IV
H.17 प

श्रीमन्महामाहेश्वराचार्यवर्य-
श्रीमदभिनवगुप्ताचार्यविरचितः ।
श्रीमन्महामाहेश्वराचार्य-
श्रीजयरथकृतविवेकाभिख्यटीकोपेतः ।
श्रीभारतधर्ममार्तण्ड-कश्मीरमहाराज-
श्रीप्रतापसिंहवरप्रतिष्ठापिते
प्रज्ञविद्याप्रकाश (रिसर्च) कार्यालये
तदध्यक्ष-
पंडितमधुसूदनकौलशास्त्रिणा
उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन
संगृह्य, संशोधन-पर्यायाङ्कन-विवरणादिसंस्करणोत्तरं
पाश्चात्यविद्वत्परिषत्संमताधुनिकसुगमशुद्धरीत्युपन्यासादिसंस्कारैः परिष्कृत्य
श्रीप्रयागपत्तने
इण्डियन प्रेस लिमिटेड,-नाम्नि मुद्रणालये
मुद्रापयित्वा प्राकाश्यमुपनीतः ।
(पञ्चमो भागः)



संवत् १९७८ खैस्ताब्दः १९२२
काश्मीर-श्रीनगर ।
(अस्य ग्रन्थस्य सर्वे प्रकाशन-मुद्रापणाद्यधिकाराः प्रोक्त-
महाराजवर्यैः स्वायत्तीकृताः सन्ति ।)

(All Rights Reserved.)

Printed by Apurva Krishna Bose, The Indian Press, Ltd., Allahabad.
Published by the Research Department, JAMMU & KASHMIR STATE, Srinagar.

OFFICE OF THE DIRECTOR GENERAL OF ARCHAEOLOGY
Library Reg. No
INDIA.

अथ

श्रीतन्त्रालोके

आचार्याभिनवगुप्तपादविरचिते

अष्टममाह्निकं

जयरथकृतविवेकाख्यव्याख्योपेतम्।

जयकीर्तिरयं जयताज्जगदम्भोजं विभक्तभुवनदलम्।
रविरिव विकासयति यश्चिदेकनालाश्रयत्वेन ॥

इदानीं द्वितीयार्धेन देशाध्वनः स्वरूपं संगिरितु-
मुपक्रमते

देशाध्वनोऽप्यथ समासविकासयोगा-
त्संगीयते विधिरयं शिवशास्त्रदृष्टः ॥ १ ॥

नन्ववान्तराणां प्रमेयाणामनन्तानां प्रतिपाद्यत्वेऽपि कथमिह अस्यैव निर्देशः,—इत्याशङ्क्याह

विचारितोऽयं कालाध्वा
क्रियाशक्तिमयः प्रभोः ।
मूर्तिर्वैचित्र्यजस्तज्जो
देशाध्वाथ निरूप्यते ॥ २ ॥

'अथ' इत्यानन्तर्ये । तत्पदमन्त्रवर्णात्मना त्रिप्रकारः कालाध्वा विचारितः,—इति तदानन्तर्येण युक्तं देशाध्वनोऽप्यत्र निरूपणम्,—इत्यत एव क्रमेण भुवनतत्त्वकलाप्रतिपादकं वक्ष्यमाणमाह्निकचतुष्टयम् । 'तज्ज' इति तस्मात् प्रभोरेव जातः स एव तथा तथा बहिः स्फुरित इत्यर्थः । यदाहुः

'आश्यानं चिद्रसस्यौघं साकारत्वमुपागतम् ।
जगद्रूपतया वन्दे प्रत्यक्षं भैरवं वपुः ॥'

इति ॥ २ ॥

ननु यद्येवं षड्विधोऽपि अयमध्वा किं चिदेकरूपात् तस्मादतिरिक्तो नवा ? इत्याशङ्क्याह

अध्वा समस्त एवायं
चिन्मात्रे संप्रतिष्ठितः ।
यत्तत्र नहि विश्रान्तं
तन्नभःकुसुमायते ॥ ३ ॥

'संप्रतिष्ठित' इति तदनतिरिक्त इत्यर्थः । अत्र व्यतिरेकमुखेन द्वितीयार्धं[1] हेतुः । 'नभःकुसुमायत' इति न किंचित् स्यादिति यावत् ॥ ३ ॥

ननु यदि नाम संविदनतिरिक्त एवायमध्वा, तत् कथं सर्वत्र बहिर्भेदेन भायात् ? इत्याशङ्क्याह

संविद्द्वारेण तत्सृष्टे
शून्ये धियि मरुत्सु च ।
नाडीचक्रानुचक्रेषु
बहिर्देहेऽध्वसंस्थितिः ॥ ४ ॥

संविदेव हि स्वस्वातन्त्र्यात् स्वं स्वरूपं गोपयित्वा स्वसमुल्लासिते[2] शून्यप्राणबुद्धिदेहात्मनि प्रमातरि, बहिः प्रमेये च अनतिरिक्तत्वेऽप्यतिरिक्त-

---

१ क० ख० ग० द्वितीयार्धे इति पाठः ।
२ क० मु० स्वसमुल्लसिते इति पाठः ।

मिव षड्विधमपि अध्वानमवभासयति,—इत्युक्तं 'संविद्द्वारेण तत्सृष्टे शून्यादावध्वसंस्थितिः' इति । 'नाडीचक्रानुचक्रेषु' इति मरुत्सामानाधिकरण्येन योज्यम् ॥ ४ ॥

ननु यद्येवं तदस्तु को दोषस्तन्निरूपणेन पुनः कोऽर्थः ? इत्याशङ्क्याह

तत्राध्वैवं निरूप्योऽयं
यतस्तत्प्रक्रियाक्रमम् ।
अनुसंदधदेव द्राग्
योगी भैरवतां व्रजेत् ॥५॥

'प्रक्रियाक्रमम्' इति कालाग्न्यादेरनाश्रितपर्यन्तं तथातथानुपूर्व्येण अवस्थानम् । 'अनुसंदधत्' इति 'सर्वमहम्' इति विमर्शनेन स्वात्मविश्रान्तिमयतामापादयन् योगी शीघ्रमेव परसंविदैकात्म्यमियात् ॥५॥

नचैतदस्मदुपज्ञमेव, इत्याह

दिदृक्षयैव सर्वार्थान्
यदा व्याप्यावतिष्ठते ।

तदा किं बहुनोक्तेन
इत्युक्तं स्पन्दशासने ॥ ६ ॥

यथा दिदृक्षावसरे स्वसाक्षितयैव[1] अर्थस्तथा स्फुरति, तथैव योगी धरादिशिवान्ततत्त्वान्तर्भाविनः सर्वानर्थान् यदा 'सर्वमहम्' इत्यनुसंधानपूर्वं स्वात्मनि क्रोडीकृत्यावतिष्ठते तदा निःशेषवेद्यविगलनेन परभैरवदशावेशचमत्काररूपं यत् फलं, तत् स्वसंविदेवानुभविष्यति,—इत्यत्र बहुनोक्तेन किं ? न कश्चिदर्थ इत्यर्थः। 'स्वयमेवावभोत्स्यते' इति चात्र तुर्यः पादः ॥६॥

ननु अध्वप्रक्रियाज्ञानमात्रादेव किमेवं भवेत् ? इत्याशङ्क्याह

ज्ञात्वा समस्तमध्वानं
तदीशेषु विलापयेत्।
तान् देहप्राणधीचक्रे
पूर्ववद् गालयेत्क्रमात् ॥ ७ ॥

---

१ क० पु० अस्य साक्षितयेति पाठः।

तत्समस्तं स्वसंवित्तौ
सा संविद्धारितात्मिका ।
उपास्यमाना संसार-
सागरप्रलयानलः ॥ ८ ॥

'तदीशेषु' इति ब्रह्मादिषु । 'तान्' तदीशानपि देहबुद्धिप्राणशून्यात्मनि कल्पिते रूपे 'पूर्ववत्' कालाध्वनिरूपितनीत्या 'गालयेत्' देहादारभ्य यथोत्तरं विश्रमयेत्, यावत् 'क्रमात्' प्राप्तावसरं 'तत् समस्तं' देहादि स्वसंवित्सात्कुर्यात्, येनास्य सा संविदशेषवेद्यग्रासीकारेण पूर्णा सती 'उपास्यमाना' भूयोभूयस्तथा परिशील्यमाना द्वयाद्यवभासतिरस्कारेण परमाद्वयमयतया प्रस्फुरेदित्यर्थः ॥८॥

ननु

'अथ कालाग्निरुद्राधः कटाहः संव्यवस्थितः ।
कोटियोजनबाहुल्यस्तस्योर्ध्वे भुवनानि तु ॥
नवनवतिकोट्यश्चाप्यण्डानां तु सहस्रकम् ।
कोटीनां सप्ततिं लक्षाण्ययुतानां सहस्रकम् ।
अर्बुधान्यथ वृन्दानि खर्वाणि च तथैव च ।
पद्मानि चाप्यसंख्यानीत्येवमादीन्यनेकशः ॥'

(स्व० १०।४)

इत्याद्युक्त्या भुवनानामानन्त्ये तदधीशानामपि

आनन्त्यम्, – इति तेषां प्रत्येकमेवमनुसंधाने जन्मसहस्रैरपि न कश्चित् पारं यायात् – इत्येतदशक्यानुष्ठानम्, इत्याशङ्क्याह

श्रीमद्वीरोत्तरे चैता-
नध्वेशान् गुरुरब्रवीत् ।

'गुरुः' इत्याद्यः श्रीकण्ठनाथः । अब्रवीदिति नैयत्येन ॥

तत्रत्यमेव ग्रन्थं पठति

ब्रह्मानन्तात्प्रधानान्तं
विष्णुः पुंसः कलान्तगम् ॥९॥
रुद्रो ग्रन्थौ च मायाया-
मीशः सादाख्यगोचरे ।
अनाश्रितः शिवस्तस्मा-
द्व्याप्ता तद्व्यापकः परः ॥१०॥

ब्रह्माण्डकर्परिकाधोवर्तिनोऽनन्तात्प्रभृति प्रधानान्तं ब्रह्मा व्याप्ता, – इति संबन्धः । एवमुत्तरत्रापि योजनीयम् । ग्रन्थौ चेति, चशब्देन तद्गतरूपायामपि मायायां रुद्रो व्याप्तेत्यर्थः । 'ईश' इतीश्वरः ।

'सादाख्यगोचर' इति शुद्धविद्यादितत्त्वत्रयात्मनि । 'तस्मात्' इति सादाख्यगोचरात् अर्थादूर्ध्वं शक्तितत्त्वस्थाने तु 'तद्व्यापक' इति तेषां ब्रह्माद्यनाश्रितान्तानां पञ्चानामपि कारणानां व्यापकः परः शिव इत्यर्थः । अतश्च नियतत्वात्तदीशानां प्रत्युतैतत् सुखोपायम्, इत्यतः परमन्यज्ज्ञानं नास्तीत्युक्तप्रायम् ॥१०॥

यदभिप्रायेणैव श्रीस्वच्छन्दशास्त्रमप्येवमाह

एवं शिवत्वमापन्न-
मिति मत्वा न्यरूप्यत ।
न प्रक्रियापरं ज्ञान-
मिति स्वच्छन्दशासने ॥११॥

यदुक्तं तत्र

'नास्ति दीक्षासमो मोक्षो न विद्या मातृकापरा ।
न प्रक्रियापरं ज्ञानं नास्ति योगस्त्वलक्षकः ॥' (११।१९८)

इति ॥ ११ ॥

नत्वेवमध्वनोऽनुसंधाने कथं बोधस्य साक्षात्कारो भवेत् ? इत्याशङ्क्याह

त्रिशिरःशासने बोधो
मूलमध्याग्रकल्पितः ।
षट्त्रिंशत्तत्त्वसंरम्भः
स्मृतिर्भेदविकल्पना ॥१२॥
अव्याहतविभागोऽस्मि-
भावो मूलं तु बोधगम् ।
समस्ततत्त्वभावोऽयं
स्वात्मन्येवाविभागकः ॥१३॥
बोधमध्यं भवेत्किंचि-
दाधाराधेयलक्षणम् ।
तत्त्वभेदविभागेन
स्वभावस्थितिलक्षणम् ॥१४॥
बोधाग्रं तत्तु चिद्बोधं
निस्तरङ्गं बृहत्सुखम् ।

श्रीत्रिशिरोभैरवे हि बोध एव मूलमध्याग्रकल्पितः सन् षट्त्रिंशत्तत्त्वसंरम्भस्तथोल्लसितः,—इत्यर्थादुक्तं, येन तदनुसंधानाद्बोधसाक्षात्कारः स्यात् । तदेवार्थ-द्वारेण पठति 'स्मृतिः' इत्यादि । इह खलु यो नाम 'अस्मिभावः'

'बुद्ध्यस्मितासुसंरूढो गुणान्पूर्वं विभेद्य च।
विचारयेद्भूतधर्मान् पृथिव्यादिक्रमेण तु॥'

इत्यादितत्रत्योक्त्या अनात्मरूपबुद्ध्यादिनिष्ठाहंभावः संकुचितः प्रमाता स स्मृतिर्भेदविकल्पना च तत्स्वभाव इत्यर्थः। स हि 'इदमहं जानामि' इति भेदेनैव विश्वं विकल्पयेत्। न केवलं सद्रूपमेवार्थमेवं विकल्पयेत्, यावद्गन्धपित्रादिविषये स्मृतिविकल्पादावसदपि,—इत्युक्तं 'स्मृतिः' इति। अत एवेदन्तायाः प्राधान्यादव्याहतविभागः सुस्फुटभेदात्मक इत्यर्थः। तच्च बोधगं मूलं बोधस्य परां कोटिं प्राप्तं स्थौल्यमुच्यते, इत्यर्थः। तथा अयं भेदेनोल्लसितः 'समस्ततत्त्वभावो' भूतभावादिः 'इदमहम्' इति न्यायेन बोधरूपे 'स्वात्मन्येव' विश्रान्तोऽत एव 'अविभागको' विगलितभेदो बोधमध्यं भवेत् नतु बोधाग्रं; यतस्तदहन्तेदन्तयोः सामानाधिकरण्यात् आमुखे भेदप्रतिभासात् 'किंचिदाधाराधेयलक्षणं' किंचित्पदेन बोधमूलवन्न भेदप्रधानं नापि बोधाग्रवदभेदप्रधानम्,—इति प्रकाशितम्; अत एव अन्तरालवर्तित्वात् 'मध्यम्' इत्युक्तम्। तथा तत्त्वानां

भेदस्य 'विभागेन' मूलत एव शातनेन यत् 'अहम्' इत्यामर्शरूपे स्वात्मन्येवावस्थानं तत् 'बोधाग्रं' सकलभावाविभागस्वभावः, परां काष्ठां प्राप्तो बोध इत्यर्थः । अत एव तच्चिद्बोधरूपं नतु अणुबोधरूपं, निस्तरङ्गं नतु क्षुब्धं, 'बृहत् सुखं' जगदानन्दरूपं नतु अनानन्दादिरूपमित्यर्थः । यदुक्तं तत्र

'षट्त्रिंशत्तत्त्वविषये यद्भेदेन विकल्पना ।
स्मृतिः सुस्फुटभेदात्मा मितमाता तदुच्यते ॥
प्रान्तावस्थितिविज्ञानं स्थौल्यं बोधस्य भैरवि ।
समस्ततत्त्वभावोऽयं नावलोक्यो विभागशः ॥
स्वात्मनि संस्थितं विन्द्याद्बोधमध्यं तदुच्यते ।
आधाराधेयभावोऽयमुभयावस्थितस्य च ॥
तत्त्वभेदविभागेन स्वभावस्थितिलक्षणम् ।
तत्पदस्थो न विन्देत चिद्व्योमान्तरवर्तिनः ॥
तदतीतं विजानीयान्मध्यमं प्राह्यवस्थितम् ।
प्रान्तावस्थितिविज्ञेयं बोधाग्रं तदिहोच्यते ॥
शक्तिज्ञानं विजानीयात्परमानन्दलक्षणम् ।
नित्योदितं सुखं विद्धि निस्तरङ्गं तु कथ्यते ॥
बृहत्सुखेति कथितं चिदबोधं तु विगद्यते ।'

इति ॥ १४ ॥

एवं षड्विधेऽप्यध्वनि संविदैकात्म्यं परिशीलयतो योगिनो भैरवीभाव एव भवेत्, इत्याह

संविदेकात्मतानीत-
भूतभावपुरादिकः ॥ १५ ॥
अव्यवच्छिन्नसंवित्ति-
भैरवः परमेश्वरः ।

न केवलमेतदत्रैवोक्तं यावदन्यत्रापि, इत्याह

श्रीदेव्यायामले चोक्तं
षट्त्रिंशत्तत्त्वसुन्दरम् ॥ १६ ॥
अध्वानं षड्विधं ध्याय-
न्सद्यः शिवमयो भवेत् ।

'ध्यायन्' इति स्वसंविदभेदेन परामृशन्नित्यर्थः । यदुक्तं तत्र

'अध्वानं निखिलं देवि तत्त्वषट्त्रिंशदुज्ज्वलम् ।
चिन्तयन् सद्य आप्नोति पदं शाश्वतमुत्तमम् ॥'

इति ॥ १६ ॥

ननु यदि नाम बोधात्मैव षड्विधोऽपि अयमध्वा, तद्बोधस्य देशाद्यनवच्छिन्नत्वात् कथमस्योर्ध्वादिव्यवस्था स्यात् ? इत्याशङ्क्याह

यद्यप्यमुष्य नाथस्य
संवित्त्यनतिरेकिणः ॥ १७ ॥
पूर्णस्योर्ध्वादिमध्यान्त-
व्यवस्था नास्ति वास्तवी ।
तथापि प्रतिपत्तॄणां
प्रतिपादयितुस्तथा ॥ १८ ॥
स्वस्वरूपानुसारेण
मध्यादित्वादिकल्पनाः ।

प्रतिपत्रादयो हि संकुचितरूपत्वात् गृहीतदेहाद्यभिमानाः,–इति तदनुसारेणोर्ध्वादिव्यवस्थां कल्पयेयुः, न तु वस्तुतः सा संभवेत्; अत एवोर्ध्वमप्यन्यापेक्षयाधः स्यात् । तस्मात् प्रतिपत्राद्यपेक्षयैवेयं व्यवस्था – यत् पृथिवीतत्त्वं सर्वतत्त्वान्तर्वर्ति तत्त्वान्तराणि च तद्बहिरिति ॥ १८ ॥

तदाह

ततः प्रमातृसंकल्प-
नियमात् पार्थिवं विदुः ॥१९॥

तत्त्वं सर्वान्तरालस्थं
यत्सर्वावरणैर्वृतम् ।

पृथिवीतत्त्वमेव च स्थौल्यस्य परा कोटिः, इति तदुपक्रमं सुखेनावबोधात् तत्रैव प्रथमं भुवनस्थिति-रुच्यते, इत्याह

तदत्र पार्थिवे तत्त्वे
कथ्यते भुवनस्थितिः ॥ २० ॥

तामेवाह

नेता कटाहरुद्राणा-
मनन्तः कामसेविनाम् ।
पोतारूढो जलस्यान्त-
र्मद्यपानविघूर्णितः ॥ २१ ॥
स देवं भैरवं ध्यायन्
नागैश्च परिवारितः ॥

जलस्यान्तरित्यर्थात् तदुपरि संस्थितः । यदुक्तम्

'संस्थितः सोऽम्भसां मूर्ध्नि शक्त्याधारस्तु हूहुकः ।'

इति । अत एवचास्य असत्त्वसंनिकर्षेण कटा-हस्याधो बहिर्देशेऽवस्थानं न त्वन्तर्;—इति सिद्धम्। यदुक्तं श्रीनन्दिशाखायाम्

' कोटियोजनतः स्थौल्यं ब्रह्माण्डस्य कटाहके ।
तथैवोर्ध्वं स्थितं ज्ञेयमन्तरं कथ्यते प्रिये ॥
अष्टानवतिकोटीभिर्ब्रह्माण्डं समुदाहृतम् ।'

इत्युपक्रम्य

' कटाहाधःस्थितं देवि हूहुकं भुवनेश्वरम् ।
शक्त्याधारं तु जानीयादनन्तं वरवर्णिनि ।'

इति । श्रीत्रिशिरोभैरवेऽपि

' ब्रह्माण्डबाह्यतोऽनन्तो विश्वाधारस्तु कथ्यते ।'

इति । अन्तरवस्थाने चास्य

' दशकोटिमितं तत्तु पोतैः सर्वत्र तत्समम् ।
ऊर्ध्वं तस्य सुरेशानि कोटिमात्रं तमः परम् ॥'

इत्याद्युक्तं भुवनादिमानं वक्ष्यमाणब्रह्माण्डान्तर्वर्ति-भुवनमानसंख्यातोऽतिरिच्येत, —इति तत्संख्याया आसमञ्जस्यं स्यात् । ननु यद्येवं तदनन्तस्य

' ब्रह्माण्डमण्डपस्यान्तर्भुवनानि विशोधयेत् ।
आदावनन्तभुवनं कौष्माण्डं हाटकेश्वरम् ॥
अनन्तभुवनस्यानु कालाग्निभुवनं महत् ।
शार्वं ब्राह्मं वैष्णवं च रौद्रं भुवनमुत्तमम् ॥
ब्रह्माण्डोदरमध्ये तु अष्टावेते प्रकीर्तिताः ।'

इत्यादीनामन्तःस्थितिविधायकानां वाक्यानां कोऽर्थः स्यात् । किंच

'ब्रह्मणोऽण्डस्य शकलं कोटिमात्रं प्रमाणतः ।
तदूर्ध्वं कालरुद्रस्तु दशेशानसमन्वितः ॥
कोटिमात्रं पुरं तस्य तज्ज्वाला दशकोटयः ।
अनन्तोऽधः पद्म ऊर्ध्वे अन्ये तु क्रमशः स्थिताः ॥'

इति । तथा

'अधः कालान्तगो रुद्रो दशेशस्थानमध्यगः ।
पद्मश्चोर्ध्वमधोऽनन्तस्तथान्ये क्रमवर्तिनः ॥ '

इत्याद्युक्त्या कालाग्निभुवनान्तरेव अस्य भुवनं नतु पृथक्,—इति वक्ष्यमाणाया भुवनसंख्याया अपि न किंचिदासमञ्जस्यम् । इह च अनन्तस्य श्रीसिद्धातन्त्रोक्तं भुवनमानं न ग्राह्यमेव,

'क्रियादिभेदभेदेन तन्त्रभेदो यतः स्मृतः ।
तस्माद्यत्र यदेवोक्तं तत्कार्यं नान्यतन्त्रतः ॥ '

इत्याद्युक्त्या तत्प्रक्रियाया भिन्नत्वात् । तथा च इह नरकाणां द्वात्रिंशत्कोटयो मानं तत्रैकविंशतिः। यदुक्तम्

'तस्योर्ध्वं नरका घोरा एकविंशतिकोटयः । '

इति । इहापि

'अण्डस्यान्तरनन्तः..... ।' (८ । ३९३)

इति,

'अष्टावन्तः साकं शर्वेण..... ।' (८ । ३९७)

इति च वक्ष्यमाणं व्याहन्येत,—इति किमत्र प्रतिपत्तव्यम् ? । इदमत्र प्रतिपत्तव्यं—यदनन्तस्य बहिरवस्थानमिति । तथाहि श्रीतन्त्रराजभट्टारके

'ब्रह्माण्डमण्डपान्तर्[1]..... ।'

इत्यादिकमनन्तस्य नान्तःस्थितेर्विधायकं, किंत्वेवं शुद्धिक्रमस्य तदवस्थितेः पूर्वमुक्तत्वात्, एतावन्मात्रस्यैवात्र विवक्षितत्वात् । यदुक्तं तत्र

'अतो' भुवनदीक्षान्या शृणु पार्वति तत्त्वतः ।
आदिषट्के पुरा प्रोक्तमेतन्निखिलतो मया ॥
तथापि तव वक्ष्यामि संक्षेपादिह भामिनि ।'

इत्युपक्रम्य

'तेषां विभागमधुना शृणु वीरेन्द्रवन्दिते ।'

इति । तत्र च अस्यादिषट्के बहिरेवावस्थानं विहितम् । यदुक्तम्

'यत्तद्भूम्यण्डकं भाति पीतमम्बुजजन्मनः ।
तस्याधोभागगा भान्ति पूर्वदृष्टान्तकारकाः ॥
शेषाहिफणमाणिक्यविश्वकर्म्मप्रसादतः ।' (?)

इत्युपक्रम्य

---

१ ग० पु० अधो भुवनेति पाठः ।

'अनन्तशक्तिचन्द्रांशुपीयूषोर्मिभिरुल्वणैः ॥
आलिङ्गितमतश्चोच्चैरप्यत्त्वाधःपथोच्छलत् ॥
भुवनं तस्य वीरस्य भात्यनन्तस्य स्वश्रिया ।
अनन्तवनितावक्त्रपद्मषण्डसरः सदा ॥'

इति विशेष्य

'ततो हूहुकरुद्रस्य चूडामणिनभ (विव) स्वतः ।
त्विषा प्रध्वस्ततिमिरं पुरं वीरगणाकुलम् ॥'

इत्यादिना हूहुकरुद्राणां भुवनानि,

'भैरवीयमहारज्जुप्रबद्धानि महेश्वरि ।
एतान्यप्सु पुराण्यत्र निभृतानि शिवात्मना ॥
लक्षोच्छ्रितानि सर्वाणि सलिलावर्तगानि च ।'

इत्यादिना च तेषां देशं मानं चाभिधाय

'समन्ताद्ब्रह्मणोऽण्डं तु शतकोटिप्रविस्तरम् ।
कटाहं च स्मृतं कोटिः शतरुद्रैः समन्वितम् ॥'

इति । यत्पुनः

'.....अन्तर्भुवनानि विशोधयेत् ।'

इत्याद्युक्तं तन्मल्लग्रामवद्भूम्ना व्याख्येयम्, अन्यथा हि पूर्वापरव्याघातः स्यात् । एवमत्र अनन्तपूर्वकं शतरुद्रपर्यन्तं भुवनानां शुद्धौ यौगपद्येन तदसंपत्तेः क्रममात्रमेवाभिधित्सितं न त्वन्तर्बहीरूपत्वमपि, तथात्वे तच्छुद्धावविशेषात् । एवं

'एतेषां तु अधस्ताद्वै कालाग्निभुवनं ततः ।
हूहुकाश्च तथा देवि ब्रह्माण्डोदरवर्तिनः ॥'

इत्यादावपि व्याख्येयम् । एतच्चोत्तानतयैव गृहीत्वा संग्रहकाराः प्रवृत्ताः,—इति तत्र तत्र तथाभ्यधुः, येनास्य अन्तरवस्थाने भ्रान्तिबीजत्वं प्ररूढम् । तथा च सोमशंभुः

'अथ हूहुककालाग्निरुद्रौ हाटक एव च ।
कूष्माण्डश्चाथ शर्वश्च ब्रह्मा विष्णुश्च सप्तमः ॥
रुद्रश्चाष्टाविमे रुद्राः कटाहस्यान्तरे स्थिताः ।'

इति । गुरुभिरेतन्नाना विकल्पितम्,—इति तन्मतप्रदर्शनाशयेन

'अण्डस्यान्तरनन्त.....। (८ । ३९३)

इति,

अष्टावन्तः साकं शर्वेण..... । (८ । ३९७)

इति च पुरस्तादिह वक्ष्यति,—इति न पूर्वापरव्याहतत्वम् । यद्वक्ष्यति

अथ सकलभुवनमानं
यत्पूर्वं निगदितं निजैर्गुरुभिः ।
तद्वक्ष्यते समासाद्
बुद्धौ येनाशु संक्रामेत् ॥' (८ । ३९२)

इति । यत्तु कालाग्निभुवनान्तरेवास्य भुवनं न पृथक्,—इत्युक्तं तदयुक्तम्; अयं हि हूहुकरुद्राधि-

पतेर्बहिरवस्थितात् पृथक्शोध्यादनन्तात् कालाग्नेर्भुवनान्तर्वर्ती तत्परिवारभूतोऽन्यः । एतस्यैव हि तत्त्वे पृथक्शोध्यत्वमनभिधानीयं, कालाग्निरुद्रशुद्धयैव तच्छुद्धेः; अन्यथा पद्मादीनामपि तदापतेत्,—इति अन्तरनेके रुद्राः शोधनीयाः स्युः,—इति वृत्तावष्टोत्तरादपि शतादधिकानि प्रसज्येरन् । एवमन्यैश्च यदस्य बहिर्देशावस्थानेऽपि अधःस्थशतरुद्रदशकान्यतरत्वमुक्तं तदप्ययुक्तम्; एवं हि अस्य तन्मध्यपाठेनैव गतार्थत्वादादितरमेव पृथगभिधानं स्यात् । यच्च श्रीसिद्धातन्त्रोक्तं भुवनमानमिह न ग्राह्यम्,—इत्युक्तं तदप्ययुक्तम्; यतो यदि नाम नरकादिवदनन्तभुवनस्येह मानं किंचिदुच्येत तत्प्रक्रियाभेदादन्यतन्त्रोक्तमग्राह्यमेव,—इति स्यात् । भुवनस्य मानमवश्यभावि, तच्चेह नोक्तम्,—इति तदाकाङ्क्षायामेव अवश्यमेवान्यतः कुतश्चिदपेक्षणीयम्,—इति को नाम श्रीसिद्धातन्त्रे प्रद्वेषः । यद्वा श्रीतन्त्रराजभट्टारकेऽपि अस्य लक्षोच्छ्रितत्वमुक्तम्,—इति तदपेक्ष्यतां, को नाम नो निर्बन्धः; यावता हि अस्माकमन्तर्भुवनमानसंख्याया आसमञ्जस्यमभिधा-

नीयं तच्च उभयथापि सिद्ध्येत्,—इत्यलं बहुना । 'कटाहरुद्राणाम्' इति कटाहाधोवर्तिनां हूहुकरुद्राणाम्; अतश्च तच्छुद्ध्यैव एतच्छुद्धिर्भवेदिति भावः । यदुक्तम्

'तेन शुद्धेन शुद्धानि त्वण्डान्यत्रोहकैः सह ।' (स्व० १०।६)

इति । एवमुत्तरत्रापि तत्तद्भुवनेश्वरद्वारेणैव तत्तद्भुवनशुद्धिरिति मन्तव्यम् । यदुक्तम्

'न तत्र दुःखितः कश्चिन्मुक्त्वा दुःखमनङ्गजम् ।
रमन्ते तत्र वै वीरा नारीभिः सह लीलया ॥' (स्व० १०।८)

इति । पोतारूढ इति, यदुक्तम्

'अनन्तः संस्थितोऽधस्तात्पोतारूढो जलान्तरे ।'

इति । मद्यपानविघूर्णित इति, यदुक्तम्

'महापानरतः श्रीमान्महामत्तः सदाम्भसि ।'

इति । भैरवं ध्यायन्नित्यनेन अस्य तदेकप्रवणतया

'भुवनेश त्वया नास्य साधकस्य शिवाज्ञया ।
प्रतिबन्धः प्रकर्तव्यो यातुः पदमनामयम् ॥' (मा० वि० ९।६४)

इत्यादि तदाज्ञानुविधायित्वमस्ति,— इति प्रथमत एव सर्वाक्षेपेण प्रकाशितम् । नागैरिति, यदुक्तम्

'पद्मश्चैव महापद्मः शङ्खपालोऽथ वज्रिणः ।
कार्कोटश्च निषादश्च कम्बलाश्वतरावुभौ ॥
एभिश्चैव महानागैः समन्तात्परिवारितः ॥'

इति । एवं च स्वयमपि नागरूपत्वमेव, इति सिद्धम् । यदुक्तम्

'ऊर्ध्वबाहुर्महाकायो नागरूपी महाबलः ।
फणानां तु सहस्रेण धारयित्वा जगत्स्थितः ॥'

इति । अत एव श्रीतन्त्रराजभट्टारके शेषाहित्वेनायमुक्तः ॥ २१ ॥

इदानीं ब्रह्माण्डस्यान्तर्भुवनानि वक्तुमुपक्रमते

कालाग्नेर्भुवनं चोर्ध्वे
कोटियोजनमुच्छ्रितम् ॥ २२ ॥
लोकानां भस्मसाद्भाव-
भयान्नोर्ध्वं स वीक्षते ।

ऊर्ध्व इत्यर्थात् कटाहस्य, स च कोटियोजनानां घनः । यद्वक्ष्यति

'अधश्चोर्ध्वं कटाहोऽण्डे स घनः कोटियोजनः ।' (स्व० १०। १६२)

इति । नोर्ध्वं स वीक्षते इति, यदुक्तम्

नोर्ध्वं निरीक्षते देवो मेदं भूद्भस्मसाज्जगत् ।

इति । अत एवास्योर्ध्ववक्त्रमनुन्मीलितम्,—इति चतुर्वक्त्रत्वमेव सर्वत्रोक्तम् । यदुक्तम्

'त्रिनेत्रः स चतुर्वक्त्रो वह्निज्वालावलीधरः ।'

इति ॥ २२ ॥

ननु

'यो हि यस्मादगुणोत्कृष्टः स तस्मादूर्ध्वमिष्यते ।'
(मा० वि० २ । ६०)

इत्याद्युक्त्या नरकोर्ध्वमस्यावस्थानं युक्तं, तत् कथं तदध उक्तम् ? इत्याशङ्क्याह

स च व्याप्तापि विश्वस्य
यस्मात्प्लुष्यन्निमां भुवम् ॥ २३ ॥
नरकेभ्यः पुरा व्यक्त-
स्तेनासौ तदधो मतः ।

उक्तं च प्राक्

'निरयेभ्यः पुरा कालवह्नेर्व्यक्तिर्यतस्ततः ।
विभुरप्येष तदधः .....॥' (६ । १४२)

इति ॥ २३ ॥

दश कोट्यो विभोर्ज्वाला
तदर्धं शून्यमूर्ध्वतः ॥ २४ ॥
तदूर्ध्वे नरकाधीशाः
क्रमाद्दुःखैकवेदनाः ।
अधो मध्ये तदूर्ध्वे च
स्थिता भेदान्तरैर्वृताः ॥ २५ ॥

अवीचिकुम्भीपाकाख्य-
रौरवास्तेष्वनुक्रमात् ।
एकादशैकादश च
दशेत्यन्तः शराग्नि तत् ॥ २६ ॥
प्रत्येकमेषामेकोना
कोटिरुच्छ्रितिरन्तरम् ।
लक्षमत्र खवेदास्य-
संख्यानामन्तरा स्थितिः ॥ २७ ॥
कूष्माण्ड ऊर्ध्वे लक्षोन-
कोटिस्थानस्तदीशिता ।

'तदर्ध' पञ्च कोटयः । 'शून्यं' धूमोष्मादिभया-ज्जनरहितम् । यदुक्तम्

'अस्योपरिष्टाद्वेशि पञ्च कोट्यो वरानने ।
न कश्चिन्निवसत्यत्र धूमोष्मपरितापितः ॥' (स्व० १०।३०)

इति । 'तदूर्ध्वे' शून्योपरि । अनुक्रमादिति संहारात्मनः, तेन रौरवे कुम्भीपाके चैकादशान्तर्भवन्ति अवीचौ च दश,—इत्यात्मना सह तन्नरकत्रयं 'शराग्नि' पञ्चत्रिंशत्संख्यावच्छिन्नं भवतीत्यर्थः । यदुक्तम्

'नरकैकादशगतमवीचिं शोधयेत्प्रिये ।
आत्मना द्वादशं देवि कुम्भीपाकं विशोधयेत् ॥
महारौरवसंज्ञं चाप्येवमेव विशोधयेत् ।
पञ्चत्रिंशत्प्रवक्ष्यामि समासेन वरानने ॥
अवीचिः क्रमिनिचयो नदी वैतरणी तथा ।
लोहश्च शल्मलिश्चैवाप्यसिपर्वत एव च ॥
सोच्छ्वासश्च निरुच्छ्वासः पूतिमांसः परस्तथा ।
तप्तत्रपुः क्षारकूपो जतुलेपस्तथैव च ॥
अन्तर्भूता अवीचौ तु कुम्भीपाकस्य शृणुताम् ।
अस्थिभङ्गः क्रकचच्छेदकूपश्चापि कटङ्कटः ॥
वसामिश्रो ह्ययस्तुण्डस्रपुलेपश्च कीर्तितः ।
कुम्भीपाकश्च विज्ञेयस्तीक्ष्णासिश्च तथैव च ॥
तप्तलोहश्च विज्ञेयः क्षुरधारपथस्तथा ।
अशनिश्च सुतप्तश्च द्वादशैते प्रकीर्तिताः ॥
एकादशान्तर्विज्ञेयाः कुम्भीपाकस्य दारुणाः ।
महारौरवराजे च अत ऊर्ध्वं निबोध मे ॥
कालसूत्रो महापद्मः कुम्भः संजीवनेक्षुकौ ।
पाशोऽम्बरीशकश्चैव अयःपट्टस्तथैव च ॥
दण्डयन्त्रस्त्वमेध्यश्च घोररूपस्तथापरः ।
महारौरव एतेषामुपरिष्टाद्व्यवस्थितः ॥' स्व-१०।८१-९०)

इति । 'एषाम्' इति त्रयान्तर्भूतानां द्वात्रिंशतो नरकाणाम् 'एकोना कोटिः' इति नवनवतिर्लक्षाणि । 'अन्तरम्' इति प्रत्येकं शून्यरूपं, तेन द्वात्रिंशत् कोटयः । तत्र सचत्वारिंशच्छतं प्रधान,

तत्रापि द्वात्रिंशत्, तत्रापि त्रयमित्युक्तं स्यात् । यदुक्तम्

'अतः परं वरारोहे नरकाः परिकीर्तिताः ।
पञ्चाशत् कोटयो देवि.....॥' (स्व० १० । ३१)

इति । तथा

'तेषु मध्ये शतं श्रेष्ठं चत्वारिंशाधिकं प्रिये ।
तेषामपि वराश्चान्ये द्वात्रिंशन्नरकाधिपाः ॥
राजराजेश्वरास्त्रीणि.....॥'

इति । एवमुपदेशे च अयमाशयो—यत् दीक्ष्यस्य पापभूयस्त्वे तारतम्येन निश्चिते वितत्य नरकाणां शुद्धिः, अन्यथा तु संक्षेपेणेति । ऊर्ध्व इति, नरकाणाम् ॥२७॥

नन्वेवंविधेषु नरकेषु के नाम वसन्ति, के वा न ? इत्याशङ्क्याह

शास्त्रविरुद्धाचरणात्
कृष्णां ये कर्म विदधते ॥२८॥
तत्र भीमैर्लोकपुरुषैः
पीड्यन्ते भोगपर्यन्तम् ।
ये सकृदपि परमेशं
शिवमेकाग्रेण चेतसा शरणम् ॥२९॥

यान्ति न ते नरकयुजः
कृष्णां तेषां सुखाल्पतादायि ॥

'शास्त्रविरुद्धाचरणात्' इति विहितस्याकरणात् निषिद्धस्य च करणात् । सुखाल्पतादायीति, प्रमादादपरिनिष्पन्नत्वात् । तदुक्तम्

'एतेऽतिघोरा नरकास्त्रिकोणाः परिकीर्तिताः ।
असत्कर्मरतानां तु प्राणिनां पातनाय वै ॥
निस्त्रिंशकर्मकर्तृणां शठानां पापकर्मणाम् ।
निर्दयाधमजातीनां परहिंसारतात्मनाम् ॥
परदाररतानां च शिवशास्त्रस्य दूषिणाम् ।
देवद्रव्यापहाराणां[1] ब्रह्मघ्नपितृघातिनाम् ॥
गोघ्नानां च कृतघ्नानां मित्रविस्रम्भघातिनाम् ।
सुवर्णभूमिहर्तृणां शौचाचारनिवर्तिनाम् ॥
दयादाक्षिण्यहीनानां पैशुन्यानृतचेतसाम् ।
नरकाश्च समाख्यातास्त्वकर्मपथवर्तिनाम् ॥
शुभकर्मरता लोका नरके न पतन्ति हि ।
तत् समासेन वक्ष्यामि यथावदनुपूर्वशः ॥
सत्यं क्षान्तिरहिंसा च शौचं स्नानमकल्कता ।
दयालौल्यं च यस्यासौ नरकान्नाधिगच्छति ।
शान्तो दान्तः सुहृष्टात्मा त्वनहंकारवान्समः ।
अद्रोही चानसूयश्च परैश्वर्ये च निःस्पृहः ॥

---

१ ग० पु० अपहर्तृणामिति पाठः ।

अमात्सर्यममानित्वं शिवभक्तिरचापलम् ।
जपध्यानरतिः स्थैर्यं कार्पण्यस्य च वर्जनम् ॥
व्रतानि नियमाश्चैव स्वाध्यायश्च त्रिसन्ध्यता ।
सर्वत्र श्रद्दधानत्वमार्जवं ह्रीर्मनस्विता ॥
ओजः प्रशान्तिः संतोषोऽप्रियवाक्यविवर्जनम् ।
परीक्ष्यकारिता[1] नित्यं मनोऽहंकारनिग्रहः ॥
अदम्भित्वममानित्वमकल्को ज्ञानशीलता ।
पितृदेवार्चने भक्तिर्गोब्राह्मणशरण्यता ॥
अग्नौ होमो गुरौ दानं ज्ञानिनां पर्युपासनम् ।
एकान्ते च रतिर्ध्यानमात्मन्येव च तुष्टता ॥
अव्यापारः परार्थेषु औदासीन्यमनागसः ।
अक्रोधित्वमनालस्यमिति धर्माः प्रकीर्तिताः ॥
यस्त्वेतान्भजते धर्मान् सोऽमृतत्वाय कल्पते ।
नश्यन्ति पौरुषाः पाशा येऽप्यनन्ताः प्रकीर्तिताः ॥
शिवाचाररतानां तु धार्मिकाणां हि देहिनाम् ।
तस्मादेवं तु विज्ञाय मनो धर्मे नियोजयेत् ॥
यस्य चित्तमसंभ्रान्तं निर्विकल्पमकल्मषम् ।
स याति परमांल्लोकान्नरकांश्च न पश्यति ॥
यस्य बुद्धिरसंमूढा सर्वभूतेष्वपातकी ।
अकल्कवान्सत्यवान्यो नरकान् स न पश्यति ॥'

(स्व० १० । ५३–७१

इति ॥२६॥

सहस्रनवकोत्सेध-
मेकान्तरमथ क्रमात् ॥३०॥

---

२ समीक्ष्यकारितेति स्वच्छन्दतन्त्रपाठः ।

पातालाष्टकमेकैक-
मष्टमे हाटकः प्रभुः ।

सहस्रशब्दसंनिधेरेकं सहस्रं, तदेषामशीतिसहस्राणि मानं सिद्धम् । पातालाष्टकमिति, यदुक्तम्

'आभासं वरतालं च शर्करं च गभस्तिमत् ।
महातलं च सुतलं रसातलमतः परम् ॥
सौवर्णमष्टमं ज्ञेयं सर्वकामसमन्वितम् ।' (स्व० १०।९६)

इति । अष्टम इति, सौवर्णाख्ये । यदुक्तम्

'तदूर्ध्वं चैव सौवर्णं पातालं परिकीर्तितम् ।
तत्रावसत्यसौ[1] देवो हाटकः परमेश्वरः ॥' (स्व० १०।११६)

इति । यद्यपि चात्र पातालसप्तके

'त्रयोऽसुरास्तथा नागा राक्षसाश्चाविभागतः ।
एकैकत्र च पाताले कथितास्ते वरानने ॥
पातालसप्तके ज्ञेयास्तथान्ये भुवनाधिपाः ।
बलो ह्यतिबलश्चैव बलवान्बलविक्रमः ॥
सुबलो बलभद्रश्च बलाध्यक्षश्च कीर्तिताः ।' (स्व०१०।११४)

इत्याद्युक्त्या प्रत्येकं पृथक् भुवनाधिपाः संभवन्ति, तथाप्येषां

'हाटकेन विशुद्धेन सर्वेषां शुद्धिरिष्यते ।'

इत्याद्युक्त्या हाटकरुद्रशुद्ध्यैव शुद्धिः,—इत्यानर्थक्यादिह तदुपदेशो न कृतः ॥ ३० ॥

---

१ ग० पु० वसति देवेश इति पाठः ।

अस्य चैवमभिधाने किंनिमित्तमित्याशङ्क्याह

प्रतिलोकं नियुक्तात्मा
श्रीकण्ठो हठतो बहूः ॥३१॥
सिद्धीर्ददात्यसावेवं
श्रीमद्रौरवशासने ।

'सिद्धीः' इति सालोक्यादिरूपाः । यदुक्तं तत्र

'प्रतिलोके नियुक्तात्मा श्रीकण्ठो भगवानसौ ।
करोति हाटको भूत्वा पातालद्वारपालनम् ॥
हठेन भङ्क्त्वा यन्त्राणि पातालेषु महोदयाः ।
सिद्धीरभ्यस्तसन्मन्त्रान् साधकांल्लम्भयत्यसौ ॥'

इति ॥ ३१ ॥

नन्वसावेवं सिद्धीः केषां ददातीत्याशङ्क्याह

व्रतिनो ये विकर्मस्था
निषिद्धाचारकारिणः ॥३२॥
दीक्षिता अपि ये लुप्त-
समया नच कुर्वते ।
प्रायश्चित्तांस्तथा तत्स्था
वामाचारस्य दूषकाः ॥३३॥

देवाग्निद्रव्यवृत्त्यंश-
जीविनश्चोत्तमस्थिताः ।
अधःस्थगारुडाद्यन्य-
मन्त्रसेवापरायणाः ॥३४॥
ते हाटकविभोरग्रे
किङ्करा विविधात्मकाः ॥

विकर्मस्थत्वे निषिद्धाचारकारित्वं हेतुः । लुप्तसमया इति, चण्डद्रव्यादिसंस्पर्शात् । अत एव प्रायश्चित्ताकरणाद्भ्रष्टदीक्षाफलाः । यदुक्तम्

'प्रायश्चित्तमकुर्वाणो मन्त्री विधिविलङ्घने ।
सिद्धिभ्रंशमवाप्नोति.....॥'

इति । 'तत्स्था' इति वामाचारनिष्ठाः, तेन तत्कारिणस्तद्द्वेषिणश्च,—इत्युक्तं स्यात् । तेषामेव च विशेषणं 'देवेत्यादि' । अन्येषां हि एवं नारकित्वमेव भवेत् । यथोक्तम्

'यदीच्छेन्नरकं गन्तुं सपुत्रपशुबान्धवः ।
देवेष्वधिक्षिपं कुर्याद् गोषु च ब्राह्मणेषु च ॥'

इति । 'उत्तमस्थिता' इति

'वेदादिभ्यः परं शैवम्.....।'

इत्याद्युक्तेः, ऊर्ध्वोर्ध्वशासनस्थाः । 'विविधात्मका' इति तत्तत्कर्मानुसारेणोत्तमादिभिन्ना इत्यर्थः । एतच्चैषां निःष्यन्दफलवत् नतु साक्षात् । तथात्वे हि

'ब्राह्मणाः क्षत्रिया वैश्या शूद्रा वा वीरवन्दिते ।
आचार्यत्वे नियुक्ता ये ते सर्वे तु शिवाः स्मृताः ॥
अन्यथा प्राक्स्वरूपेण ये पश्यन्ति नराधमाः ।
नरके ते प्रपच्यन्ते सादाख्यं वत्सरत्रयम् ॥'(स्व-४।४ ११)

इति । तथा

'प्राग्जात्युदीरणाद्देवि प्रायश्चित्ती भवेन्नरः ।
दिनत्रयं तु रुद्रस्य पञ्चाहं केशवस्य च ।
पितामहस्य पक्षैकं नरके पच्यते तु सः ॥' (स्व-४।५४२)

इत्यादिश्रुतिविरोधः स्यात् ॥ ३४ ॥

एवं भोगोपरमे पुनरेषां किं स्यात्? इत्याशङ्क्याह

ते तु तत्रापि देवेशं
भक्त्या चेत्पर्युपासते ॥ ३५ ॥
तदीशतत्त्वे लीयन्ते
क्रमाच्च परमे शिवे ।
अन्यथा ये तु वर्तन्ते
तद्भोगनिरतात्मकाः ॥ ३६ ॥

ते कालवह्निसंताप-
दीनाक्रन्दपरायणाः ।
गुणतत्त्वे निलीयन्ते
ततः सृष्टिमुखे पुनः ॥ ३७ ॥
पात्यन्ते मातृभिर्घोर-
यातनौघपुरस्सरम् ।
अधमाधमदेहेषु
निजकर्मानुरूपतः ॥ ३८ ॥
मानुषान्तेषु तत्रापि
केचिन्मन्त्रविदः क्रमात् ।
मुच्यन्तेऽन्ये तु बध्यन्ते
पूर्वकृत्यानुसारतः ॥ ३९ ॥
इत्येष गणवृत्तान्तो
नाम्ना हुलहुलादिना ।
प्रोक्तं भगवता श्रीम-
दानन्दाधिकशासने ॥४०॥
पातालोर्ध्वे सहस्राणि
विंशतिर्भूकटाहकः ।

सिद्धातन्त्रे तु पाताल-
पृष्ठे यक्षीसमावृतम् ॥४१॥
भद्रकाल्याः पुरं यत्र
ताभिः क्रीडन्ति साधकाः ॥

'देवेशम्' इति हाटकम् । 'अन्यथा' इति तत्पर्युपासावैमुख्येन । 'मातृभिः' इत्यपराशक्तिभिः । यदुक्तम्

'विषयेष्वेव संलीनानघोऽघः पातयन्त्यणून् ।
याः समालिङ्ग्य रुद्राणून् घोरतर्योऽपराः स्मृताः ॥'
(मा० वि० ३।३१)

इति । 'तत्रापि' इति मानुषत्वे । तद्धीना [अन्ये] इत्यमन्त्रविदस्तत्तत्स्वकर्मौचित्येन तत्तज्जात्याद्यनुभवन्तीत्यर्थः । नचैतदस्माभिः स्वोपज्ञमेवोक्तमित्याह 'प्रोक्तमित्यादि' । यदुक्तं तत्र

'मातङ्गा हुलहुलाश्चान्ये हेतुका दिव्यरूपिणः ।
कापालिकाश्च कङ्काला महोच्छुष्माश्च शोभनाः ॥'

इत्युपक्रम्य

'एवं संख्याविहीनास्तु महाचण्डेश्वरेरणात् ।
चण्डद्रव्यविलुप्तास्तु दीक्षिताः शिवशासने ॥
चण्डद्रव्येण जीवन्ति ते स्मृता ब्रह्मराक्षसाः ॥'

इति । तथा

'रमन्ते विविधैर्भोगैस्तेऽपि पातालवासिनः ।
पाताले भूतराजानो भवन्ति बलदर्पिताः ॥'

इति 'भूकटाहक' इति मनुष्याधारभूः । एवमियदन्तं ब्रह्माण्डस्यार्धं, तत्कटाहः कोटिः, कालाग्निपुरं कोटिः, तज्ज्वाला दशकोटयः, धूमः पञ्च, नरका द्वात्रिंशत्, कूष्माण्डपुरं नवनवतिलक्षाणि, पातालाष्टकमशीतिसहस्राणि, भूकटाहो विंशतिः,—इत्येवं पञ्चाशत् कोटयः । अत्रैव श्रीसिद्धयोगीश्वरीमतोक्तं विशेषं दर्शयति 'सिद्धातन्त्रे' इत्यादिना । यदुक्तं तत्र

'पातालोर्ध्वं भवेद्भद्रं भद्रकालीगृहं शुभम् ।
यक्षिणीनां तु सर्वासां नायिका संप्रकीर्तिता ॥
चतुष्षष्टिः सहस्राणि यक्षिणीनां पुराणि तु ।
तत्र कोटिशतं यावत्कन्यानां तु पुरे पुरे ॥
क्रीडन्ति साधकास्तत्र तैः सार्धं तु मना [हा] बलाः ।
ज्ञात्वा तु यक्षिणीकल्पं सिद्धयोगीश्वरीमते ॥'

इति ।

'तस्योर्ध्वं च पुनर्लक्षं तमश्चैवातिदुस्सहम् ।
तप्ताङ्गारनिभा भूमिस्तप्तपाषाणदीपिता ॥'

इति ।

'तस्योर्ध्वं च न किंचित्स्याद्यावल्लक्षाश्चतुर्दश ।
पुनर्नागालयं चैवमनन्तभयकारकम् ॥
कृष्णनागसहस्रैस्तु लक्षधा परिवारितम् ।'

इति ।

'मातृद्रोही पितृद्रोही गुरुद्रोही च भ्रूणहा ।
बालहन्ता व्रजत्यत्र स्त्रीव्यङ्गे च महापशुः ॥
तिष्ठते यावत्पाताले मन्त्रमार्गस्य दूषकः ॥'

इति ॥ ४१ ॥

एवं ब्रह्माण्डस्य भूकटाहान्तमेकमर्धमभिधाय तदूर्ध्वमपि भुवनादि दर्शयति

ततस्तमस्तप्तभूमि-
स्ततःशून्यं ततोऽहयः ॥ ४२ ॥
एतानि यातनास्थानं
गुरुमन्त्रादिदूषिणाम् ।
ततो भूम्यूर्ध्व[1] [मध्य] तो मेरुः
सहस्राणि स षोडश ॥ ४३ ॥
मग्नस्तन्मूलविस्तार-
स्तद्द्वयेनोर्ध्वविस्तृतिः ।
सहस्राब्धिवसूच्छ्रायो
हैमः सर्वामरालयः ॥ ४४ ॥

सहस्राणीति, योजनानाम् । 'मग्न' इत्यर्थाद्-

---

१ ख० पु० भूमिधृत इति पाठः ।

भूकटाहे । तन्मूलविस्तार इति, तच्छब्देन षोडशानां सहस्राणां परामर्शः । 'तद्द्वयेन' इति द्वात्रिंशता सहस्रैः । 'सहस्राब्धिवसूच्छ्राय' इति चतुरशीति-सहस्रोच्छ्रितिरित्यर्थः । तदुक्तम्

'तस्या मध्ये महामेरुः सौवर्णः.....।' (स्व-१० । १२१)

इत्याद्युपक्रम्य

'योजनानां सहस्राणि चतुरशीतिरुच्छ्रितः ।
षोडशैव सहस्राणि अधोभागे प्ररोपितः ॥
तान्येव मूलविस्तारो द्विगुणो मूर्धविस्तरः ।' (स्व१० । १२३)

इति ॥ ४४ ॥

नन्वेवंमानत्वेऽपि अस्य कीदृगाकारः ? इत्याशङ्क्याह

मध्योर्ध्वाधः समुद्वृत्त-
शरावचतुरश्रकः ।

'समुद्वृत्त' इति सम्यगष्टाश्रतापत्तिपूर्व उदूर्ध्वं वृत्तः, तेनाधो ब्रह्मभागे चतुरश्रो मध्ये विष्णुभागेऽष्टाश्रो रुद्रभागे च वृत्त ऊर्ध्वे मस्तके च शरावाकृतिरित्यर्थः ॥

नन्वेवमाकारत्वम्

'अव्यक्तं चतुरष्टाश्रवृत्तभागोपलक्षितम् ।'

इति, तथा

'तच्छत्रं कुक्कुटाण्डं च.....।'

इत्याद्युक्त्या पारमेश्वरस्य लिङ्गस्य संभवेत् तत्कथम् ?

इत्याशङ्क्याह

भैरवीयं च तल्लिङ्गं
धरणी चास्य पीठिका ॥ ४५ ॥
सर्वे देवा निलीना हि
तत्र तत्पूजितं सदा ।
मध्ये मेरुसभा धातु-
स्तदीशदिशि केतनम् ॥ ४६ ॥
ज्योतिष्कशिखरं शंभोः
श्रीकण्ठांशश्च स प्रभुः ।
अवरुह्य सहस्राणि
मनोवत्याश्चतुर्दश ॥ ४७ ॥
चक्रवाटश्चतुर्दिक्को
मेरुरत्र तु लोकपाः ।
अमरावतिकेन्द्रस्य
पूर्वस्यां दक्षिणेन ताम् ॥ ४८ ॥

अप्सरःसिद्धसाध्यास्ता-
मुत्तरेण विनायकाः ।
तेजोवती स्वदिश्यग्नेः
पुरी तां पश्चिमेन तु ॥ ४९ ॥
विश्वेदेवा विश्वकर्मा
क्रमात्तदनुगाश्च ये ॥
याम्यां संयमनी तां तु
पश्चिमेन क्रमात् स्थिताः ॥ ५० ॥
मातृनन्दा स्वसंख्याता
रुद्रास्तत्साधकास्तथा ।
कृष्णाङ्गारा निर्ऋतिश्च
तां पूर्वेण पिशाचकाः ॥ ५१ ॥
रक्षांसि सिद्धगन्धर्वा-
स्तूत्तरेणोत्तरेण ताम् ।
वारुणी शुद्धवत्याख्या
भूतौघो दक्षिणेन ताम् ॥ ५२ ॥
उत्तरेणोत्तरेणैनां
वसुविद्याधराः क्रमात् ।

वायोर्गन्धवती तस्या
　　दक्षिणे किन्नराः पुनः ॥ ५३ ॥
वीणासरस्वती देवी
　　नारदस्तुम्बुरुस्तथा ।
महोदयेन्दोर्गुह्याः स्युः
　　पश्चिमेऽस्याः पुनः पुनः ॥ ५४ ॥
कुबेरः कर्मदेवाश्च
　　तथा तत्साधका अपि ।
यशस्विनी महेशस्य
　　तस्याः पश्चिमतो हरिः ॥ ५५ ॥
दक्षिणे दक्षिणे ब्रह्मा-
　　श्विनौ धन्वन्तरिः क्रमात् ।

चशब्दद्वयं हेतौ । पूजितमित्यर्थात् त्रिषु लोकेषु । तदुक्तम्

'लिङ्गरूपी भवेन्मेरुः.....।'

इत्युपक्रम्य

'चतुरश्रमधो ब्रह्मा.....।'

इति,

'मध्ये अष्टाश्रको विष्णुः.....।'

इति,

'ऊर्ध्वं तु भवति रुद्रो वृत्ताकारः समन्ततः ।
मेरुः संजायते लिङ्गं धरणी चास्य पीठिका ॥
आलयः सर्वदेवानां तेन लिङ्गत्वमागतम् ।
लोनमस्य जगत्सर्वं ब्रह्माद्यं सचराचरम् ॥'

इति ।

'एवं ते भाषितं लिङ्गं त्रिषु लोकेषु पूजितम् ।'

इति ।

'सुमेरुर्हेमसंपृक्तः शरावाकृतिमस्तकः ।'

इति । 'धातुः' इति ब्रह्मणः । यदुक्तम्

'तस्योर्ध्वे तु सभा दिव्या नाम्ना चैव मनोवती ।'
(स्व० १०। १२३)

इत्युपक्रम्य

'सर्वभोगगुणोपेता ब्रह्मणस्तु महात्मनः ।'
(स्व० १०। १२४)

इति । तदीशादिशीति, तच्छब्देन सभापरामर्शः । अत्र च यद्यपि शृङ्गत्रयमस्ति तथाप्येतादिह प्राधान्यादुक्तम् । यदुक्तं किरणायाम्

'त्रिभिः शृङ्गैः समायुक्तो रुक्मकाञ्चनरत्नजैः ।
रत्नजं त्र्यम्बकस्योक्तं राजतं तु त्रिविक्रमे ॥
सौवर्णं कनकाण्डस्य.....।'

इति । लोकपा इति, भूम्ना । 'दक्षिणेन ताम्' इति तस्या दक्षिणे । तेन तद्दक्षिणेऽप्सरःपुरी, तद्दक्षिणे च सिद्धपुरीत्यादिक्रमः । अप्सरःप्रभृतिभिश्चात्र कामवत्याख्याः स्वपुर्यो लक्ष्यन्ते । एवमुत्तरत्रापि ज्ञेयम् । अत्र च 'बहुवचनादाद्यर्थो लभ्यते' इति नीत्यादित्यानामपि ग्रहणम्, —इत्यस्मिन्नन्तराले चतस्रः पुर्यो,ऽन्यथा षड्विंशतिर्न स्यात् । 'ताम्' इति अमरावतीम् । तेन तस्या एव वामे विनायकाः,—इति ज्ञेयम् । 'स्वदिशि' इत्यग्निकोणे । तच्चोत्तरत्रापि योज्यम् । 'तां पश्चिमेन' इति तस्याः पश्चिमे । तदनुगा इति, उत्तरत्रापि योज्यम् । एतच्च पुरीद्वयं वक्ष्यमाणायाः संयमन्यभिधायाः पुर्याः पुरस्तात्,—इत्यर्थसिद्धम् । एता हि सर्वा एव पुर्यः पूर्वाभिमुखाः, येनास्यां पूर्वपश्चिमादिविभागः । 'मातृनन्दा' इति पुर्यभिधानम् । 'स्वसंख्याता' इत्येकादश । 'तत्साधका' इति यमपरिचारकाः । रुद्रा इति, काकाक्षिवत् । 'क्रमात्' इति मातृनन्दानन्तरं यमपरिचारकाणां रुद्राणां पुरी, तदनन्तरमेकादशानामिति । 'रक्षांसि' इति निस्त्रिंशाभिधा-

नानि । 'तस्या दक्षिणे' इत्यर्थात् शुद्धवत्या उत्तरेण । 'पुर' इति पुरस्तात् । वीणासरस्वती, गान्धर्ववेदवतीत्यर्थः । 'तत्साधका' इति कुबेरपरिचारका यक्षाः । दक्षिणे इत्यर्थादमरावत्याः । 'उत्तरे दक्षिणे' इति द्विवचनादश्विनोर्धन्वन्तरेश्चैकैव पुरीति ज्ञेयम् ॥ ५५ ॥

तदेवोपसंहरति

मैरवे चक्रवाटेऽस्मि-
न्नेवं मुख्याः पुरोऽष्टधा ॥ ५६ ॥
अन्तरालगतास्त्वन्याः
पुनः षड्विंशतिः स्मृताः ।

मुख्या इति, लोकपालसंबन्धित्वात् । 'अन्या' इति गौण्यः । तदुक्तम्

'सभाया ब्रह्मणोऽधस्ताद्योजनानां चतुर्दश ।
सहस्राणि परित्यज्य चक्रवाटः समन्ततः ॥
स्वर्गाष्टकं तदुद्दिष्टं[1] तत्र तिष्ठन्ति लोकपाः ।
पूर्वेणेन्द्रस्य विख्याता पुरी नाम्नामरावती ॥

---

1 समुद्दिष्टमिति स्वच्छन्दे पाठः ।

तेजोवती तथाग्नेय्यां चित्रभानोः प्रकीर्तिता ।
दक्षिणे यमराजस्य नाम्ना संयमनी पुरी ॥
कृष्णाङ्गारा तु नैर्ऋत्यां राक्षसेशस्य कीर्तिता ।
पश्चिमेन जलेशस्य पुरी शुद्धवती स्मृता ॥
वायव्यां तु पुरी वायोर्नाम्ना गन्धवहा प्रिये ।
उत्तरेणापि सोमस्य पुरी नाम्ना महोदया ॥
ऐशान्यामीशराजस्य पुरी नाम्ना यशोवती ।
एतासामन्तरे देवि शृणु षड्विंशतिं पुरीः ॥
दक्षिणेनामरावत्याः कामवत्यप्सरःपुरी ।
सौवर्णी सिद्धसंघानां तस्या वै दक्षिणेन तु ॥
तस्या वै दक्षिणेनान्या पद्मरागोपशोभिता ।
आदित्यानां पुरी ख्याता नाम्ना चांशुमती शुभा ॥
साध्यानां राजते दिव्या ख्याता वै कुसुमावती ।
वह्नेः पश्चिमदिग्भागे विश्वेषां रेवती पुरी ॥
तस्यास्तु पश्चिमे देवि दिव्या वै विश्वकर्मणः ।
पश्चिमे धर्मराजस्य मातृनन्दा पुरी स्मृता ॥
क्रीडन्ति मातरस्तत्र मधुपानविघूर्णिताः ।
रुद्राणां पश्चिमे तस्या रोहिता नाम काञ्चनी ॥
तत्र शूलधरा रुद्रा यमस्य परिचारकाः ।
तस्य पश्चिमतो ज्ञेया नाम्ना गुणवती पुरी ॥
एकादशानां रुद्राणां वज्रप्राकारतोरणा ।
निर्ऋतेः पूर्वभागे तु पिङ्गला नाम वै पुरी ॥
सुकर्मसंज्ञा देवेशि पिशाचास्तत्र संस्थिताः ।
नैर्ऋत्युत्तरसामीप्ये पुरी कृष्णवती शुभा ॥
निस्त्रिंशा नाम तत्रैव वसन्ति राक्षसाः सदा ।
तस्या अप्युत्तरे भागे पुरी हैमी सुखावती ॥

मित्रो वसति तत्रैव बहुभृत्यजनावृतः।
अस्या अप्युत्तरे हैमी गान्धर्वी नाम विश्रुता॥
वसन्ति तत्र गन्धर्वा दिव्यकन्यासमावृताः।'
स्व० १०। १३०—१४५)

इति। तथा

'भूतानां सिद्धसेना तु वरुणस्य तु दक्षिणे।
हेमसंज्ञा वसूनां तु वरुणस्यापि चोत्तरे॥
तस्यास्तूत्तरतो देवि नाम्ना सिद्धवती पुरी।
सर्वविद्याधराणां तु सा पुरी परिकीर्तिता॥
वायोर्दक्षिणतो देवि सिद्धा नाम पुरी स्थिता।
वसन्ति किन्नरास्तत्र पुरैर्हेमार्कसंनिभैः॥
वायोः पूर्वेण गान्धर्वी हैमी चित्ररथस्य तु।
गन्धर्वराजमुख्यस्य दिव्यगन्धर्वनादिता॥
आस्ते भगवती साक्षात् सप्तस्वरविभूषणा।
ग्रामत्रयपरीधाना जातिमेखलमण्डिता॥
मूर्छनातानचित्राङ्गी नानातानकलोदया।
लक्षणव्यञ्जनोपेता मध्यमेनावगुण्ठिता॥
गन्धर्वैर्गीयमाना सा तत्र देवी सरस्वती।
तस्याः पूर्वेण चित्रा वै तुम्बुरोर्नारदस्य च॥
सोमस्य पश्चात्प्रमदा गुह्यकानां प्रकीर्तिता[1]॥
पूर्वेण वै तु सोमस्य नाम्ना चित्रवती पुरी।
सर्वधातुमयी चित्रा कुबेरस्य महात्मनः॥
षड्विंशतिसहस्रैस्तु कोटीनां परिवारितः।
यक्षाणामुत्तमः श्रीमानास्ते भोगैरनुत्तमैः॥

---

१ गुह्यकानां पुरी स्मृतेति स्वच्छन्दपाठः।

तस्याः पूर्वे शुभा नाम्ना जाम्बूनदमयी पुरी ।
तत्र वै कर्मदेवास्तु देवत्वं कर्मणा गताः ॥
पश्चिमेनेशराजस्य विष्णोर्वै श्रीमती पुरी ।
तत्रास्ते श्रीपतिः श्रीमानतसीपुष्पसंनिभः ।
शङ्खचक्रगदापाणिः पीतवासा जनार्दनः ॥
ईशस्य दक्षिणे भागे नाम्ना पद्मावती पुरी ॥
महापद्मोपविष्टस्य पद्ममालाधरस्य तु ।
पद्मपत्रायताक्षस्य ब्रह्मणः पद्मजन्मनः ।
तस्या दक्षिणतो देवि नाम्ना कामसुखा पुरी ॥
अश्विनौ तत्र देवेशि तथा धन्वन्तरिः स्मृतः ।
उत्तरे त्वमरावत्या महामेघेति विश्रुता ॥
विनायकानां सा दिव्या वसतिस्तत्र कल्पिता ।'
(स्व० १०। १४६–१६१)

इति च ॥ ५६ ॥

एतच्च पुण्यकर्मणां भोगस्थानमित्याह

इष्टापूर्तरताः पुण्ये
वर्षे ये भारते नराः ॥ ५७ ॥
ते मेरुगाः सकृच्छम्भुं
ये वार्चन्ति यथोचितम् ।

'पुण्य' इति वर्षान्तरेभ्यो वैलक्षण्यं कटाक्षितम् । यथोचितमिति, पौराणिक्या प्रक्रिययेत्यर्थः । तदुक्तम्

'इष्टापूर्तरता देवि ये नराः पुण्यभारते ।
त्र्यम्बकं सकृदर्चन्ति मेरुं गच्छन्ति ते नराः ।।'
(स्व० १० । १६९)

इति ॥ ५७ ॥

इदानीं मेर्वधो वर्षादि विभक्तुमुपक्रमते

मेरोः प्रदक्षिणाप्योद-
ग्दिक्षु विष्कम्भपर्वताः ॥ ५८ ॥
मन्दरो गन्धमादश्च
विपुलोऽथ सुपार्श्वकः ।
सितपीतनीलरक्ता-
स्ते क्रमात्पादपर्वताः ॥ ५९ ॥

विष्कम्भेति, भुवोऽवष्टम्भकत्वात् ॥ ५९ ॥

तदाह

एतैर्भुवमवष्टभ्य
मेरुस्तिष्ठति निश्चलः ।

एषां च पृथङ्मानस्यानुक्तत्वात् वक्ष्यमाणेला-वृताख्यवर्षैकदेशत्वमवगन्तव्यं, तच्च मेर्वासन्नमन्य-थैषां पादपर्वतत्वं न स्यात् ॥

एषु च चतुर्ष्वपि अचलेषु प्रत्येकमुद्यानसरः-कल्पवृक्षाः संभवन्ति, इत्याह

चैत्ररथनन्दनाख्ये
वैभ्राजं पितृवनं वनान्याहुः ॥९०॥
रक्तोदमानससितं
भद्रं चैतच्चतुष्टयं सरसाम् ।
वृक्षाः कदम्बजम्ब्व-
श्वत्थन्यग्रोधकाः क्रमशः ॥ ९१ ॥
एषु च चतुर्ष्वचलेषु
त्रयं त्रयं क्रमश एतदाम्नातम् ।

अत्र च जम्बूरसोत्था जम्बुनदी संभवतीति शेषः।

तदुक्तम्

'कदम्बो मन्दरे ज्ञेयो जम्बूर्वै गन्धमादने ।
अश्वत्थो विपुले ज्ञेयो न्यग्रोधश्च सुपार्श्वके ॥
सरांस्युपवनान्यत्र अरुणोदं तु पूर्वतः ।
मानसं दक्षिणे ज्ञेयं सितोदं पश्चिमेन तु ॥
महाभद्रमुत्तरतस्ततश्चैत्ररथं वनम् ।
नन्दनं तु सवैभ्राजं पितृसंज्ञं क्रमात्स्थितम् ॥'

इति ।

'तत्प्रमाणा स्मृता जम्बूर्गन्धमादनमूर्धनि ।
तस्याः फलसमूहोत्थो रसो ज्ञेयोऽमृतोपमः ॥

तेन जम्बूनदी जाता प्रिये वेगवती भृशम् ।
मेरुं प्रदक्षिणीकृत्य जम्बूमूलं विशेत्स्वकम् ॥
तत्संपर्कात् समुत्पन्नं कनकं देवभूषणम् ।
तेन जाम्बूनदं लोके जायते भूषणोत्तमम् ॥'(स्व० १०।१९१)

इति ॥ ६१ ॥

मेर्वधो लवणाब्ध्यन्तं
जम्बुद्वीपः समन्ततः ॥ ६२ ॥
लक्षमात्रः स नवधा
जातो मर्यादपर्वतैः ।

समन्तत इति, वलयाकारत्वेन । तदुक्तम्

'मेर्वधो वलयाकारो जम्बुद्वीपो व्यवस्थितः ।
लक्षयोजनविस्तारः..... ॥'

इति ॥ ६२ ॥

नवधा जातत्वमेव अस्य दर्शयति

निषधो हेमकूटश्च
हिमवान्दक्षिणो त्रयः ॥ ६३ ॥
लक्षं सहस्रनवति-
स्तदशीतिरिति क्रमात् ।
नीलः श्वेतस्त्रिशृङ्गश्च
तावन्तः सव्यतः पुनः ॥ ६४ ॥

मेरोः षडेते मर्यादा-
चलाः पूर्वापरायताः ।
पूर्वतो माल्यवान्पश्चाद्-
गन्धमादनसंज्ञितः ॥ ६५ ॥

सव्योत्तरायतौ तौ तु
चतुस्त्रिंशत्सहस्रकौ ।
अष्टावेते ततोऽप्यन्यौ
द्वौ द्वौ पूर्वादिषु क्रमात् ॥ ६६ ॥

जाठरः कूटहिमव-
द्यात्रजारुधिशृङ्गिणाः ।
एवं स्थितो विभागोऽत्र
वर्षसिद्ध्यै निरूप्यते ॥ ६७ ॥

'दक्षिणत' इति पूर्वाभिमुखस्य मेरोः । लक्षमिति, जम्बुद्वीपस्य तावत्परिमाणत्वात् । एवं सकलद्वीपायतत्वेऽपि एषां बहिर्यथायथं तद्वर्तुलतानुपाततो हेमकूटहिमवतोरायाममानह्रासः, विस्तरस्त्वेषामविशिष्ट एव । यदुक्तम्

'लवणोदधिपर्यन्ताः सहस्रद्वयविस्तृताः ।' (स्व० १०।२०१)

इति । 'तावन्त' इति लक्षादिमानाः । चतुस्त्रिंशत्सहस्रकाविति, नीलनिषधाभ्यां सीमन्तित्वेनैवंमानस्येलावृतस्य वक्ष्यमाणत्वात्, विस्तरतस्तु सहस्रम् । यदुक्तम्

'पूर्वेण माल्यवान्मेरोः पर्वतस्तु विराजते ।
चतुस्त्रिंशत्सहस्राणि योजनानां सुरेश्वरि ॥
याम्योत्तरायतो भाति सहस्रं तस्य विस्तृतिः ।
तथैवापरदिग्भागे तत्तुल्यो गन्धमादनः॥' (स्व० १०।२०४)

इति । अत्र च नीलनिषधमाल्यवद्गन्धमादनाख्यानां चतुर्णां पर्वतानां चत्वारिंशत्सहस्राणि योजनानामुत्सेधोऽन्येषां तु दश,-इति ज्ञेयम् । यदुक्तम्

'नीलश्च निषधश्चैव माल्यवान् गन्धमादनः ।
चत्वारिंशत्सहस्राणि योजनानां समुच्छ्रितः ॥'
(स्व० १०।२०५)

इति । तथा श्रीमृगेन्द्रोत्तरे

.... 'दशोत्सेधा नवान्तराः ।'

इति । एवं दक्षिणोत्तरस्थैस्त्रिभिस्त्रिभिः, पूर्वपश्चात्स्थेन चैकैकेन,-इत्यष्टभिः पर्वतैर्विभक्तो जम्बूद्वीपो नवधा जातः । 'तत' इत्यष्टाभ्यः । 'कूटो' हेमकूटः ।

हिमवानर्थात् सकैलासः । 'यात्रः' पारियात्रः, स च अर्थान्निषधयुक्तः । तदुक्तम्

'जठरो हेमकूटश्च पूर्वभागे व्यवस्थितौ ।
कैलासो हिमवांश्चैव दक्षभागे व्यवस्थितौ ॥
निषधः पारियात्रश्च अपरेण महीधरौ ।
जारुधिः शृङ्गवांश्चैव उत्तरेण व्यवस्थितौ ॥'
(स्व० १० । २०८)

इति । एते च विष्कम्भपर्वता नियतदेशस्थाः,— इति नात्र विभागान्तरनिमित्तं विभागो नवखण्डात्मा ॥ ॥ ६७ ॥

तदेवाह

समन्ताच्चक्रवाटाधोऽ-
नर्केन्दु चतुरश्रकम् ।
सहस्रनवविस्तीर्ण-
मिलाख्यं त्रिमुखायुषम् ॥ ६८ ॥
मेरोः पश्चिमतो गन्ध-
मादो यस्तस्य पश्चिमे ।
केतुमालं कुलाद्रीणां
सप्तकेन विभूषितम् ॥ ६९ ॥

मेरोः पूर्वं माल्यवान्यो
भद्राश्वस्तस्य पूर्वतः ।
सहस्रदशकायुस्त-
त्सपञ्चकुलपर्वतम् ॥ ७० ॥
पूर्वपश्चिमतः सव्यो-
त्तरतश्च क्रमादिमे ।
द्वात्रिंशच्च चतुस्त्रिंश-
त्सहस्राणि निरूपिते ॥ ७१ ॥
मेरोरुदक् शृङ्गवान्य-
स्तद्बहिः कुरुवर्षकम् ।
चापवन्नवसाहस्र-
मायुस्तत्र त्रयोदश ॥ ७२ ॥
कुरुवर्षस्योत्तरेऽथ
वायव्येऽब्धौ क्रमाच्छराः ।
दश चेति सहस्राणि
द्वीपौ चन्द्रोऽथ भद्रकः ॥ ७३ ॥
यौ श्वेतशृङ्गिणौ मेरो-
र्वामे मध्ये हिरण्मयम् ।

तयोर्नवकविस्तीर्ण-
मायुश्चार्धत्रयोदश ॥ ७४ ॥
तत्र वै वामतः श्वेत-
नीलयो रम्यकोऽन्तरे ।
सहस्रनवविस्तीर्ण-
मायुर्द्वादश तानि च ॥ ७५ ॥
मेरोर्दक्षिणतो हेम-
निषधौ यौ तदन्तरे ।
हर्याख्यं नवसाहस्रं
तत्सहस्राधिकायुषम् ॥ ७६ ॥
तत्रैव दक्षिणे हेम-
हिमवद्द्वितयान्तरे ।
कैन्नरं नवसाहस्रं
तत्सहस्राधिकायुषम् ॥ ७७ ॥
तत्रैव दक्षिणे मेरो-
र्हिमवान्यस्य दक्षिणे ।

---

१ क० पु० आयुषा द्वादशैव तु इति पाठः ।

भारतं नवसाहस्रं
चापवत्कर्मभोगभूः ॥ ७८ ॥

'इलाख्यम्' इति इलावृताख्यस्वाम्यधिष्ठितत्वात् इलावृताभिधानं वर्षमित्यर्थः । एतच्च पुरस्तादेव स्फुटीभविष्यति,—इति नेहायस्तम् । एवं वर्षान्तरेष्वपि तदभिधानप्रवृत्तौ निमित्तं ज्ञेयम् । तच्च समन्तान्मेरोश्चतुर्दिक्कं नवसहस्रं विस्तीर्णमिति । मध्ये मेरुमूलीयानि षोडश सहस्राण्याकलय्य चतुस्त्रिंशत्सहस्रम्, अत एव माल्यवद्गन्धमादनयोर्दैर्घ्यादियदेव मानमुक्तम्, अत एव सर्वतोदिक्कं साम्याच्चतुरश्रं न तु वर्षान्तरवदायतचतुरश्रम् । अनर्केन्दुत्वे चक्रवाटाधोवर्तित्वं हेतुः । 'त्रिमुखायुषम्' इति सहस्रशब्दसंनिधेस्त्रयोदशसहस्रायुरित्यर्थः । यदुक्तम्

'मेरोः समन्ततो रम्यमिलावृतमुदाहृतम् ।
अधस्ताच्चक्रवाटस्य नवसाहस्रविस्तृतम् ॥
योजनानां चतुर्दिक्षु चतुरश्रं समन्ततः ।
नातपो भानुजस्तत्र न च सोमस्य रश्मयः ॥
प्रभवन्ति हि लोकानां मेरोर्भासा प्रभासितम् ।'
(स्व० १० । २११)

इति ।

'त्रयोदशाब्दसाहस्रमायुस्तेषां प्रकीर्तितम् ।'
(स्व० १० । २१३)

इति च । पश्चिमत इति, नतु दक्षिणतोऽवस्थितो विष्कम्भपर्वतः । सप्तकेनेति, यदुक्तम्

'जयन्तो वर्धमानश्च अशोको हरिपर्वतः ।
विशालः कम्बलः कृष्णस्तत्र सप्त कुलाद्रयः ॥'
(स्व० १० । २१८)

इति । सहस्रदशकायुरिति, केतुमालशेषतयापि व्याख्येयम् । उक्तं हि

'.....जीवन्त्ययुतमेव च ।'

इति । सपञ्चकुलपर्वतमिति, यदुक्तम्

'कौरङ्गः श्वेतपर्णश्च नीलो मालाग्रकस्तथा ।
पद्मश्चैव समाख्यातास्तत्र पञ्च कुलाद्रयः ॥ ' (स्व० १० । २२०)

इति । 'इमे' इति केतुमालभद्राश्वाख्ये वर्ष । 'क्रमात्' इति यथासंख्येन । तेन पूर्वपश्चिमतो भद्राश्वकेतुमाले द्वात्रिंशद्द्वात्रिंशत्सहस्राणि, माल्यवान् गन्धमादनश्चैकमेकं सहस्रम् , उभयपार्श्वाभ्यामिलावृतमष्टादश, मेरुः षोडश,—इत्येवं पूर्वाप-

रायतजम्बुद्वीपं योजनानां लक्षं, सव्योत्तरतश्च चतुस्त्रिंशत्, इत्येतदिलावृतमाननिरूपणादेव गतार्थम्[1] । शृङ्गवाँस्तृतीयः पर्वतः, 'तद्बहिः' तस्यापि उदगित्यर्थः । 'चापवत्' इति वलयाकारं, क्षाराब्धिसामीप्यात् । यदुक्तम्

'नवयोजनसाहस्रं धन्वाकारं प्रकीर्तितम् ।' (स्व१० । २२५)

इति । आयाममानावचने चात्रायमाशयः—यत् शृङ्गवन्माननिरूपणादेव गतार्थमेतत्—इति । एवमुत्तरत्रापि ज्ञेयम् । त्रयोदशेति, अर्थात् सहस्राणि । यदुक्तम्

'त्रिदशाब्दसहस्रायुः कुरुवृक्षफलाशनः ।
युग्मप्रसूतिः कुरुषु श्यामापुष्पद्युतिर्जनः ॥'

इति । 'अब्धौ' इति अब्धिमध्ये । तदुक्तम्

'तस्य चोत्तरदिग्भागे प्रविश्य लवणोदधिम्[2] ।
योजनानां सहस्राणि चत्वार्येव वरानने ॥
एकाधिकानि विस्तीर्णं चन्द्रद्वीपं प्रकीर्तितम् ।
दशयोजनसाहस्रं द्वीपं भद्रं प्रकीर्तितम् ॥' (स्व० २० । २२९)

---

१ ग० यु० अवगतार्थं, शृङ्गी यस्तृतीय इति पाठः ।

२ श्रीस्वच्छन्दे तु, लवणोदधिमित्यस्यानन्तरं
'पञ्चयोजनसाहस्रं चन्द्रद्वीपं प्रकीर्तितम् ॥
तथा वायव्यदिग्भागे प्रविश्य लवणोदधिम् ।' इत्यधिकः पाठः ।

इति । 'तयोः' इति मेरुवामार्धस्थितयोः श्वेत-शृङ्गिणोः । तेन शृङ्गवतो दक्षिणे, श्वेतस्य वामे,—इत्यर्थसिद्धम् । 'अर्धत्रयोदश' इति अर्धेन त्रयोदश द्वादशसहस्राणि सार्धानीति यावत् । यदुक्तम्

'अध्यर्धानि सहस्राणि द्वादशायुर्हिरण्मये ।'

इति । 'अन्तरे' इत्यर्थात् श्वेतस्य दक्षिणे, नीलस्य तु वामे । तानीति, सहस्राणि । 'तदन्तरे' इत्यर्थात् निषधस्य दक्षिणे, हेमकूटस्य वामे । तदुक्तम्

'हेमकूटस्य सौम्येन निषधस्य च दक्षिणे ।
हरिवर्षं समाख्यातं.....॥ (स्व० १० । २३६)

इति । द्वादशेति, सहस्राणि । 'कैन्नरम्' इति किंपुरुषसंज्ञम् । यदुक्तम्

'हेमकूटस्य याम्येन हिमवतस्तथोत्तरे ।
वर्षं किंपुरुषं नाम .... ॥' (स्व० १० । २३८)

इति । 'तत्सहस्राधिकायुषम्' इति तेभ्यो नवसहस्रेभ्यः सहस्रेणाधिकमायुर्यत्र तद्दशसहस्रायुरित्यर्थः । अस्य 'दक्षिणे' इत्यर्थात् क्षाराब्धेरुत्तरे । तदुक्तम्

'याम्ये हिमाचलेन्द्रस्य उत्तरे लवणोदधेः ।
भारतं नाम वर्षं तु तत्र चाल्पं सुखं स्मृतम्'॥ (स्व० १० । २४०)

इति । अत एव लवणोदधेर्वलयाकारत्वात् चापवदित्युक्तम् । अस्य च वर्षान्तरवद्भोगभूमित्वेऽपि कर्मभूमित्वमपि अस्तीत्याह 'कर्मभूः' इति । यदुक्तम्

'गुणस्त्वेकः स्थितस्तत्र शुभाशुभफलार्जनम् ।'(स्व०१०।२४६)

इति ॥ ७८ ॥

वर्षान्तराणां हि भोगभूमित्वमेवास्ति, नतु कर्मभूमित्वमपि,–इत्याह

इलावृतं केतुभद्रं
कुरुहैरण्यरम्यकम् ।
हरिकिन्नरवर्षे च
भोगभूर्न तु कर्मभूः ॥७९॥

ननु क्वचिद्भोगभूमावपि कर्मभूमित्वं संभवेत्, यदुक्तं प्राक्

'ते तु तत्रापि देवेशं भक्त्या चेत्पर्युपासते ।
तदीशतत्त्वे लीयन्ते क्रमाच्च परमे शिवे ॥
अन्यथा ये तु वर्तन्ते तद्भोगनिरतात्मकाः ।
ते कालवह्निसंतापदीनाक्रन्दपरायणाः ॥
गुणतत्त्वे निलीयन्ते ततः सृष्टिमुखे पुनः ।
पात्यन्ते मातृभिर्घोरयातनौघपुरस्सरम् ॥'

इति, तत् कथमेतदुक्तं यद्भारतात् अन्यद्भोगभूरेव ? इत्याशङ्क्याह

अत्र बाहुल्यतः कर्म-
भूभावोऽत्राप्यकर्मणाम् ।
पशूनां कर्मसंस्कारः
स्यात्तादृग्दृढसंस्कृतेः ॥ ८० ॥

'कर्मभूभावः' कर्मभूमित्वमित्यर्थः । नन्वत्र भूम्नापि कर्मभूमित्वं नास्ति, यत् तिर्यगादयः प्राक्कर्मोपभोगमेव अत्र विदधति न त्वभिनवकर्मार्जनमपि,-इत्याशङ्क्याह 'अत्रापि' इति । अपिर्भिन्नक्रमः । तेनाकर्मणामपीति योज्यम् । अकर्मत्वं चैषामन्यवत्प्रतीतिवृत्तेनायोग्यत्वात् वस्तुवृत्तेन पुनस्तत्तद्वासनादाढर्यादस्त्येव एषां कर्मसंस्कारः, तदेषामपि तत्कार्यं शुभाशुभं भवेदेवेति भावः ॥ ८० ॥

नन्वेवमप्यत्र कर्मभूमित्वं न सिद्ध्येत्, अन्यत्र च भोगभूमित्वं, यदत्र केषामपि कर्म न स्यादन्यत्र च स्यात्,-इत्याशङ्क्याह

---

१ क० पु० यावद्भारतादिति पाठः ।

संभवन्त्यप्यसंस्कारा
भारतेऽन्यत्र चापि हि ।
दृढ़प्राक्तनसंस्कारा-
दीशेच्छातः शुभाशुभम् ॥८१॥
स्थानान्तरेऽपि कर्मास्ति
दृष्टं तच्च पुरातने ।
तत्र त्रेता सदा कालो
भारते तु चतुर्युगम् ॥८२॥

'असंस्कारा' इति कर्मणः संन्यस्तत्वात् । 'अन्यत्र स्थानान्तरे' इति स्वर्गादिस्थानमध्ये इत्यर्थः । एकोऽपिशब्दो भिन्नक्रमः, तेन शुभाशुभमपीति योज्यम् । नन्वत्र किं प्रमाणम् ? इत्याशङ्क्योक्तं 'दृष्टं तच्च पुरातने' इति । 'पुरातन' इति भारत-रामायणाद्यात्मनि पुराणादौ । तत्र हि जनकस्य भारतवर्षेऽपि अकर्मित्वं, नहुषस्य स्वर्गेऽपि अशुभ-कर्मयोगित्वमुक्तम्; अतश्च युक्तमुक्तं – यद्भारते भूम्ना कर्मभूमित्वम् अन्यत्र च भोगभूमित्वमिति । तत्रेति, इलावृतादौ । तदुक्तम्

'नाष्टासु विद्यते काचिद्युगत्रयवती स्थितिः ।
चतुर्युगवती ज्ञेया भारताख्ये वरानने ॥' (स्व० १०।२४७)

इति ॥ ८२ ॥

भारतमपि वर्षं जम्बुद्वीपवन्नवखण्डमेव,—इत्याह

भारते नवखण्डं च
सामुद्रेणाम्भसात्र च ।
स्थलं पञ्चशती तद्व-
ज्जलं चेति विभज्यते ॥ ८३ ॥

सामुद्रेणाम्भसेति, अर्थादष्टधा प्रसृतेन, तथात्वेनैव नवधात्वस्य संपत्तेः । यथाहि जम्बुद्वीपः पर्वतैरष्टभिर्विभक्तो नवधा जातः, तथैतदपि समुद्रैः, किंतु एते पूर्वापरायता एव सर्वे इति । तदुक्तम्

'नव भेदाः स्मृतास्तत्र सागरान्तरिताः प्रिये ।
एकैकस्य तु द्वीपस्य सहस्रं परिकीर्तितम् ॥
शतानि पञ्च विज्ञेयं स्थलं पञ्च जलं तथा ।
(स्व० १० । २५१)

इति । यत्तु श्रीमृगेन्द्रे

'नवाब्धिस्रोतसि द्वीपा नवैवात्रार्धकस्थले ।'

इत्याद्युक्तं तत् क्षाराब्ध्यपेक्षया, अन्यथात्र दशाब्धिस्रोतांसि स्युः । अतश्च सर्वेषां द्वीपानां

पार्श्वद्वयेऽपि सामुद्रमम्भः कन्याख्यस्य तु दक्षिण एव, वारुणेनैव पञ्चशतिकेन समुद्रेणास्य विभक्तत्वात् । तेनास्य वामतो हिमवानेव न तु समुद्रान्तरे, तथात्वे हि समुद्रान्तरितत्वात् द्वीपान्तरवत् तन्निवासिनामपि हिमवानगम्यः स्यात्; अतश्च हिमवत्संनिकर्षेणैव एतन्मितमिति सिद्धम् । तदुक्तं तत्र

'द्वीपं कुमारिकाख्यं तु हिमवन्निकटे मतम् ।'

इति । एवं चास्य सहस्रमपि योजनानां स्थलैकरूपत्वमेव,— इत्यर्थलभ्यम् । अत एवास्य श्रीतन्त्रराजभट्टारकादौ हिमवत्सकाशात् सीमान्तविभागं दर्शयितुं तत्पादावस्थिताद्विन्दुसरोनाम्नः सरोविशेषादारभ्य सहस्रयोजनपरिमाणत्वेन निर्देशः कृतः । तदुक्तं तत्र

'प्रालेयरोधसो याम्ये सौम्ये वै वीचिमालिनः ।
कार्मुकाकारसंस्थानं वर्षं तत्कुरुमानगम् ॥'

इत्युपक्रम्य

'शीतसानोः समाश्लिष्टं नाम्ना बिन्दुसरः सरः ।
तदारभ्य खण्डमेकं सर्वतः सज्जनाकुलम् ॥

वारिलुप्तं न यन्मानं दुहित्रे तद्ददौ भुवः ।
कुमार्यै भरतो राजा सपत्नेन्दुनभोग्रहः ॥
द्वीपं कुमारिकासंज्ञमतो ह्येतत्प्रगीयते ।
योजनानां सहस्रं तु नानावर्णाश्रमान्वितम् ॥'

इति । श्रीस्वच्छन्देऽपि

' बिन्दुसरःप्रभृत्येव कुमार्याह्वं प्रकीर्तितम् ।
योजनानां सहस्रं तु नानावर्णाश्रमान्वितम् ॥'
(स्व० १० । २५४)

इति ॥ ८३ ॥

एषां च नवानामपि खण्डानां नामविभागमाह

इन्द्रः कशेरुस्ताम्राभो
नागीयः प्राग्गभस्तिमान् ।
सौम्यगान्धर्ववाराहाः
कन्याख्यं चासमुद्रतः ॥ ८४ ॥

'आसमुद्रत' इति समुद्रादारभ्य, तेन क्षाराब्धिनिकटे इन्द्रद्वीपं यावत्पर्यन्ते हिमवन्निकटे कन्याद्वीपम् । 'ताम्राभं' इति ताम्रवर्णः । प्रागिति, गभस्तिमान् आदौ पश्चान्नागीयः । 'वाराहो' वारुणः । तदुक्तम्

'इन्द्रद्वीपं कशेरुं च ताम्रवर्णं गभस्तिमत् ।
नागद्वीपं च सौम्यं च गान्धर्वं वारुणं तथा ॥
द्वीपं कुमारिकाख्यं च नवमं परिकीर्तितम् ।' (स्व० १० । २५३)

इति ॥ ८४ ॥

कन्याद्वीपे च नवमे
दक्षिणेनाब्धिमध्यगाः ।
उपद्वीपाः षट् कुलाद्रि-
सप्तकेन विभूषिते ॥ ८५ ॥
अङ्गयवमलयशङ्कुः
कुमुदवराहौ च मलयगोऽगस्त्य
तत्रैव च त्रिकूटे
लङ्का षडमी ह्युपद्वीपाः ॥ ८६ ॥

दक्षिणेनाब्धिमध्यगा इति, वारुणोदधेर्मध्यस्था इत्यर्थः । तदुक्तम्

'कुमार्याख्यस्य निकटे मध्यस्था वारुणोदधेः ।
अतीत्य योजनशतमनुद्वीपाश्च षट् स्मृताः ॥
अङ्गद्वीपो यवद्वीपो मलयद्वीप एव च ।
द्वीपोऽन्यः शङ्कुसंज्ञश्च कुमुदश्च ततोऽन्यतः ॥
वराहश्चैव षष्ठः स्यात् ... ... ।'

इति । कुलाद्रिसप्तकेनेति, यदुक्तम्

'महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः ।
विन्ध्यश्च पारियात्रश्च भान्त्येते कुलपर्वताः ॥' (स्व०१०।२५७)

इति । मलयगोऽगस्त्य इति, तदुक्तम्

'कथितो मलयद्वीपे मलयो नाम पर्वतः ।
तस्य पादे त्रिकूटो वै लङ्का तस्योपरिस्थिता ॥' (स्व० १०।२५९)

इति ।

'अगस्त्यशिखरं तत्र मलये भूधरोत्तमे ।
तत्राश्रमो महापुण्य आगस्त्यः स्फटिकप्रभः ॥' (स्व० १०।२६२)

इति च ॥ ८६ ॥

अत्र च कीदृग्लोकः ? इत्याशङ्क्याह

द्वीपोपद्वीपगाः प्रायो
म्लेच्छा नानाविधा जनाः ।
मुक्ताकाञ्चनरत्नाढ्या
इति श्रीरुरुशासने ॥ ८७ ॥

'म्लेच्छा' इति वर्णाश्रमाचारबहिष्कृता इत्यर्थः । प्रायःशब्देन च क्वचित्सदाचारा अपि संभवन्तीत्युक्तम् । नन्वत्र किं प्रमाणमित्याशङ्क्योक्तम् 'इति श्रीरुरुशासने' इति । तदुक्तं तत्र

युक्ता वर्णाश्रमाचारैः कुमार्याख्ये परं प्रजाः ।
इतरे म्लेच्छभूयिष्ठाः प्रभूतमणिकाञ्चनाः ॥'

इति ॥ ८७ ॥

नन्वेवमत्र शुभाशुभार्जनेन कोऽर्थः ? इत्याशङ्क्याह

भारते यत्कृतं कर्म
क्षपितं वाप्यवीचितः ।
शिवान्तं तेन मुक्तिर्वा
कन्याख्ये तु विशेषतः ॥ ८८ ॥

'कर्म' इति शुभाशुभम् । क्षपितमिति, क्रियाज्ञानादिना । तेनात्र कर्मणा कृतेन क्षपितेन वा पृथिव्यादिषु शिवान्तेषु तेषु तेषु तत्त्वेषु भुक्तिस्ततो वा मुक्तिर्भवेदित्यर्थः । यदुक्तम्

'तत्रैव यत्कृतं कर्म शुभं वा यदि वाशुभम् ।
वसन्ति तेन लोकाश्च शिवाद्यावीचिमध्यगाः ॥'
(स्व० १० । २४८)

इति । तथा

'कन्याख्ये यत्कृतं कर्म जन्तुभिस्तु सितासितम् ।
स्वर्नारकापवर्गेषु तद्बीजं फलभोगदम् ॥'

इति ॥ ८८ ॥

नन्वेतत् कन्याद्वीपे विशेषेण भवेत्,— इत्यत्र किं निमित्तम् ? इत्याशङ्क्याह

महाकालादिका रुद्र-
कोटिरत्रैव भारते ।
गङ्गादिपञ्चशतिका
जन्म तेनात्र दुर्लभम् ॥ ८६ ॥

अत्रैवेति कन्याख्ये द्वीपे । यदुक्तम्

'तत्र मध्ये महद्द्वीपं कुमारीद्वीपसंज्ञितम् ।
तत्र रुद्रायुतं पूर्णमवतीर्णं शुभंकरम् ॥
पशूनां हेतुभूतं च स्मरणात्पापनाशनम् ।'

इति । तथा

'महाकालस्तथैकाम्रमेवमादि वरानने ।
तीर्थानां कोटिरुद्दिष्टा महाकामफलोदया ॥
गङ्गादीनां नदीनां च तत्र पञ्च शतानि च ।'
(स्व० १०। २४९)

इति । तेन तीर्थभूयिष्ठत्वादिनेति ॥ ८९ ॥

ननु वर्षान्तरेषु

'प्रत्यग्राम्बुजपत्राभा जनाश्चातीव कोमलाः ।
जम्बूफलरसाहारा जरामृत्युविवर्जिताः ॥'
(स्व० १०। २१३)

इत्याद्युक्तया सुखभूयिष्ठा जनाः, इह च

'जना रोगभयग्रस्ता दुःखिता मन्दसंपदः ।'(स्व० १०।२४०)

---

१ स्वच्छन्दतन्त्रान्तर्गतेनैतेन प्रमाणपद्येन ज्ञायते यदिदं श्रीश्रीकण्ठी-संहितोक्तम् ।

इत्याद्युक्त्या दुःखभूयिष्ठाः,—इत्यत्र 'जन्म दुर्लभम्' इति केन निमित्तेनोक्तम् ? इत्याशङ्क्याह

अन्यवर्षेषु पशुवद्
भोगात्कर्मातिवाहनम् ।
प्राप्यं मनोरथातीत-
मपि भारतजन्मनाम् ॥ ९० ॥

मनोरथातीतमिति , भोगापवर्गादेर्महीयस्त्वात् ॥ ९० ॥

नन्वेवं चेदविशेषेण भारतजन्मनां सिद्ध्येत् तत् 'कन्याख्ये तु विशेषत' इति कस्मादुक्तम् ? इत्याशङ्क्याह

नानावर्णाश्रमाचार-
सुखदुःखविचित्रता ।
कन्याद्वीपे यतस्तेन
कर्मभूः सेयमुत्तमा ॥ ९१ ॥

यदुक्तम्

'ये पूर्वोक्ता गुणा लोके भारते वरवर्णिनि ।
ते तत्रैव स्थिता लोके कुमारीसंज्ञके प्रिये ॥' (स्व० १०। २५५)

इति । अतश्च एतन्निवासिनामेव शुभाशुभकर्मानुष्ठानात् स्वर्निरयावाप्तिः स्यात् ॥ ९१ ॥

तदाह

पुंसां सितासितान्यत्र
कुर्वतां किल सिद्धयतः ।
परापरौ स्वर्निरया-
विति रौरववार्तिके ॥ ९२ ॥

किमत्र प्रमाणमित्युक्तं 'रौरववार्तिके' इति । तदुक्तं तत्र

'पुंसां सितानि कर्माणि कुर्वतामसितानि च ।
सिद्धयतः स्वर्गनिरयावत्र क्षिप्रं परापरौ ॥'

इति ॥ ९२ ॥

एतदेव उपसंहरति

एवं मेरोरधो जम्बू-
रभितो यः स विस्तरात् ।
स्यात् सप्तदशधा खण्डै-
र्नवभिस्तु समासतः ॥९३॥

सप्तदशधेति, इलावृताद्यान्यष्टौ, इन्द्रद्वीपादीनि च नवेति । नवभिरिति, भारतेन सहेलावृताद्यैः ॥९३॥

नन्वेवं-खण्डत्वेऽस्य किं निमित्तम्? इत्याशङ्क्याह

मनोः स्वायंभुवस्यासन्
सुता दश ततस्त्रयः ।
प्राव्रजन्नथ जम्ब्वाख्ये
राजा योऽग्नीध्रनामकः ॥ ९४ ॥

तस्याभवन्नव सुता-
स्ततोऽयं नवखण्डकः ।
नाभिर्यो नवमस्तस्य
नप्ता भरत आर्षभिः ॥ ९५ ॥

तस्याष्टौ तनयाः साकं
कन्यया नवमोंऽशकः ।
भुक्तैस्तैर्नवधा तस्मा-
च्छत्तयोजनमात्रकात् ॥ ९६ ॥

'सुता' इति पौत्राः । जम्ब्वाख्ये राजेति, अर्थात् एतन्मध्यात् । ऋषभस्यापत्यमार्षभिः, अत एव नप्ते-त्युक्तम् । अष्टौ तनया इति, प्रागुक्ता इन्द्राद्याः । तदुक्तम्

'स्वायंभुवो मनुर्नाम तस्य पुत्रः प्रियव्रतः ।
तस्याथ दश पुत्रा वै जाता वीर्यबलोत्कटाः ॥
अग्नीध्रश्चाग्निबाहुश्च मेधा मेधातिथिर्वपुः ।
ज्योतिष्मान्द्युतिमान् हव्यः सावनः सत्र एव च ॥
मेधा सत्रोऽग्निबाहुश्च एते प्रव्रजिताश्चयः ।
सप्तद्वीपेषु ये शेषा अभिषिक्ता महाबलाः ॥
जम्बुद्वीपे तथाग्नीध्रस्तस्य पुत्रा नव स्मृताः ।
नाभिः किंपुरुषश्चैव हरिश्चैव इलावृतः ॥
भद्राश्वः केतुमालश्च रम्यकश्च हिरण्मयः ।
नवमस्तु कुरुर्नाम नववर्षाधिपाः स्मृताः ॥
अग्नीध्रतस्तु जाता वै शूराश्चातिबलोत्कटाः ।
तेषां नामाङ्कितानीह नव वर्षाणि पार्वति ॥
नाभेः पुत्रो महावीर्य ऋषभो धर्मतत्परः ।
तस्यापि हि सुतो ज्ञेयो भरतस्तु प्रतापवान् ॥
तन्नाम्नैव तु विज्ञेयं भारतं वर्षमुत्तमम् ।
तस्याप्यष्टौ पुनः पुत्रा जाताः कन्यापरा प्रिये ॥
भारते त्वष्टद्वीपेऽत्र अष्टौ पुत्रा निवेशिताः ।
नवमस्तु कुमार्याह्वः कन्यायाः प्रतिपादितः ॥
तेषां नाम्ना तु ते द्वीपा भरतेन प्रकीर्तिताः ॥'

(स्व० १० । २८३)

इति । तस्मादिति, जम्बुद्वीपात् लक्षयोजनमात्रकादिति । तत्रास्य पूर्वपश्चिमतो लक्षयोजनत्वं प्राक् प्रदर्शितं, दक्षिणोत्तरतस्तु इदानीमुच्यते । तत्र भारतादीनि षड्वर्षाणि प्रत्येकं नवसाहस्राणि,—

इति चतुष्पञ्चाशत्, हिमवदादयश्च प्रत्येकं द्विसाहस्रा,—इति द्वादश, मेरुमूलीयसहस्रषोडशकेन सह इलावृतं चतुस्त्रिंशत् सहस्राणि,—इत्येवं योजनानां लक्षं जम्बुद्वीपम् ॥ ९६ ॥

इदानीं तद्बहिरपि संस्थानविशेषं दर्शयति

लक्षैकमात्रो लवणा-
स्तद्बाह्येऽस्य पुरोऽब्धयः ।
ऋषभो दुन्दुभिर्धूम्रः[1]
कङ्कद्रोणेन्दवो ह्युदक् ॥ ९७ ॥
वराहनन्दनाशोकाः
पश्चात् सहबलाहकौ ।
दक्षिणा चक्रमैनाकौ
वाडवोऽन्तस्तयोः स्थितः ॥ ९८ ॥
अब्धेर्दक्षिणतः खाक्षि-
सहस्रातिक्रमाद् गिरिः ।
विद्युत्वांस्त्रिसहस्रोच्छ्रि-
दायामोऽत्र फलाशिनः ॥ ९९ ॥

---

१ ख० पु० धूम इति पाठः ।

मलदिग्धा दीर्घकेश-
श्मश्रवो गोसधर्मकाः ।
नग्नाः संवत्सराशीति-
जीविनस्तृणभोजिनः ॥१००॥

निर्यन्त्राणि सदा तत्र
द्वाराणि बिलसिद्धये ।
इत्येतद् गुरुभिर्गीतं
श्रीमद्रौरवशासने ॥१०१॥

इत्थं य एष लवण-
समुद्रः प्रतिपादितः ।
तद्बहिः षडमी द्वीपाः
प्रत्येकं स्वार्णवैर्वृताः ॥१०२॥

क्रमाद्विगुणिताः षड्भि-
र्मनुपुत्रैरधिष्ठिताः ।
शाककुशक्रौञ्चाः श-
ल्मलिगोमेधाब्जमिति षड्द्वीपाः ।

क्षीरदधिसर्पिरैक्षव-
मदिरामधुराम्बुकाः षडम्बुधयः
॥१०३॥

मेधातिथिर्वपुष्मान्-
ज्योतिष्मान्द्युतिमता हवी राजा ।
संवर इति शाकादिषु
जम्बुद्वीपे न्यरूपि चाग्नीध्रः ॥१०४॥

'लवण' इति लवणाम्भाः क्षारसमुद्र इत्यर्थः । 'इन्दुः' चन्द्रः । यदुक्तम्

'वृत्रारिभयसंत्रस्ताः प्रविष्टास्तत्र पर्वताः ।
द्वादशैव महावीरास्तान्ब्रवीमि समासतः ॥'
ऋषभो दुन्दुभिर्धूम्रः प्रविष्टः पूर्वभागतः ।
चन्द्रः कङ्कस्तथा द्रोणः प्रविष्ट उत्तरेण तु ॥
अशोकोऽथ वराहश्च नन्दनश्च तृतीयकः ।
अपरेण नगास्तत्र प्रविष्टा लवणोदधिम् ॥
चक्रो मैनाकसंज्ञश्च तृतीयश्च बलाहकः ।
दक्षिणेन वरारोहे प्रविष्टाश्चैव भूधराः ॥
चक्रमैनाकयोर्मध्ये तिष्ठद्वै वडवानलः ।
(स्व० १० । २७३)

इति । दक्षिणत इति, चक्रमैनाकादिसंनि-

१ स्व० पु० विस्रस्ता इति पाठः ।

कर्षेण, 'खाक्षि' इति विंशतिः । गुरुभिरिति, बृहस्पतिपादैः । यदुक्तं तत्र

'योजनानां सहस्राणि समतिक्रम्य विंशतिम् ।
विद्युत्त्वानिति विख्यातः समुद्रे दक्षिणे स्थितः ॥
सहस्राण्यायतस्त्रीणि तावानेवोच्छ्रितोऽचलः ।
सहस्रविपुलस्तत्र तृणपर्णफलाशनाः ॥
मलोपचितदिग्धाङ्गा दीर्घश्मश्रुशिरोरुहाः ।
गोधर्माणो जना नग्ना वत्सराशीतिजीविनः ॥
तत्रायन्त्रबिलद्वारप्रवेशाः पुरसंपदः ।'

इति । क्रमद्विगुणिता इति, तेन शाकद्वीपे द्वे लक्षे, कुशद्वीपे चत्वारि,— इत्यर्थक्रमः । 'अब्जः' पुष्करः । इक्षुरेव ऐक्षवः । 'मधुराम्बुकः' स्वादूदः । द्युतिमतेत्यर्थात् सह, 'हविः' हव्यः । तदुक्तम्

'जम्बुद्वीपं च शाकं च कुशं क्रौञ्चं सशल्मलिम् ।
गोमेधं पुष्करारव्यं च सप्त द्वीपानि पार्वति' ॥
(स्व० १० । २८४)

इति ।

'क्षारः क्षीरं दधि घृतं तथा चेक्षुरसोऽपि च ।
मदिरोदश्च स्वादूदः समुद्राः सप्त कीर्तिताः ॥
जम्बुद्वीपं स्मृतं लक्षं योजनानां प्रमाणतः ।
परिमण्डलतो ज्ञेयः क्षारोदस्तत्समो बहिः ॥
एवं द्विगुणवृद्ध्या तु समुद्रा द्वीपसंस्थिताः ।
(स्व० २१ । २८७)

इति ।

अग्नीध्रस्तु समाख्यातो जम्बुद्वीपे वरानने
शाके मेधातिथिर्नाम वपुष्मान् कुशसंज्ञके ॥
राजा क्रौञ्चेऽथ ज्योतिष्माञ्छल्मलौ द्युतिमान् स्मृतः ।
गोमेधे हव्यनामा च संवरैः[1] पुष्करे तथा ॥'
(स्व० १०।२९०)

इति च ॥ १०४ ॥

द्वीपषट्कमेव च विभजति

गिरिसप्तकपरिकल्पित-
तावत्खण्डास्तु पञ्च शाकाद्याः ।
पुष्करसंज्ञो द्विदलो
हरियमवरुणेन्दवोऽत्र पूर्वादौ
॥ १०५ ॥

'तावन्तः' सप्तैव, गिरिसप्तकस्य पार्श्वगत्यावस्थितत्वात् । 'द्विदल' इति एकेन वलयाकारेण पर्वतेन मध्यतो विभक्तत्वात्। 'पूर्वादौ' इति चतुर्दिक्षु तदुक्तम्

'मेधातिथेः सप्त पुत्राः शाकद्वीपेऽभिषेचिताः ।
शान्तोभयस्तु शिशिरः सुखदो नन्दकः शिवः ॥

---

१ संवन इति स्व० पाठः ।

क्षेमकश्च ध्रुवश्चेति वर्षनाम्ना तु तेऽङ्किताः ।
वर्षाणि सप्त ख्यातानि पर्वतांश्च निबोध मे ॥
गोमेधश्चन्द्रसंज्ञश्च नारदो दुन्दुभिस्तथा ।
ऋषभः सोमकश्चैव वैभ्राजश्च कुलाद्रयः' ॥
(स्व० १० । २९४)

इति ।

'कुशे वपुष्मता पूर्वं सप्त पुत्रा निवेशिताः ।
श्वेतलोहितजीमूता हरितो वैद्युतस्तथा ॥
मानसः सुव्रतश्चेति वर्षनाम्नैव चाङ्किताः ।
कुमुदश्चोर्वदश्चैव वराहो द्रोणकङ्कतौ ॥
महिषः कुमुदश्चैव सप्त सीमान्तपर्वताः ।'
(स्व० १० । ३००)

इति ।

'ज्योतिष्मता सप्त पुत्राः क्रौञ्चद्वीपे निवेशिताः ।
उद्भिज्जश्च समाख्यातो वेणुर्मण्डल एव च ॥
रथकारश्च लवणो धृतिमान्सुप्रतारकः ॥
कपिलश्चेति राजानो वर्षनाम्ना तु तेऽङ्किताः ॥
वैदुमो हेमनाभश्च द्युतिमान्पुष्पदन्तकः ।
कुशलो हरिमर्दश्च सप्तैते तु कुलाद्रयः ॥'
(स्व० १० । ३०५)

इति ।

'सप्त द्युतिमता पुत्राः शल्मलावभिषेचिताः ।
मनोऽनुगस्तथोष्णश्च पावनो ह्यन्धकारकः ॥
मुनिर्दुन्दुभिनामा च कुशलश्चेति ते स्मृताः ।'
(स्व० १० । ३०९)

इति ।

'क्रौञ्चोऽथ वामनश्चैवाप्यन्धकारो दिवाकृतिः ।
द्विबिन्दुः पुण्डरीकश्च दुन्दुभिश्च कुलाद्रयः॥'
(स्व १० । ३११)

इति ।

'हव्यराजः सुतान्सप्त गोमेधे चाभ्यषेचयत् ।
जलदश्च कुमारश्च सुकुमारो मरीचकः ॥
कुमुदश्चोन्नतश्चैव महाभद्र इति स्मृताः ।'
(स्व० १० । ३१५)

इति ।

'उदयः केसरश्चैव जठरोऽथ सुरैवतः ।
श्यामोऽम्बिकेयो मेरुश्च शैलाः सीमान्तगास्त्विमे ॥'
(स्व० १० । ३१७)

इति ।

'अतश्च पुष्कराख्ये च संवरस्तत्र नायकः ।
द्वौ पुत्रौ तेन विख्यातौ पुष्कराख्ये निवेशितौ॥
पर्वतो वलयाकारो मानसोत्तरसंज्ञकः ।'
(स्व० १० । ३२३)

इति ।

'धातकी मध्यमे राजा महावीतो बहिर्नृपः ।
(स्व० १० । ३२४)

इति ।

'चतुर्णां लोकपालानां पुरीश्चात्र निबोध मे ।
हरेर्वस्वेकसाराख्या याम्या संयमनी पुरी ॥
सुखाह्वा वारुणी चैव सोमस्य तु विभावरी ।'
(स्व० १० । ३२७)

इति च ॥ १०५ ॥

इयदन्तं सङ्कलयति

त्रिपञ्चाशच्च लक्षाणि
द्विकोट्ययुतपञ्चकम् ।
स्वाद्वर्णवान्तं मेर्वर्धा-
द्योजननामियं प्रमा ॥ १०६ ॥

तत्र जम्बुद्वीपीयानि अर्थात् पञ्चाशत्सहस्राणि, क्षाराब्धिर्लक्षं, शाकद्वीपं द्वे क्षीराब्धिश्च, कुशश्चत्वारि दध्यब्धिश्च,क्रौञ्चोऽष्टौ घृताब्धिश्च,शल्मलिःषोडश इक्षुरसाब्धिश्च, गोमेधो द्वात्रिंशत् मदिराब्धिश्च, पुष्करश्चतुःषष्टिः स्वादूदश्च,—इत्येवं मेर्वर्धादारभ्य स्वादूदान्तं ससहस्रपञ्चाशत्त्रिपञ्चाशल्लक्षाधिकं कोटिद्वयं योजनानां प्रमाणं भवेत् । तदुक्तम्

'कोटिद्वयं त्रिपञ्चाशल्लक्षाणि च ततः परम् ।
पञ्चाशच्च सहस्राणि सप्त द्वीपाः ससागराः ॥'

इति ॥१०६॥

सप्तमजलधेर्बाह्ये
हैमी भूः कोटिदशकमथ लक्षम् ।
उच्छ्रित्या विस्ताराद-
युतं लोकेतराचलः कथितः ॥१०७॥
लोकालोकदिगष्टक
संस्थं रुद्राष्टकं सलोकेशम् ।
केवलमित्यपि केचि-
ल्लोकालोकान्तरे रविर्न बहिः ॥१०८॥

हैमी भूरिति, अर्थाद्देवानां क्रीडार्थम् । 'लोकेतराचल' इति लोकालोकपर्वतः । यदुक्तम्

'ततो हेममयी भूमिर्दशकोट्यो वरानने ।
देवानां क्रीडनार्थाय लोकालोकस्त्वतः परम् ॥
पर्वतो वलयाकारो योजनायुतविस्तृतः ।
लक्षमात्रसमुत्सेधो योजनानां वरानने ॥'
(स्व० १०।३३१)

इति । सलोकेशमिति, यदुक्तम्

'लोकपालाः स्थितास्तत्र रुद्राश्चामोघशक्तयः ।'
(स्व० १०।३३३)

इति । केचिदिति, लीलाकारादयः । एतद्धि तैः समस्त-

---

१ क० पु० ततः परमिति पाठः ।

लोकपालत्वात् रुद्रा एव लोकपालास्तत्र स्थिताः,—इत्यन्यथा व्याख्यातम् ।

'लोकालोकमतो देवि तत्र रुद्रा व्यवस्थिताः ।
अमोघशक्तयः सर्वे विरजा वसुधामकाः॥
कर्दमः शंखपालश्च पर्जन्यः स्वर्णलोमकः ।
केतुमान्राजनश्चैव पूर्वादीशान्तमास्थिताः ॥
लोकपालास्ततो बाह्ये व्याप्य सर्वमिदं स्थिताः ।'

इत्यादीनामेतद्विरुद्धानां श्रुतीनां संभवात् । न बहिरिति, रवेर्लोकालोकसमानोच्छ्रायत्वात् मेरुतदन्तरालवर्तित्वाच्च; अत एवान्तःस्थितानामेव लोकानामालोको यत्र, तथा आलोकः प्रकाशोऽलोकश्च तमोऽन्तर्बहिश्च यस्येति स लोकालोक इति । तदुक्तम्

'तस्यान्तर्भासते भानुर्न बहिः सुरसुन्दरि'।

इति ॥ १०८ ॥

एवं लोकालोकमेर्वन्तरालवर्तित्वेऽस्य भानोर्गतिवैचित्र्यं दर्शयति

पितृदेवपथावस्यो-
दग्दक्षिणगौ स्वजात्परे वीथ्यौ ।

भानोरुत्तरदक्षिण-
मयनद्वयमेतदेव कथयन्ति ॥ १०९ ॥

तत्रास्य भानोर्मेरुसंनिकर्षेण गच्छत उत्तरो मार्गो लोकालोकसन्निकर्षेण तु दक्षिणः, तौ च मार्गौ 'स्वजात्परे वीथ्यौ' सुवीथि-अजवीथि-शब्दाभ्यां व्यपदेश्यावित्यर्थः । यदुक्तम्

'सुवीथी उत्तरे तस्य अजवीथी तु दक्षिणे ।' (स्व० १० । ३३९)

इति । तावेव च पितॄणां देवानां च मार्गः,—इत्युक्तं 'पितृदेवपथौ' इति तत्र अजवीथी पितॄणां मार्गः, सुवीथी तु देवानाम् । तदुक्तम्

'अजवीथी दक्षिणं तु सुवीथी चोत्तरायणम् ।
पितृमार्गस्तथा दिव्यः कथितोऽनुक्रमेण तु ॥'

इति । एतदेव मार्गद्वयमुत्तरायणं दक्षिणायनं च,—इत्युक्तम् 'उत्तरदक्षिणमयनद्वयमेतदेव' इति । तदुक्तम्

'लोकालोकोपरिष्टात्तु सवितुर्दक्षिणायनम् ।
तथोत्तरायणं तत्र उत्तरेण प्रकीर्तितम् ॥' (स्व० १० । ३३७)

इति ॥ १०९ ॥

ननु भानोर्मेरुसन्निकर्षेणोत्तरो मार्गो लोकालो-

कसन्निकर्षेण तु दक्षिणः,—इत्यत्र किं प्रमाणम् ? इत्याशङ्क्याह

'सर्वेषामुत्तरो मेरु-
लोकालोकश्च दक्षिणः ।'

सर्वेषामिति, वर्षाष्टकादिनिवासिनाम्। इलावृते हि भानुरेव न प्रतपति,—इति कस्तद्गतिवैचित्र्येऽपि अवकाशः; भानुरेव हि भगवान् मेरुमधिकृत्य दक्षिणदिगवस्थिते भारतादौ वर्षत्रये पूर्वतः पश्चात्स्थिते केतुमाले दक्षिणात्, उत्तरदिगवस्थिते कुर्वादौ वर्षत्रये पश्चात्प्राच्ये भद्राश्वेऽपि उदक्तः समुदयन् स्वोदयानुसारेण पूर्वदिगवस्थापनात् सर्वेषामुत्तरयति लोकालोकं च दक्षिणयति, येन अस्य तत्सन्निकर्षविप्रकर्षाभ्यामुत्तरायणदक्षिणायनादि स्यात्॥

न केवलमस्यैवं गतावेव वैचित्र्यमस्ति यावदुदयास्तमययोरपि,—इत्याह

उदयास्तमयावित्थं
सूर्यस्य परिभावयेत् ॥ ११० ॥

'इत्थम्' इति दक्षिणावर्तभङ्ग्या, मेरोः परिभ्रमणेनेत्यर्थः ॥ ११० ॥

तदाह

अर्धरात्रोऽमरावत्यां
याम्यायामस्तमेव च ।
मध्यन्दिनं तद्वारुण्यां
सौम्ये सूर्योदयः स्मृतः ॥ १११ ॥
उदयो योऽमरावत्यां
सोऽर्धरात्रो यमालये ।
कोऽस्तं सौम्ये च मध्याह्न
इत्थं सूर्यगतागते ॥ ११२ ॥

इह खलु 'सौम्ये' मेरोरुत्तरे भागे महोदयाख्यायां नगर्यां यदा वारुण्या आगच्छतः सूर्यस्योदयदर्शनं भवेत् तदा प्रहरद्वयस्य व्यतीतत्वात् वारुण्यां गन्धवत्याख्यायां नगर्यां मध्याह्नो, याम्यायां दक्षिणदिगवस्थितायां संयमन्याख्यायां नगर्यां च सूर्योऽस्तमेति, प्रहरचतुष्टयातिक्रमेण पर्वतच्छायान्तरितत्वात् प्रकाशो न दृश्यते इत्यर्थः । पूर्व-

दिङ्नगर्यामरावत्याख्यायां चार्धरात्रस्तद्वारुण्युदयावसरेऽस्तमयत्वात् प्रहरद्वयेन चोदयस्य भविष्यत्त्वात् । यश्च अमरावत्यां सूर्योदयः सौम्याया आगच्छतो दर्शनं स यमालयेऽर्धरात्रः प्रहरद्वयेन सूर्यस्योदेष्यमाणत्वात्, के वारुणे चास्तमयः सौम्योदयवेलायां तत्र मध्याह्नस्य वृत्तत्वात् इदानीं प्रहरचतुष्टयस्य अतिक्रान्तत्वात्, सौम्ये च प्रहरद्वयस्य अतीतत्वात् मध्याह्नः,—इत्यनेनैव क्रमेण पूर्वपश्चिमयोर्विदिक्षु चोदयास्तमयावपि सूर्यस्य चिन्त्यौ,—इत्युक्तम् 'इत्थं भानोर्गतागते' इति । यदुक्तम्

'अर्धरात्रोऽमरावत्यामस्तमेति यमस्य च ।'
(स्व० १०। ३३८)

इति । तथा

'यैदेव चामरावत्यामुदयस्तस्य दृश्यते ।
तदास्तमेति वारुण्यामित्यादित्यगतागतम् ।'

इति । एतच्च द्वीपान्तरेष्वपि योज्यं सूर्योदयस्य सर्वत्र समानत्वात् ॥ ११२ ॥

एवमेतत्प्रसङ्गादभिधाय प्रकृतमेवानुसरति

पञ्चत्रिंशत्कोटिसंख्या
लक्षाण्येकोनविंशतिः ।
चत्वारिंशत्सहस्राणि
ध्वान्तं लोकाचलाद्बहिः ॥११३॥
सप्तसागरमानस्तु
गर्भोदाख्यः समुद्रराट् ।
लोकालोकस्य परतो
यद्गर्भे निखिलैव भूः ॥११४॥

तदुक्तम्

'तस्य बाह्ये तमो घोरं दुष्प्रेक्ष्यं जीववर्जितम् ।
पञ्चत्रिंशत्स्मृताः कोट्यो लक्षाण्येकोनविंशतिः ॥
चत्वारिंशत्सहस्राणि योजनानां वरानने ।'

(स्व० १० । ३४१)

इति । सप्तानां क्षारादीनां लक्षात्प्रभृति द्विगुणद्विगुणया वृद्ध्या सप्तविंशतिलक्षैककोट्यात्म यन्मानं तत्तुल्यमान इत्यर्थः । समुद्रराडिति, क्षारादिसमुद्रसप्तकगर्भीकारात् । तदुक्तम्

'गदिता येऽब्धयः सप्त तेऽत्र गर्भे यतः स्मृताः ।
कथितस्तेन गर्भोदः समस्ताब्धिरसोद्वहः ॥' (मृगेन्द्रा०)

इति ॥ ११४ ॥

अत्र च तमःस्थाने श्रीसिद्धयोगीश्वरमतोक्तं विशदयति

सिद्धातन्त्रेऽत्र गर्भाब्धे-
स्तीरे कौशेयसंज्ञितम् ।
मण्डलं गरुडस्तत्र
सिद्धपक्षसमावृतः ॥ ११५ ॥
क्रीडन्ति पर्वताग्रे ते
नव चात्र कुलाद्रयः ।
तत उष्णोदकाख्यिंश-
न्नद्यःपातालगास्ततः ॥ ११६ ॥
चतुर्दिङ्नैमिरोद्यानं
योगिनीसेवितं सदा ।
ततो मेरुस्ततो नागा
मेघा हेमाण्डकं ततः ॥ ११७ ॥

तीरे इति, अस्मात्परस्मिन् । तत्र हि लोकालोकसन्निकर्षे गर्भोदः । 'नैमिरोद्यानम्' इति नैमिरपुष्पसंज्ञकमित्यर्थः । नागा इत्यार्थाद्रत्नमय्यां भुवि ।

१ ख० ग० पु० विशेषं दर्शयति इति पाठः ।

मेघा इत्यर्थाद्धरिचन्द्रपर्वतोपरि । 'हेमाण्डकम्' इति हैमाण्डीया कर्परिकेत्यर्थः । तदुक्तं तत्र

'गर्भोदस्य परे तीरे कौशेयं नाम मण्डलम् ।
तत्र तिष्ठति देवेशो गरुत्मांश्च समावृतः ॥
सिद्धपक्षसहस्रैस्तु तत्तुल्यबलदर्पितैः ।
तिष्ठन्ति पर्वताग्रे ते क्रीडमाना मुहुर्मुहुः ॥'

इति ।

'हुलहालवरक्रोधाः कोटको मूलपर्वतः ।
रोधको वामनः काण्डो विज्ञेयाः कुलपर्वताः ॥'

इति ।

'पर्वतान्ते पुनस्त्रिंशन्नद्यो योजनविस्तराः ।
उष्णोदकाः स्मृतास्तास्तु पातालतलनिम्नगाः ॥'

इति ।

'पुनस्तदापगातीरे वनं नैमेरपुष्पकम् ।
तत्र क्रीडन्ति देवेशि योगिन्यो बलदर्पिताः ॥'

इति ।

'वनस्य बाह्यस्य भूमिः सर्वतः संव्यवस्थिता ।
शुष्का जलविहीना तु पुनर्भूमिस्तु रत्नजा ॥
दिङ्मातङ्गसमाकीर्णा समन्तात्परिशोधिता ।
वारणा बहवो यत्र मेरुमन्दरसन्निभाः ॥'

इति ।

'ततस्तानप्यतिक्रम्य उत्थितस्तु महाचलः ।
हरिश्चन्द्र इति ख्यातो वलयाकारसंस्थितः ॥'

इति ।

'तत्र सन्निहिता मेघाः संवर्ताद्या महारवाः ।'

इति ।

'पुनस्तद्दृश्यते चाण्डं काञ्चनं चातिभास्वरम् ।'

इति ॥ ११७ ॥

तदेव संकलयति

ब्रह्मणोऽण्डकटाहेन
मेरोरर्धेन कोटयः ।
पञ्चाशदेवं दशसु
दिक्षु भूर्लोकसंज्ञितम् ॥ ११८ ॥

तत्र मेरोरारभ्य स्वादूदकान्तं प्राक्कलितं सस-हस्रपञ्चाशत्त्रिपञ्चाशल्लक्षाधिकं कोटिद्वयं हैमी भूः, कोटिदशकं लोकालोकविष्कम्भः, सहस्रदशकं तमः, सहस्रचत्वारिंशदेकोनविंशतिलक्षाधिकं कोटिपञ्च-त्रिंशकं गर्भोदश्च, ससप्तविंशतिलक्षा कोटिरित्येवं कोटिपरिमाणेन ब्रह्माण्डकटाहेन सह अर्थात्पञ्चाश-त्कोटयो भवन्ति;—इत्येवं 'दशसु दिक्षु' इति सर्वतः कोटिशतं भूर्लोको भवेत् ॥ ११८ ॥

एष च भूर्लोकः चतुर्दशविधस्यापि भूतसर्गस्यास्पदमित्याह

पशुखगमृगतरुमानुष-
सरीसृपैः षड्भिरेष भूर्लोकः ।
व्याप्तः पिशाचरक्षो-
गन्धर्वाणां सयक्षाणाम् ॥ ११९ ॥
विद्याभृतां च किं वा
बहुना सर्वस्य भूतसर्गस्य ।
अभिमानतो यथेष्टं
भोगस्थानं निवासश्च ॥ १२० ॥

'तरु' इति स्थावरम् । 'विद्याभृताम्' इति ऐन्द्रप्रकारभूतानाम् । किं वा बहुना इति, एषां हि प्रकारप्रकारिभावेन वचनमानन्त्याय भवेदिति भावः सर्वस्येति, चतुर्दशविधस्य । 'अभिमानत' इत्यनेन 'एतद्भोगस्थानादित्वमभिमानमात्रसारमेव न तु वास्तवं किञ्चित्' इति दर्शितम् । निवास इति, विनापि भोगं केषांचित्; अतश्चैतदत्रैव शोधनीयमित्याशयः । तदुक्तम्

'पैशाचं राक्षसं याक्षं गान्धर्वं त्वैन्द्रमेव च ।
सौम्यं तथा च प्राजेशं ब्राह्मं चैवाष्टमं विदुः ॥'
(स्व० १० । ३५१)

इति ।

'पशुपक्षिमृगाश्चैव तथान्ये च सरीसृपाः ।
स्थावरं पञ्चमं चैव षष्ठं मानुषयोनिकम् ॥
देवयोनिसमायुक्तं प्रोक्तं संसारमण्डलम् ।
चतुर्दशविधं चैव भूर्लोके तु विशोधयेत् ॥'
(स्व० १० । ३५३)

इति ॥ १२० ॥

इदानीं भुवर्लोकाद्यभिधत्ते

भुवर्[1]लोकस्तथा त्वार्का-
ल्लक्षमेकं तदन्तरे ।
दश वायुपथास्ते च
प्रत्येकमयुतान्तराः ॥ १२१ ॥
आद्यो वायुपथस्तत्र
विततः परिचर्च्यते ।

'आ अर्कात्' इति अर्कं यावदित्यर्थः । तदुक्तम्

'भूपृष्ठाद्यावदादित्यं लक्षमेकं प्रमाणतः ।'
(स्व० १० । ४२२)

---

१ क० ग० भुवो लोकमिति पाठः ।
२ क० पु० यावदर्कं तु इति पाठः ।

इति । 'अयुतान्तरा' इति दशसहस्रप्रस्थाना इत्यर्थः। तत्रेति, वायुपथदशकमध्यात् ॥ १२१ ॥

तदाह

पञ्चाशद्योजनोर्ध्वं स्या-
दृतर्द्धिर्नाम मारुतः ॥ १२२ ॥

आप्यायकः स जन्तूनां
ततः प्राचेतसो भवेत् ।
पञ्चाशद्योजनादूर्ध्वं
तस्मादूर्ध्वं शतेन तु ॥ १२३ ॥

सेनानीवायुरत्रैते
मूकमेघास्तडिन्मुचः ।
ये मह्याः क्रोशमात्रेण
तिष्ठन्ति जलवर्षिणः ॥ १२४ ॥

तेभ्य ऊर्ध्वं शतान्मेघा
भेकादिप्राणिवर्षिणः ।
पञ्चाशदूर्ध्वमोघोऽत्र
विषवारिप्रवर्षिणः ॥ १२५ ॥

मेघाः स्कन्दोद्भवाश्चान्ये
पिशाचा ओघमारुते ।
ततः पञ्चाशदूर्ध्वं स्यु-
र्मेघा मारकसंज्ञकाः ॥ १२६ ॥

तत्र स्थाने महादेव-
जन्मानस्ते विनायकाः ।
ये हरन्ति कृतं कर्म
नराणामकृतात्मनाम् ॥ १२७ ॥

पञ्चाशदूर्ध्वं वज्राङ्को
वायुरत्रोपलाम्बुदाः ।
विद्याधराधमाश्चात्र
वज्राङ्के संप्रतिष्ठिताः ॥ १२८ ॥

पञ्चाशद्योजनोर्ध्वे इति, भूपृष्ठात् । आप्यायक इति, यदुक्तम्

'यो विवर्धयते पुष्टिमोषधीनां बलं तथा ।
बृंहयेच्च महीं सर्वामाप्याययति चाव्ययः ॥
(स्व० १० । ४२४)

इति । पञ्चाशद्योजनादूर्ध्वमिति, यथा भूपृष्ठात्

पञ्चाशद्योजनानि परिवर्ज्य ऊर्ध्वमृतर्द्धिः स्थितः, तथा तदूर्ध्वमपि पञ्चाशद्योजनान्यन्तरालत्वेन परिस्थाप्य अयमित्यर्थः । 'प्राचेतस' इति प्रचेतोभिर्निर्मितत्वात्, तदाख्येन चाग्निना सह निवासात्; अत एवाप्यायकत्वं दाहकत्वं च । तदुक्तम्

'प्राचेतसो नाम वायुः प्रचेतोभिर्विनिर्मितः ।
स वै नाशयते वृक्षान्कदाचित्संप्रवर्तयेत् ॥
अग्निः प्राचेतसो नाम तेनैव सह तिष्ठति ।'
(स्व० १०। ४२७)

इति । 'तस्मादूर्ध्वं शतेन' इति प्राचेतसादप्यूर्ध्वं योजनानां शतमतिक्रम्येत्यर्थः । एवमुत्तरत्रापि व्याख्येयम् । तथाभिधायित्वाभावात् भेकादिप्राणिवर्षित्वादेव च सत्त्ववहा इत्युक्ताः । तदुक्तम्

'योजनानां शतादूर्ध्वं मेघाः सत्त्ववहाः स्मृताः ।
मत्स्यमण्डूककूर्माश्च वर्षन्ते दुर्दिने च ते ॥'
(स्व० १०। ४३०)

इति । विषवारिवर्षित्वादेव चोपसर्गादिकारिणः । तदुक्तम्

'पञ्चाशद्योजनादूर्ध्वं वायुरोघः प्रकीर्तितः ॥
तस्मिंस्तु रोगदा मेघा वर्षन्ति च विषोदकम् ।

तेनोपसर्गा जायन्ते मारकाः सर्वदेहिनाम् ॥'
(स्व० १० । ४३२)

इति ।

'ओघे वसन्ति वै दिव्याः पिशाचाः स्कन्ददेहजाः ।
त्रिंशत्कोटिसहस्राणि स्कन्दस्यानुचराः स्मृताः ॥
ते वै दिव्यैश्च कुसुमैरर्चयन्ति हरात्मजम् ।'
(स्व० १० । ४४२)

इति । 'तत्र स्थान' इति अमोघाख्ये मरुति 'अकृतात्मनां' संशयानानाम् । तदुक्तम्

'तस्मादूर्ध्वं तु तावद्भ्यो देव्यमोघः स्थितो मरुत् ।
तस्मिंस्ते मारका मेघा अमोघे संप्रतिष्ठिताः ॥'
(स्व० १० । ४३३)

इति ।

'अमोघे विनायका घोरा महादेवसमुद्भवाः ।
त्रिंशत्कोटिसहस्राणि तस्मिन्वायौ प्रतिष्ठिताः ॥
ये हरन्ति कृतं कर्म नराणामकृतात्मनाम्,
(स्व० १० । ४४४)

इति च । 'उपलाम्बुदा' इति उपलवर्षित्वात् तदाख्याः । विद्याधराधमा इति, वक्ष्यमाणविद्याधरापेक्षया अल्पसिद्धित्वात्; अत एवैषां[1] तत्रत्यमातङ्गारोहादेव तत्तद्गतिभाक्त्वम् ॥ १२८ ॥

---

१ ग० प्र० तेषामिति पाठः ।

एतत्पदप्राप्तौ चैषां निमित्तमाह

ये विद्यापौरुषे ये च
श्मशानादिप्रसाधने ।
मृतास्तत्सिद्धिसिद्धास्ते
वज्रांके मरुति स्थिताः ॥ १२९ ॥

'विद्यापौरुषे' गारुडविद्यादिस्पर्धायाम् । मृता इत्यर्थादेतदन्ते । तदुक्तम्

'वज्राङ्को नाम वै वायुः पञ्चाशद्योजने स्थितः ।
तस्मिंश्चोपलका नाम मेघास्तूपलवर्षिणः ॥'
(स्व० १० । ४३४)

इति ।

'वज्राङ्कैऽपि तथा वायौ मातङ्गाः क्रूरकर्मिणः ।
भिन्नाञ्जननिभा घोरास्तापना नाम विश्रुताः ॥
विद्याधराणामधमा मनःपवनगामिनः ।
ये विद्यापौरुषे ये च वेतालादीञ्श्मशानतः ॥
साधयित्वा ततः सिद्धास्तेऽस्मिन्वायौ प्रतिष्ठिताः ।
(स्व० १० । ४४६)

इति च ॥ १२९ ॥

पञ्चाशदूर्ध्वं वज्रांका-
द्वैद्युतोऽशनिवर्षिणः ।

---

१ वज्राङ्क इति श्रीस्वच्छन्दशास्त्रपाठः ।

अब्दा अप्सरसश्चात्र
ये च पुण्यकृतो नराः ॥ १३० ॥
भृगौ वह्नौ जले ये च
संग्रामे चानिवर्तिनः ।
गोग्रहे वध्यमोक्षे वा
मृतास्ते वैद्युते स्थिताः ॥ १३१ ॥

पुण्यकृत्त्वमेव व्याचष्टे 'भृगावित्यादिना' । भृग्वादौ मृतास्तथाम्नातत्वात् तच्च लुप्तस्मृत्यादीनाम् । यदुक्तम्

'भृगौ च स्मृतेर्लुप्त..... ।'

इति । तथा

'परां काष्ठामनुप्राप्तो भिषग्भिः परिवर्जितः ।
रसास्वादपरित्यक्तो व्याधिभिः परिपीडितः ॥
विमुखः स्वजनत्यक्तो देहत्यागोद्यतो नरः ।
आरुहेद्भैरवं यो हि स तत्फलमवाप्नुयात् ॥
अन्यथा पातयेद्देहं ब्रह्महत्याफलं नभेत् ।'

इति । संग्राम इत्यर्थाच्छरणागतादिनिमित्तम्, अन्यथा हि आत्मघातिन एते भवेयुः,-इति कथमेतत्पदप्राप्तिः स्यात् । यदुक्तम्

'असूर्या नाम ते लोका अन्धेन तमसा वृताः ।
तांस्ते प्रेत्याधिगच्छन्ति ये के चात्महनो नराः ॥
(ई० उ० ३ ऋ०)

इति । स्थिता इति, अर्थाद्विमानैः । तदुक्तम्

'तावद्भिर्योजनैरेव ततो वै वैद्युतोऽनिलः ।
मेघास्तु वैद्युतास्तस्मिन्निवसन्ति तु वद्युत ॥
अशनिर्वायुसंक्षोभात्तेष्वसौ जायते महान्।'
(स्व० १० । ४३५)

इति ।

'वैद्युतेऽप्सरसस्तस्मिन्वासवेन प्रयोजिताः ।
तिष्ठन्ति सर्वदा तत्र पृथिवीपुरपालने ॥
भृगौ वह्नौ जले वाथ संग्रामेष्वनिवर्तकाः ।
गोग्रहे वन्दिमोक्षे च म्रियन्ते पुरुषोत्तमाः ।
ते व्रजन्ति ततस्तूर्ध्वं[2] विमानैर्मणिचित्रितैः ॥'
(स्व० १० । ४४९)

इति ॥ १३१ ॥

वैद्युताद्दैवतस्तावां-
स्तत्र पुष्टिवहाम्बुदाः ।
ऊर्ध्वं च रोगाम्बुमुचः
संवर्तास्तदनन्तरे १३२ ॥

---

१ पं० क० पु० वध्यमोक्ष इति पाठः ।
२ पं० क० पु० ततस्तूर्णमिति पाठः ।

रोचनाञ्जनभस्मादि-
सिद्धास्तत्रैव रैवते ।
क्रोधोदकमुचां स्थानं
विषावर्तः स मारुतः ॥ १३३ ॥
पञ्चाशदूर्ध्वं तत्रैव
दुर्दिनाब्दा हुताशजाः ।
विद्याधरविशेषाश्च
तथा ये परमेश्वरम् ॥ १३४ ॥
गान्धर्वेण सदार्चन्ति
विषावर्तेऽथ ते स्थिताः ।
विषावर्ताच्छतादूर्ध्वं
दुर्जयः श्वाससंभवः ॥ १३५ ॥
ब्रह्मणोऽत्र स्थिता मेघाः
प्रलये वातकारिणः ।
पुष्कराब्दा वायुगमा
गन्धर्वाश्च परावहे ॥ १३६ ॥
जीमूतमेघास्तत्संज्ञा-
स्तथा विद्याधरोत्तमाः ।

ये च रूपव्रता लोका
आवहे ते प्रतिष्ठिताः ॥१३७॥
महावहे त्वीशकृताः
प्रजाहितकराम्बुदाः ।
महापरिवहे मेघाः
कपालोत्था महेशितुः ॥१३८॥

'भस्मादि' इत्यादिग्रहणात् पादुकादि । तदुक्तम्

'तदूर्ध्वं योजनानां तु पञ्चाशद्रैवतः स्मृतः ।
तस्मिन्पुष्टिवहो नाम पुष्टिं वर्षति देहिनाम् ॥'
(स्व० १० । ४३६)

इति ।

'रैवते तु महात्मानः सिद्धा वै सुप्रतिष्ठिताः ।
गोरोचनाञ्जने भस्म पादुके अजिनादि च ॥
साधयित्वा महात्मानः सिद्धास्ते कामरूपिणः ।'
(स्व० १० । ४५१)

इति च। ऊर्ध्वमिति, रैवतात् 'तदन्तरे' इति तान्येव पञ्चाशद्योजनान्यन्तरं शून्यरूपं यत्रेत्यर्थः । तदुक्तम्

'संवर्ते रोगदा मेघास्ते रोगोदकवर्षिणः ।
पञ्चाशद्योजने ते वै तस्मिंस्तिष्ठन्ति तोयदाः ॥'
(स्व० १० । ४३७)

इति दुर्दिनाब्दा इति, दुर्दिनकारित्वात्, 'गान्धर्वेण' इति वंशवीणादिना । तदुक्तम्

'विषावर्तो नाम वायुः पञ्चाशदुपरि स्थितः ।
तस्मिन्क्रोधोदका नाम मेघा वै संप्रतिष्ठिताः ॥
ते क्रोधरागबहुलं संग्रामबहुलं तथा ।
राज्ञां क्षयकरं चैव प्रजानां क्षयदं तथा ॥
वर्षं चैव प्रकुर्वन्ति यदा वर्षन्ति ते घनाः ।'
(स्व० १०। ४५०)

इति ।

'विषावर्ते महावायौ विद्याधरगणाः स्मृताः ।
दश त्रिंशच्च कोट्यस्ते दिव्याभरणभूषिताः ॥'
(स्व० १०। ४५३)

इति ।

'आग्नेया धूमजा मेघाः शीतदुर्दिनदाः स्मृताः ।
विषावर्तं नावमिव ते वायुं यान्ति संश्रिताः ॥
तत्र गान्धर्वकुशला गन्धर्वसहधर्मिणः ।
वंशवीणाविधिज्ञाश्च पक्षिणः कामरूपिणः ॥'
(स्व० १०। ४५५)

इति च अत्र च संवर्तेऽपि महावायाविति उद्द्योतकारव्याख्यापाठान्न भ्रमणीयं—यत्संवर्ते कथं विद्याधरा नोक्ता विषावर्ते तु उक्ता इति, अस्मत्तर्कित एव हि पाठः साधुर्महाजनपरिगृहीतत्वात् । एवम्

'योजनानां शतादूर्ध्वं वायुरोघः प्रकीर्तितः ।'
(स्व० १० । ४३१)

इत्यादावपि अस्मत्तार्किंत एव पाठो ग्राह्यः, अन्यथा हि

'तस्मादूर्ध्वं तु तावद्भ्यः.....।' (स्व० १० । ४३२)

इत्यादौ तावदर्थस्तन्मतेऽपि न सङ्गतः स्यात् । 'दुर्जय' इति तन्नाम्ना वायुः । तदुक्तम्

'ब्रह्मजा नाम वै मेघा ब्रह्मनिःश्वाससम्भवाः ।
उपरिष्टाद्योजनशतादूर्दुर्जयस्योपरि स्थिताः ॥'
(स्व० १० । ४५६)

इति । गन्धर्वाश्च इति, चशब्दाद् दुर्जयाख्यमेघादीनामपि ग्रहणम् । तदुक्तम्

'तत्रैव दुर्जया नाम इन्द्रस्य परिरक्षकाः ।
परावहाभिधं वायुं ते समाश्रित्य संस्थिताः ॥
महावीर्यबलोपेता दश कोट्यः प्रकीर्तिताः ।
पुष्करावर्तका नाम मेघा वै पद्मजोद्भवाः ॥
शक्रेण पक्षा ये च्छिन्नाः पर्वतानां महात्मनाम् ।
परावहस्तान्वहति मनुजानिव वारणः ॥
तस्मिन्वायुगमा नाम गन्धर्वा गगनालयाः ।'
(स्व० १० । ४६१

इति । तदाप्रभृति एषां नैरन्तर्येणावस्थानमवसात-

व्यमन्तरालविधायिन्याः श्रुतेरभावात् । 'तत्संज्ञा' इति जीमूतसंज्ञाः । तदुक्तम्

'जीमूता नाम ये मेघा देवेभ्यो जीवसम्भवाः ।
द्वितीयमावहं वायुं मेघास्ते च समाश्रिताः ॥
तस्मिञ्जीमूतका नाम विद्याधरगणा दश ।'
(स्व० १० । ४६२)

इति । 'रूपव्रता' इति रूपविडम्बकवद् रूपविधानं न तु वस्तुनिष्ठं वस्तु येषां तेन व्रत[ता] जीविन इत्यर्थः । तदुक्तं श्रीस्वच्छन्दे

'ये च रूपव्रता लोकास्तेषां तत्र समाश्रयः ।'

इति । एतदर्धं च उद्द्योतकृता न दृष्टम्,--इति न भ्रमणीयम् । ईशकृता इति उमापतिनिर्मिताः । तदुक्तम्

'महावहस्ततो वायुर्यत्र द्रोणाः समाश्रिताः ।
तस्मिन्द्रोणाः समाख्याता मेघानां परिरक्षकाः ॥'
हितार्थं तु प्रजानां वै निर्मितास्ते मया पुरा ।'
(स्व० १० । ४६३)

इति । मेघा' इति संवर्ताद्याः । तदुक्तम्

'उपरिष्टात्कपालोत्थाः संवर्ता नाम वै घनाः ।
महापरिवहो नाम वायुस्तेषां समाश्रयः ॥'
(स्व० १० । ४६४)

इति ॥ १३८ ॥

एतदेव उपसंहरति

महापरिवहान्तोऽय-
मृतर्द्धेः प्राङ्मरुत्पथः ।

एवमत्र योजनानां सहस्रदशकात् ऋतर्द्धेरारभ्य महापरिवहान्तं षोडशानां वायूनामन्तरालेषु यथोक्तक्रमेण सार्धं शतसप्तकं परिसंख्याय शिष्टं विशेषश्रुत्यभावात् सममेव विभजनीयम्, येन प्रत्येकं शतपञ्चकं सार्धक्रोशा चाष्टसप्ततिर्मानं स्यात् ॥

अग्निकन्या मातरश्च
रुद्रशक्त्या त्वधिष्ठिताः ॥ १३९ ॥

द्वितीये तत्परे सिद्ध-
चारणा निजकर्मजाः ।
तुर्ये देवायुधान्यष्टौ
दिग्गजाः पञ्चमे पुनः ॥ १४० ॥

षष्ठे गरुत्मानन्यस्मि-
ञ्जङ्गन्यत्र वृषो विभुः ।

दत्तस्तु नवमे ब्रह्म-
शक्त्या समधिति[नि]ष्ठितः ॥१४१॥

दशमे वसवो रुद्रा
आदित्याश्चमरुत्पथे
नवयोजनसाहस्रो
विग्रहोऽर्कस्य मण्डलम् ॥१४२॥

त्रिगुणं ज्ञानशक्तिः सा
तपत्यर्कतया प्रभोः ।
स्वर्लोकस्तु भुवर्लोकाद्[1]-
ध्रुवान्तं परिभाष्यते ॥१४३॥

सूर्याल्लक्षेण शीतांशुः
क्रियाशक्तिः शिवस्य सा ।
चन्द्राल्लक्षेण नाक्षत्रं
ततो लक्षद्वयेन तु ॥१४४॥

प्रत्येकं भौमतः सूर्य-
सुतान्ते पञ्चकं विदुः ।

---

१ क० पु० भुवो लोकादिति पाठः ।

सौराल्लक्ष्येण सप्तर्षि-
वर्गस्तस्माद्ध्रुवस्तथा ॥१४५॥
ब्रह्मैवापररूपेण
ब्रह्मस्थाने ध्रुवोऽचलः ।
मेधीभूतो[1] विमानानां
सर्वेषामुपरि ध्रुवः ॥ १४६ ॥

'मातरो' ब्राह्म्याद्याः । द्वितीय इति, वायुपथे । तत्पर इति, तृतीये । अष्टाविति, नाराचादीनि । तदुक्तम्

'चतुर्थे पथि चैवात्र वसन्त्यायुधदेवताः ।
नाराचचापचक्रार्ष्टिशूलशक्तीषु सुद्वराः ॥'
(स्व० १०। ४६८)

इति । 'दिग्गजा' इति ऐरावतादयः । तदुक्तम्

'पञ्चमे पथि देवेशि वसन्त्यैरावतादयः ।
ऐरावतोऽञ्जनश्चैव वामनश्च महागजः ॥
सुप्रतीकः करीन्द्रश्च पुष्पदन्तस्तथैव च ।
कुमुदः पुण्डरीकश्च सार्वभौमोऽपि चाष्टमः ॥
दिग्गजा इति विख्याताः स्वासु दिक्षु व्यवस्थिताः ।'
(स्व० १०। ४७१)

---

१ ख० पु० मेधीभूत इति पाठः ।

इति । अन्यस्मिन्निति, सप्तमे । अन्यत्रेति, अष्टमे । वसवोऽष्टौ, रुद्रा एकादश, आदित्या द्वादश । तदुक्तम्

'अत्र चाङ्गारकः सार्पिर्नैर्ऋतः सदसत्पतिः ।
बुधश्च धूमकेतुश्च विख्यातश्च ज्वरस्तथा ॥
अजश्च भुवनेशश्च मृत्युः कापालिकस्तथा ।
एकादश स्मृता रुद्राः सर्वकामफलोदयाः ।
धाता ध्रुवश्च सोमश्च वरुणश्चानिलोऽनलः ॥
प्रत्यूषश्च प्रदोषश्च वसवोऽष्टौ प्रकीर्तिताः ॥
वसवः कथिता ह्येते आदित्यांश्च निबोध मे ।
अर्यमा इन्द्रवरुणौ पूषा विष्णुर्गभस्तिमान् ॥
मित्रश्चैव समाख्यातस्त्वजघन्यो जघन्यकः ।
विवस्वांश्चैव पर्जन्यो धाता वै द्वादश स्मृताः ॥'

(स्व० १०। ४९९)

इति । त्रिगुणमिति, सप्तविंशतिसहस्राणि । 'तपति' विश्वं प्रकाशयति इत्यर्थः । ज्ञानस्य हि प्रकाशकत्वमेव स्वभाव इति भावः । तदुक्तम्

'ज्ञानशक्तिः परस्यैषा तपत्यादित्यविग्रहा ।'

(स्व० १०। ४९८)

इति । भुवर्लोकादित्यारभ्य सूर्यादिति, भुवर्लोकान्ते स्थितात् । क्रियाशक्तिरिति, जगदाप्यायकारित्वात् । तदुक्तम्

'चन्द्ररूपेण तपति क्रियाशक्तिः शिवस्य तु ।'

(स्व० १०। ५०१)

इति । नाक्षत्रमिति, मण्डलम् । तदुक्तम्

'इन्दूर्ध्वे लक्षमात्रेण स्थितं नक्षत्रमण्डलम् ।'
(स्व० १० । ५०१)

इति । लक्षद्वयेन इत्यूर्ध्वम्; तेन नक्षत्रमण्डलादूर्ध्वं लक्षद्वयेन भौमः, ततोऽपि बुधो यावदन्ते सौरः । लक्षेण इत्यूर्ध्वम् । तदुक्तम्

'अत्रिश्चैव वसिष्ठश्च पुलस्त्यः पुलहः क्रतुः ।
भृग्वङ्गिरा मरीचिश्च ऋषयः सप्त कीर्तिताः ॥'
(स्व० १० । ५०५)

इति । तथेति, लक्षेणोर्ध्वमित्यर्थः । 'मेधीभूत' इति बन्धनस्थानतामाप्त इत्यर्थः । विमानानामिति, ग्रहादिसम्बन्धिनाम् । तदुक्त

'ब्रह्मैवापररूपेण ध्रुवस्थाने नियोजितः ।
तस्य ज्योतिर्गणो देवि निबद्धो भ्रमते सदा ॥
निश्चलः स तु विज्ञेयः शिवशक्त्या त्वधिष्ठितः ।'
(स्व० १० । ५१०)

इति ॥ १४६ ॥

अत्र बद्धत्वेऽपि एषामाधारः कः ? इत्याशङ्क्याह

अत्र बद्धानि सर्वाणय-
प्यूह्यन्तेऽनिलमण्डले ।

अनिलमण्डलानि च कियन्ति ? इत्याशङ्क्याह

स्वस्सप्त मारुतस्कन्धा
आमेघाद्याः प्रधानतः ॥ १४७ ॥

स्वरिति, स्वर्गलोके । 'आमेघाद्या' इति आमेघादामेघं तदाद्यो येषाम् । तदुक्तम्

'आमेघाद्वास्करात्सोमान्नक्षत्राद्ग्रहमण्डलात् ।
ऋषिसप्तकनिर्देशादाध्रुवान्तं च सप्तमः ॥' (स्व० १०।५१२)

इति । तथा

'पृथिव्याः प्रथमः स्कन्ध आमेघेभ्यो य आवहः ।
द्वितीयश्चापि मेघेभ्य आसूर्यात्प्रवहश्च यः ॥
सूर्यादूर्ध्वं तथा सोमादुद्वहो यस्तु वै स्मृतः ।
सोमादूर्ध्वं तथर्क्षेभ्यश्चतुर्थः संवहस्तु सः ॥
ऋक्षेभ्यश्च तथैवोर्ध्वमाग्रहाद्विवहस्तु सः ।
ऊर्ध्वं ग्रहाद्दृषिभ्यस्तु षष्ठो योऽसौ परावहः ॥
सप्तर्षिभ्यस्तथैवोर्ध्वमाध्रुवात्सप्तमस्तु सः ।
वातस्कन्धः परिवहः.....॥' (पुरा०)

इति ॥ १४७ ॥

केषां चात्र निवासः ? इत्याह

इतश्च क्रतुहोत्रादि
कृत्वा ज्ञानविवर्जिताः ।

स्वर्यान्ति तत्क्षये लोकं
मानुष्यं पुण्यशेषतः ॥१४८॥

एतत्संकलयन्नन्यदवतारयति

एवं भूमेर्ध्रुवान्तं स्या-
ल्लक्षाणि दश पञ्च च ।
द्वे कोटी पञ्च चाशीति-
र्लक्षाणि स्वर्गतो महान् ॥१४९॥
मार्कण्डाद्या ऋषिमुनि-
सिद्धास्तत्र प्रतिष्ठिताः ।
निवर्तिताधिकाराश्च[1]
देवा महति संस्थिताः ॥१५०॥
महान्तराले तत्रान्ये
त्वधिकारभुजो जनाः ।
अष्टौ कोट्यो महर्लोका-
ज्जनोऽत्र कपिलादयः ॥१५१॥
तिष्ठन्ति साध्यास्तत्रैव
बहवः सुखभागिनः ।

---

१ ग० पु० निर्वर्तितेति पाठः ।

जनात्तपोर्ककोट्योऽत्र
सनकाद्या महाधियः ॥ १५२ ॥
प्रजापतीनां तत्राधि-
कारो ब्रह्मात्मजन्मनाम् ।
ब्रह्मालयस्तु तपसः
सत्यः षोडश कोटयः ॥१५३॥
तत्र स्थितः स स्वयम्भू-
र्विश्वमाविष्करोत्यदः ।
सत्ये वेदास्तथा चान्ये
कर्मध्यानेन भाविताः ॥१५४॥
आनन्दनिष्ठास्तत्रोर्ध्वे-
कोटिर्वैरिञ्चमासनम् ।
ब्रह्मासनात्कोटियुग्मं
पुरं विष्णोर्निरूपितम् ॥१५५॥
ध्यानपूजाजपैर्विष्णो-
र्भक्ता गच्छन्ति तत्पदम् ।
वैष्णवात्सप्तकोटीभि-
र्भुवनं परमेशितुः ॥ १५६ ॥

रुद्रस्य सृष्टिसंहार-
कर्तुर्ब्रह्माण्डवर्त्मनि ।

तत्र भुवर्लोको लक्षेण, ततः सोमस्ततोऽपि नक्षत्र-मण्डलम्,-इति त्रीणि लक्षाणि । ततो भौमात्सौरान्तं प्रत्येकं लक्षद्वयेन दश, ततः सप्तर्षयो लक्षेण, ततो ध्रुवः,-इति पञ्चदश भूमेर्ध्रुवान्तं भवेत् । 'स्वर्गत' इति स्वर्लोकादारभ्येत्यर्थः । 'देवा' इति तत्तल्लोकवासिनः सङ्क्रन्दनाद्याः,

' ये निवृत्ताधिकारास्तु लोकत्रयनिवासिनः ।
सङ्क्रन्दनादयस्तेषां महर्लोके लयः स्मृतः ॥'

यदभिप्रायेणैव पूर्वं

' कूष्माण्डहाटकाद्यास्तु क्रीडन्ति महदाह्वये ।'

इत्याद्युक्तम् । 'अन्य' इति तत्तद्यज्ञानुष्ठातारः कपि-लादय इति । तदुक्तम्

' एकपादोऽथ जह्नुश्च कपिलश्चासुरिस्तथा ।
भौतिको वाडवलिश्चैव जनलोकनिवासिनः ॥' (स्व० १० । ५०८)

इति । तथा

' साध्या नाम सुरास्तस्मिन्वसन्ति सुखिनः सदा ।'

इति । अर्ककोट्यो द्वादश । ब्रह्मात्मजन्मनामित्य-र्थान्मानसानाम् । तदुक्तम्

'सनकश्च सनन्दश्च सनत्कुमारः सनन्दनः ।
शङ्कुश्चैव त्रिशङ्कुश्च तपोलोकनिवासिनः ॥'
(स्व० १०।५२०)

इति । तथा

'प्रजानां पतयस्तत्र मानसा ब्रह्मण.....।'

इति । 'आविष्करोति' इति सृजतीत्यर्थः । 'अन्ये' इति शिक्षाकल्पादयः । 'आसनम्' इति आस्यते-ऽस्मिन्निति भुवनम् । तदुक्तम्

'कर्मज्ञानेन संसिद्धा अद्वैतपरिनिष्ठिताः ।
आनन्दपदसम्प्राप्ता आनन्दपदमागताः ॥
ऋग्वेदो मूर्तिमांस्तस्मिन्निन्द्रनीलसमद्युतिः।' (स्व० १०।५२५

इति ।

'उत्तरेण यजुर्वेदः शुद्धस्फटिकसन्निभः ।' (स्व० १०।५२६)

इति ।

'स्थितः पश्चिमदिग्भागे सामवेदः सनातनः ।'
(स्व० १०।५२७)

इति ।

'अथर्वाङ्गिरवच्चूड्यामः स्थितो दक्षिणतस्तथा ।'
(स्व० १०।५२९)

इति ।

'षडङ्गानीतिहासाश्च पुराणान्यखिलानि तु ।
वेदोपनिषदश्चैव मीमांसारण्यकं तथा ॥

स्वाहाकारवषट्कारौ रहस्यानि तथैव च ।
गायत्री च स्थिता यत्र यत्र देवश्चतुर्मुखः ॥' (स्व० १० । ५३०)

इति ।

'कोटियोजनमानेन सत्यलोकोर्ध्वतः प्रिये ।
ब्रह्मासनमिति ख्यातम् ..... ॥' (स्व० १० । ५३३)

इति च । 'तत्पदम्' इति विष्णुपदम् । वैष्णवादिति, तदूर्ध्वमित्यर्थः ॥ १५६ ॥

केषां चात्र निवासः ? इत्याह

दीक्षाज्ञानविहीना ये
लिङ्गाराधनतत्पराः ॥१५७॥
ते यान्त्यण्डान्तरे रौद्रं
पुरं नाधः कदाचन ।

लिङ्गाराधनतत्परा इति, शिवधर्मोत्तरादिप्राक्रियया ॥ १५७ ॥

ननु यद्येवं तत्किमेते तत्रैवासते किमुत ततोऽप्यूर्ध्वं यान्ति ? इत्याशङ्क्याह

तत्स्थाः सर्वे शिवं यान्ति
रुद्राः श्रीकण्ठदीक्षिताः ॥१५८॥

अधिकारत्रये साकं
रुद्रकन्यागणैन ते ।

शिवमिति परं, 'यान्ति' इति तदैकात्म्यापत्त्या मुच्यन्ते इत्यर्थः ॥

नन्वेवं माहात्म्यवत्किमेतदेव भुवनमस्ति उत भुवनान्तराण्यपि ? इत्याह

पुरं पुरं च रुद्रोर्ध्व-
मुत्तरोत्तरवृद्धितः ॥१५९॥

तदाह

ब्रह्माण्डाधश्च रुद्रोर्ध्वं
दण्डपाणेः पुरं स च ।
शिवेच्छया हणात्यण्डं
मोक्षमार्गं करोति च ॥१६०॥
शर्वरुद्रौ भीमभवा-
वुग्रो देवो महानथ ।
ईशान इति भूर्लोकात्
सप्त लोकेश्वराः शिवाः ॥१६१॥

'ब्रह्माण्ड' इति तत्कर्परिक्राध इत्यर्थः । 'हणाति'

इति खण्डयति विगतावरणं करोतीत्यर्थः । 'देवो महान्' इति महादेवः । भूर्लोकादित्यारभ्य, तेन भूर्लोके शर्वोऽधिपतिर्यावत्सत्यलोके ईशानः,—इति क्रमः । पशुपतिस्तु रुद्रलोकेऽधिपतिरित्यर्थसिद्धम् ॥ १६१ ॥

अत्र च लोकानां परापरत्वमप्यस्तीत्याह

स्थूलैर्विशेषैरारब्धाः
सप्त लोकाः परे पुनः ।
सूक्ष्मैरिति गुरुश्चैव
रुरौ सम्यङ्न्यरूपयत् ॥१६२॥

विशेषैरिति भूतैः, सूक्ष्मैरिति अविशेषैस्तन्मात्रैः। तदाहुः

'तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः ।
एते स्मृता विशेषा ..... ॥' (सां० ३८ का०)

किमत्र प्रमाणम्,—इत्याशङ्क्योक्तम् 'इति गुरुश्चैव रुरौ सम्यङ्न्यरूपयत्' इति ॥१६२॥

तदाह

ये ब्रह्मणादिसर्गे
स्वशरीरान्निर्मिताः प्रभूताख्याः ।

स्थूलाः पञ्च विशेषाः
सप्तामी तन्मया लोकाः ॥१६३॥
परतो लिङ्गधारैः
सूक्ष्मैस्तन्मात्रजैर्महाभूतैः ।
लोकानामावरणै-
र्विष्टभ्य परस्परेण गन्धाद्यैः ॥१६४॥

लिङ्गधारैः शरीराश्रयैः; अत एव लोकावरणे कारणभूतैरित्यर्थः । 'विष्टभ्य परस्परेण' इति सामान्यविशेषरूपतया परस्परावष्टम्भेन अवस्थितैरित्यर्थः ॥१६४॥

एतदेव संकलयति

कालाग्नेर्दण्डपर्यन्त-
मष्टानवतिकोटयः ।
अत ऊर्ध्वं कटाहोऽण्डे
स घनः कोटियोजनम् ॥१६५॥
पञ्चाशत्कोटयश्चोर्ध्वं
भूपृष्ठादधरं तथा ।

तत्र अधस्ताद् भूकटाहान्तं पञ्चाशत्कोटयः

सङ्कलिताः, ऊर्ध्वं तु भूपृष्ठाद्ध्रुवान्तं पञ्चदश लक्षाणि, महान् सपञ्चाशीतिलक्षे द्वे कोटी, जनोऽष्टौ, तपो द्वादश, सत्यः षोडश, ब्राह्मं भुवनमेकं, वैष्णवं द्वे, रौद्रं सप्त, कटाह एकः,— इत्येवं पञ्चाशत्कोटयः ॥ १६५ ॥

एतदेव उपसंहरति

एवं कोटिशतं भूः स्यात्
सौवर्णस्तण्डुलस्ततः ॥ १६६ ॥
शतरुद्रावधिर्हुंफट्
भेदयेत्तत्तु दुःशमम् ।

तण्डुल इति वर्तुलाकारत्वात् स एवेत्यर्थः । 'तत' इति विस्तीर्णः; अत एव शतरुद्रावधिरित्युक्तम् । दुःशममिति, वज्रसाराधिकसारत्वात् देवैरपि दुर्भेद्यमित्यर्थः । तदुक्तम्

'एवं कोटिशतं ज्ञेयं पार्थिवं तत्त्वमुच्यते ।
शतरुद्रावधि ज्ञेयं सौवर्णं परिवर्तुलम् ॥
वज्रसाराधिकसारं दुर्भेद्यं त्रिदशैरपि ।
हुंफट्कारप्रयोगेण भेदयेत्तु वरानने ॥'
(स्व० १० । ६२१)

इति ॥ १६६ ॥

ननु शतरुद्राः कुत्रावस्थिता, यदवधिकत्वमपि अस्योच्यते, --इत्याशङ्क्याह

प्रतिदिक्कं दश दशे-
त्येवं रुद्रशतं बहिः ॥ १६७ ॥
ब्रह्माण्डाधारकं तच्च
स्वप्रभावेण सर्वतः ।

यदुक्तम्

'दश दश क्रमेणैव दशदिक्षु समन्ततः ।
पूर्वादिक्रमयोगेन कथयाम्यनुपूर्वशः ॥
कपालीशो ह्यजो बुध्नो वज्रदेहः प्रमर्दनः ।
विभूतिरव्ययः शास्ता पिनाकी त्रिदशाधिपः ॥'
(स्व० १० । ६२३)

इति ।

'अग्निरुद्रो हुताशी च पिङ्गलः खादको हरः ।
ज्वलनो दहनो बभ्रुर्भस्मान्तकक्षयान्तकौ ॥'
(स्व० १० । ६२५)

इति ।

'याम्यो मृत्युर्हरो धाता विधाता कर्तृसंज्ञकः ।
संयोक्ता च वियोक्ता च धर्मो धर्मपतिस्तथा ॥'
(स्व० १० । ६२७)

इति ।

नैर्ऋतो दारुणो हन्ता क्रूरदृष्टिर्भयानकः ।
ऊर्ध्वकेशो विरूपाक्षो धूम्रो लोहितदंष्ट्रकौ ॥'
(स्व० १० । ६२९)

इति ।

'बलो हृच्चतिबलश्चैव पाशहस्तो महाबलः ।
श्वेतोऽथ जयभद्रश्च दीर्घबाहुर्जनान्तकः ॥
मेघनादी सुनादी च.....।'
(स्व० १० । ६३२)

इति ।

शीघ्रो लघुर्वायुवेगः सूक्ष्मस्तीक्ष्णो भयानकः ।
पञ्चान्तकः पञ्चशिखी कर्पदी मेघवाहनः ॥'
(स्व० १० । ६३४)

इति ।

'निधीशो रूपवान्धन्यः सौम्यदेहो जटाधरः ।
लक्ष्मीरत्नधरौ कामी प्रसादश्च प्रभासकः ॥'
(स्व० १० । ६३६)

इति ।

'विद्याधिपोऽथ सर्वज्ञो ज्ञानदृग्वेदपारगः ।
शर्वः सुरेशो ज्येष्ठश्च भूतपालो बलिः प्रियः ॥'
(स्व० १० । ६३८)

इति ।

'वृषो वृषधरोऽनन्तोऽक्रोधनो मारुताशनः ।
ग्रसनो डम्बरेशौ च फणीन्द्रो वज्रदंष्ट्रकः ॥'
(स्व०१० । ६४०)

इति ।

'शम्भुर्विभुर्गणाध्यक्षस्त्र्यक्षस्तु त्रिदशेश्वरः ।
संवाहश्च विवाहश्च नभो लिप्सुस्त्रिलोचनः ॥
(स्व० १० । ६४२)

इति ।

'शतरुद्रा इति ख्याता ब्रह्माण्डं व्याप्य संस्थिताः ।'
(स्व० १० । ६४४)

इति । 'स्वप्रभावेण' इति स्ववीर्यमाहात्म्यादित्यर्थः ॥

ननु अण्डं नाम किमुच्यते यदपि ब्रह्मसम्बन्धि स्यात् ? इत्याशङ्क्याह

अण्डस्वरूपं गुरुभि-
श्चोक्तं श्रीरौरवादिषु ॥ १६८ ॥

तद्ग्रन्थमेव पठति

व्यक्तेरभिमुखीभूतः
प्रच्युतः शक्तिरूपतः ।
आवापवाननिर्भक्तो
वस्तुपिण्डोऽण्ड उच्यते ॥१६९॥
तमोलेशानुविद्धस्य
कपालं सत्त्वमुत्तरम् ।

---

१ क० पु० व्यक्तावभि इति पाठः ।

रजोऽनुविद्धं निर्मृष्टं
सत्त्वमस्याधरं तमः ॥ १७० ॥

तत्राद्यं श्लोकं विषमत्वात्स्वयमेव व्याचष्टे

वस्तुपिण्ड इति प्रोक्तं
शिवशक्तिसमूहभाक् ।
अण्डः स्यादिति तद्व्यक्तौ
संमुखीभाव उच्यते ॥१७१॥

तथापि शिवमग्नानां
शक्तीनामण्डता भवेत् ।
तदर्थं वाक्यमपरं
ता हि न च्युतशक्तितः ॥ १७२ ॥

तन्वत्त्वादौ मा प्रसाङ्क्षी-
दण्डतेति पदान्तरम् ।
तन्वत्त्वादिषु नैवास्ते
कस्याप्यावापनं यतः ॥ १७३ ॥

तन्वत्त्वसमुदायत्वे
कथमेकत्वमित्यतः ।

अनिर्भक्त इति प्रोक्तं
साजात्यपरिदर्शकम् ॥ १७४ ॥

अण्डो हि नाम 'वस्तूनां' तन्वत्तादीनां 'पिण्डः' समुदाय उच्यते, तदस्य लक्षणमित्यर्थः। एवमुक्ते हि शिवस्यापि

'शक्तयोऽस्य जगत्कृत्स्नं..... ।'

इत्याद्युक्त्या तन्वादिशक्तिसमुदायभात्तवात् तत्त्वं प्रसज्यते,—इति तस्याण्डस्य व्यक्तौ संमुखीभाव इदंप्रथमतया बहिरवभासो न तु पूर्वमपि,—इति 'व्यक्तेरभिमुखीभूत' इत्यनेनोच्यते येनैवमतिव्याप्तिर्न स्यात्, स हि 'सकृद्विभातोऽयमात्मा' इति न्यायात् सर्वदैवावभासमानः । एवमपि शक्तिमदैकात्म्यभाजः शक्तिसमूहस्याण्डत्वं प्रसक्तं भवेत्। तासां हि शक्तीनां तत्तदर्थात्मना कादाचित्क एव बहिरभिव्यक्तौ संमुखीभावः, तन्निवृत्त्यर्थं वाक्यान्तरस्योपादानं 'प्रच्युतः शक्तिरूपत' इति । स हि व्यक्त्यभिमुखीभूतत्वादेव शक्त्यात्मनः सूक्ष्मादूपात् 'प्रच्युतः' स्थूलतया व्यक्तेरात्मना बहिः

प्रथित इत्यर्थः । शक्तीनां तु व्यक्तावभिमुखीभावेऽपि न शक्तिरूपतः प्रच्यावः स्वरूपविप्रलोपप्रसङ्गात् । एवमपि तन्वच्चादावणडता मा प्रसक्ता भूदिति पदान्तरमुपात्तम् । 'आवापवान्' इति । आवापो वस्त्वन्तरप्रक्षेपो विद्यते यस्य स तथा, चतुर्दशविधस्य भूतजातस्य तासु तासु योनिष्वावापनात्; तन्वादौ पुनरेतन्नास्ति अन्याश्रितत्वात्, तथात्वे चान्याश्रयत्वानुपपत्तेः । ननु एवमपि तन्वादीनामानैक्यात् समुदायरूपतया कथमस्यैकत्वेन निर्देशः स्यात्,—इत्युक्तम् 'अनिर्भक्त' इति, तद्विभागाप्रतिपत्तेरेकत्वानुप्राणकं साजात्यमेव परिदर्शयति येनास्य नगरादिज्ञानवदेकत्वमेव न्याय्यं स्यात् ॥ १७४ ॥

ननु यद्येवं तत्प्रतितत्त्वमणडत्वं स्यात्,—इत्येतद्व्यावर्तनाय वस्तुपिण्डपदस्याप्युपादानम्, इत्याह

विनापि वस्तुपिण्डाख्य-
पदेनैकैकशो भवेत् ।
तत्त्वेष्वणडस्वभावत्वं
नन्वेवमपि किं न तत् ॥ १७५ ॥

गुणतन्मात्रभूतौघ-
मये तत्त्वे प्रसज्यते ।
उच्यते वस्तुशब्देन
तन्वक्षभुवनात्मकम् ॥ १७६ ॥
रूपमुक्तं यतस्तेन
तत्समूहोऽण्ड उच्यते ।

वस्तुशब्देन हि तन्वादिवत् तत्त्वान्यपि उच्यन्ते, तत्तेषामपि पिण्डोऽण्डः,—इति तत्कथं स्यात्; एवं तर्हि पृथ्वीतत्त्वस्यापि एककस्याण्डत्वमनभिधानीयम्, अभिधाने वा प्रत्येकमपि तथात्वम्,—इति व्यर्थमेव वस्तुपिण्डपदोपादानम् । सत्यं, किंतु पृथ्वीतत्त्वं स्थौल्यस्य परा कोटिः, इति तत्र तत्त्वान्तराण्यपि अन्तरवस्थितानि प्रत्यक्षमभिलक्ष्यन्ते,—इत्येकत्वेऽपि अस्य अनेकतत्त्वमयत्वमिवास्ति इत्युक्तम् । यदाहुः 'ब्रह्माण्डं च पञ्चभूतात्मकम्' इति । एवं तर्हि सर्वत्र सर्वमस्ति,—इति पृथ्वीतत्त्वस्यापि तत्त्वान्तरेषु सद्भावः,—इति पुनरपि तदवस्थ एव स दोषः । सत्य, तथापि पृथ्व्यादीनामूर्ध्वं

तत्त्वान्तरेषु सूक्ष्मेण रूपेणावस्थितिः, अत्र तु तेषां स्थूलेनेति शेषः। नन्वेवमपि अनेकानि वस्तूनि संभवन्ति,—इति वस्तुशब्देन सत्त्वादयः शब्दादयो वा गुणा अपि उच्यन्ते,—इति तत्पिण्डात्मनि प्रकृत्यादौ तत्त्वेऽपि अण्डत्वं स्यात्,—इत्याशङ्कां दर्शयति 'नन्वेवमित्यादिना'। गुणेति प्रकृतिः। इदमत्र प्रतिसमाधानं यद्वस्तुशब्दस्य विशेषेण धर्मरूपे प्रतिनियते तन्वादावेव वाचकत्वमत्र विवक्षितं न तु सामान्येन,—इति तत्समुदाय एव न तु सत्त्वादिसमुदायोऽपि अण्ड उच्यते इति ॥ १७६ ॥

अत्र च यथासंभवमाशङ्का निराकृतैव,—इत्याह

भवेच्च तत्समूहत्वं
पत्युर्विश्ववपुर्भृतः ॥ १७७ ॥
तदर्थं भेदकान्यन्या-
न्युपात्तानीति दर्शितम्।

पत्युश्च तत्समूहत्वसद्भावे विश्ववपुर्धारित्वं हेतुः। 'भेदकानि' इति, व्यावर्तकानि ॥ १७७ ॥

अन्ये पुनरेतदन्यथा व्याचख्युरित्याह

तावन्मात्रास्ववस्थासु
मायाधीनेऽध्वमण्डले ॥ १७८ ॥
मा भूदण्डत्वमित्याहु-
रन्ये भेदकयोजनम् ।

'तावन्मात्रासु' इति तन्त्रादिषु । द्वितीयस्तु सुगमत्वात् स्वयं न व्याकृतः,—इति व्याख्यायते—तस्य चाण्डस्य तमोलेशानुविद्धस्य यदुत्तरमुपरितनं कपालं तद्रजोऽनुविद्धं सत्त्वं, गुणान्तरानुवेधेऽपि तत्प्रधानमित्यर्थः । अधरं पुनः कपालं 'निर्मृष्टसत्त्वं' सत्त्वाख्यगुणशून्यं रजोऽनुविद्धं, तमःसंभेदेऽपि तत्प्रधानमेवेत्यर्थः । मध्यं तु रजःप्रधानमित्यर्थसिद्धम् । यदाहुः

ऊर्ध्वं सत्त्वविशालस्तमोविशालस्तु मूलतः सर्गः ।
मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः ॥'

(सां० ५५ का०)

इति ॥१७८॥

एवं प्रकरणादण्डस्वरूपं व्याख्याय प्रकृतमेवानुसरति

इत्थमुक्तविरिञ्चाण्ड-
मृतो रुद्राः शतं हि यत् ॥१७६॥
तेषां स्वे पतयो रुद्रा
एकादश महार्चिषः ।

एकादशेति, प्रतिदिशमेकः सर्वेषां चैकः, इति । तदुक्तम्

'स्थितो वै पूर्वतोऽण्डस्य श्वेतः ....।'

(स्व० १० । ६४६)

इति ।

'आग्नेय्यामग्निसंकाशो वैद्युतः ...।'

(स्व० १० । ६४८)

इति ।

'याम्येऽण्डस्य महाकालः ....।'

(स्व० १० । ६४९)

इति ।

'नैर्ऋते विकटो नाम ...।'

(स्व० १० । ६५०)

इति ।

'पश्चिमेऽण्डस्य यो रुद्रो महावीर्य इति स्मृतः ।'

(स्व० १० । ६५१)

इति ।

'वायव्यां दिशि चाण्डस्य वायुवेगः ....।'

(स्व० १० । ६५२)

इति ।

'सुभद्रनामोत्तरतः ...।'

(स्व० १० । ६५३)

इति ।

'विद्याधरो नाम रुद्र ऐशान्याम् ....।'

(स्व० १० । ६५४)

इति ।

'अधः कालाग्निरुद्रोऽन्यः ....।'

(स्व० १० । ६५६)

इति ।

'एतैः समावृतो रुद्रो ....।'

(स्व० १० । ६५७)

इत्युपरिष्टात् ।

'वीरभद्रो वृतो रुद्रैरुपर्यण्डस्य संस्थितः ।'
'एकादशो महाकायैः..... ।'

(स्व० १० । ६५८)

इति च । श्रीपूर्वशास्त्रे पुनरियान्विशेषो यत् तत्रैषां प्रतिदशकं तन्मध्यादेव एक एकः पतिः, इति । वीरभद्रस्तु उभयथाप्यविशिष्टः ॥१७६॥

तदाह

अनन्तोऽथ कपाल्यग्नि-
र्यमनैर्ऋतकौ बलः ॥१८०॥
शीघ्रो निधीशो विद्येशः
शम्भुः सवीरभद्रकः ।

श्रीवीरभद्रस्य सत्त्वं सर्वाधिपत्यात् । तदुक्तं तत्र

'अनन्तः प्रथमस्तेषां कपालीशस्तथा परः ।
अग्निरुद्रो यमश्चैव नैर्ऋतो बल एव च ॥
शीघ्रो निधीश्वरश्चैव सर्वविद्याधिपोऽपरः ।
शंभुश्च वीरभद्रश्च विधूमज्वलनप्रभाः ॥'

(मा० वि० ५।१४)

इति ॥१८०॥

कथं चैषामत्रावस्थानमित्याह

मधु मधुकृतः कदम्बं
केसरजालानि यद्वदावृणते ॥१८१॥
तद्वत्ते शिवरुद्रा
ब्रह्माण्डमसंख्यपरिवाराः ।
शराष्टनियुतं कोटि-
रित्येषां सन्निवेशनम् ॥१८२॥

श्रीकण्ठाधिष्ठितास्ते च
सृजन्ति संहरन्ति च ।
ईश्वरत्वं दिविषदा-
मिति रौरववार्तिके ॥१८३॥

तदुक्तम्

'आवृत्याण्डं स्थिता ह्येते मधु यद्वन्मधुव्रताः ।
कदम्बकुसुमं यद्वत्केसरैः परिवारितम् ॥'

इति । 'शराः' पञ्च, 'नियुतं' दश लक्षाणि । तेन पञ्चाशीतिः सहस्राणि दश लक्षाणि कोटिश्चैका तद्भुवनानां प्रत्येकं प्रमाणमिति । अत्र च किं प्रमाणम्,—इत्युक्तम् 'इति रौरववार्तिके' इति । तदुक्तं तत्र

'पञ्चाशीतिर्योजनानां नियुतानां तथा परा ।
कोटिश्च तन्निवेशस्य विस्तारः परिकीर्तितः ॥'

इति ।

'श्रीकण्ठाधिष्ठितास्ते च देवानां मनसेप्सितम् ।
ऐश्वर्यं संप्रयच्छन्ति हरन्ति च महौजसः ॥'

इति च ॥१८३॥

अत्र चेयानन्यत्र विशेषः, इत्याह

सिद्धातन्त्रे तु हेमाण्डा-
च्छतकोटेर्बहिः शतम् ।

अण्डानां क्रमशो द्विद्वि-
गुणं रूप्यादियोजितम् ॥१८४॥
तेषु क्रमेण ब्रह्माणः
संस्युर्द्विगुणजीविताः ।
क्षीयन्ते क्रमशस्ते च
तदन्ते तत्त्वमम्मयम् ॥१८५॥

शतमिति, संख्योपलक्षणपरमेषामसंख्यत्वात् । यदुक्तम्

'पृथग्द्वयमसंख्यातमेकैकं च पृथग्द्वयम् ।'

(मा ० वि० २।५०)

इति । 'द्विद्विगुणम्' इति द्विशतकोटिचतुःशतकोटयादि । 'रूप्यादि' इत्यादिशब्दात्ताम्रादियोजितत्वम् । द्विगुणजीविता इत्याद्यब्रह्मापेक्षया । तदुक्तं तत्र

'ऊर्ध्वं कालानलं नाम ब्रह्माण्डं द्विगुणं स्थितम् ।
तावद्यावच्छत पूर्णमण्डानां ब्रह्मणां तथा ॥
शृद्विस्तेषु स्मृता देवि द्विगुणा वीरवन्दिते ।
द्विगुणं च भवेदायुः प्रथमात्पद्मजन्मनः ॥
अधुना संप्रवक्ष्यामि अण्डानां नामगोचरम् ।
काञ्चनं कालसंज्ञं च वेतालं च महोदरम् ॥'

इत्यादि ।

'गह्वरं शतमं विद्धि सर्वेषामुपरि स्थितम् ।

इत्यन्तम् । तथा

'प्रथमं काञ्चनं प्रोक्तं रौक्मं चैव द्वितीयकम् ।
ताम्रं च लोहजं चैव क्रमादेवं व्यवस्थिताः ॥
महाकल्पे क्षयं यान्ति सदेवाः सपितामहाः ।
अन्तराक्षीयते ह्येकं महाकल्पशते शते ॥
तावद्यावत्स्थितं शेषं गह्वरं तु महाण्डकम् ।
महाक्षये क्षयस्तस्य सामान्येनैव लुप्यते ।'

इति ॥ १८५ ॥

एवं तत्त्वान्तराणामपि उत्तरोत्तरवृद्ध्या मानं समस्ति, इत्याह

धरातोऽत्र जलादि स्या-
दुत्तरोत्तरतः क्रमात् ।
दशधाहङ्कृतान्तं धी-
स्तस्याः स्याच्छतधा ततः ॥ १८६ ॥
सहस्रधा व्यक्तमतः
पौंस्नं दशसहस्रधा ।
नियतिर्लक्षधा तस्मा-
त्तस्यास्तु दशलक्षधा ॥ १८७ ॥

कलान्तं कोटिधा तस्मा-
न्माया विद्दशकोटिधा ।
ईश्वरः शतकोटिः स्या-
त्तस्मात्कोटिसहस्रधा ॥ १८८ ॥
सादाख्यं व्यश्नुते तच्च
शक्तिर्वृन्देन संख्यया ।
व्यापिनी सर्वमध्वानं
व्याप्य देवी व्यवस्थिता ॥ १८९ ॥
अप्रमेयं ततः शुद्धं
शिवतत्त्वं परं विदुः ।

उत्तरोत्तरत इति, यथा धरातो जलं दशगुणं, ततोऽपि तेजो यावदन्तेऽहङ्कारः । 'तस्या' इति अहङ्क्रियायाः । 'वित्' इति विद्या । 'व्यश्नुते' व्याप्नोतीत्यर्थः । सर्वमिति, शक्त्यादिधरान्तम् । तदुक्तम्

'अधोपरिष्टात्तत्त्वानि उदकादिशिवान्तकम् ।
उत्तरोत्तरयोगेन दशधा संस्थितानि तु ॥
अहङ्कारस्तदूर्ध्वं तु बुद्धिस्तु शतधा स्थिता ।
ऊर्ध्वं सहस्रधा ज्ञेयं प्रधानं वरवर्णिनि ॥

पौरुषं दशसाहस्रं नियतिर्लक्षधा स्मृता ।
तदूर्ध्वं दश लक्षाणि कला यावत्तु सुव्रते ॥
माया तु कोटिधा व्याप्य स्थिता सर्वं चराचरम् ।
दशकोटिगुणा विद्या मायां व्याप्य व्यवस्थिता ॥
शतकोटिगुणेनैव व्याप्तासावीश्वरेण तु ।
सादाख्यं कोटिसाहस्रं बिन्दुनादं तदूर्ध्वतः ॥
योजनानां तु वृन्दं वै शक्तिर्व्याप्य व्यवस्थित[1] ।
व्यापिनी सर्वमध्वानं व्याप्य देवी व्यवस्थिता ॥
अप्रमेयं ततो ज्ञेयं शिवतत्त्वं वरानने ।'

(स्व० १० । ६७३)

इति ॥ १८९ ॥

एतच्चान्यत्र न क्वचिदपि दृष्टम्,—इत्यतः परं मोक्षस्य न कारणमित्याह

जलादेः शिवतत्त्वान्तं
न दृष्टं केनचिच्छिवात् ॥ १९० ॥
ऋते ततः शिवज्ञानं
परमं मोक्षकारणम् ।

किमत्र प्रमाणम्, इत्याशङ्क्याह

तथा चाह महादेवः
श्रीमत्स्वच्छन्दशासने ॥१९१॥

तदेव अर्थद्वारेण पठति

नान्यथा मोक्षमायाति
पशुर्ज्ञानशतैरपि ।
शिवज्ञानं न भवति
दीक्षामप्राप्य शाङ्करीम् ॥ १९२ ॥

प्राक्तनी पारमेशी सा
पौरुषेयी च सा पुनः ।

दीक्षामप्राप्येति, यदुक्तम्

'न चाधिकारिता दीक्षां विना योगेऽस्ति शाङ्करे ।'
(मा० वि० ४ । ६)

इति । प्राक्तनीति, तत्तज्जन्मान्तरीयाभ्यासबलाद् अनुपायरूपतामापेत्यर्थः । 'पारमेशी' इति विद्येश्वरादिवत् साक्षात्परमेश्वरकर्तृका । 'पौरुषेयी' इति शास्त्रक्रमेणाचार्यकर्तृका । तदुक्तं तत्र

'यत्र दृष्टं पशुज्ञानैः कुपथभ्रान्तदृष्टिभिः ।'
(स्व० १० । ६७४)

इत्याद्युपक्रम्य

'विना प्रसादादीशस्य ज्ञानमेतन्न लभ्यते ।
न चापि भावो भवति दीक्षामप्राप्य देहिनाम् ॥

यदा तु कारणाच्छक्तिर्भवेन्निर्वाणकारिका ।
शिवेच्छया प्रपद्येत दीक्षां ज्ञानमयीं शुभाम् ॥
मन्त्रयोगात्मिकां दिव्यां ततो मोक्षं व्रजेत्पशुः ।
नान्यथा मोक्षमाप्नोति पशुर्ज्ञानशतैरपि ॥
यस्य प्रकाशितं सर्वं शिवेनानन्तरूपिणा ।
स एव मोक्षं व्रजति शिवः साक्षान्महेश्वरः ॥[1]
तेनेदं ज्ञानमुख्यं तु पुरा प्रोक्तं मया तव ।'

(स्व० १० । ७०६)

इति ॥ १९२ ॥

इदानीमसत्त्वे भुवनानि वक्तुमुपक्रमते

शतरुद्रोर्ध्वतो भद्र-
कालया नीलप्रभं जयम् ॥१९३॥
न यज्ञदानतपसा
प्राप्यं कालयाः पुरं जयम् ।
तद्भक्तास्तत्र गच्छन्ति
तन्मण्डलसुदीक्षिताः ॥ १९४ ॥

'नील' इति इन्द्रनीलम् । तन्मण्डलसुदीक्षिता इति, 'अतो भुवनभर्तरि' इत्याद्युक्त्या तद्भुवनं प्राप्तुमित्यर्थः ॥ १९४ ॥

---

१ ग० पु० सर्वमहेश्वर इति पाठः ।

ननु किं तत्प्राप्त्येत्याशङ्क्याह

निर्बीजदीक्षया मोक्षं
ददाति परमेश्वरी ।

नन्वसत्त्वावास्थितैतद्भुवनमात्रप्राप्त्या कथमेवम्? इत्याशङ्क्याह

विद्येशावरणे दीक्षां
यावतीं कुरुते नृणाम् ॥ १९५ ॥
तावतीं गतिमायान्ति
भुवनेऽत्र निवेशिताः ।

इयं हि भगवती

'सा देवी सर्वदेवीनां नामरूपैश्च तिष्ठति ।
योगमायाप्रतिच्छन्ना कुमारी लोकभावनी ॥
अचिन्त्या चाप्रमेया च ..... ।' (स्व० १० । ७२७)

इत्युक्त्या सर्वोत्कृष्टा, येनैवमत्र माहात्म्यमुक्तम् ॥१९५॥

ततः कोट्या वीरभद्रो
युगान्ताग्निसमप्रभः ॥ १९६ ॥
विजयाख्यं पुरं चास्य
ये स्मरन्तो महेश्वरम् ।

जलेषु मरुषु चाग्नौ
शिरश्छेदेन वा मृताः ॥१६७॥
ते यान्ति बोधमैशानं
वीरभद्रं महाद्युतिम् ।
वैरभद्रोर्ध्वतः कोटि-
र्विष्कम्भाद्विस्तृतं त्रिधा ॥१६८॥
रुद्राण्डं सालिलं त्वण्डं
शक्रचापाकृति स्थितम् ।

'मरुषु'इति महापथे महेश्वरं स्मरन्तो मृताः, इति सर्वत्र संबन्धः । अन्यथा हि वैद्युतं यान्ति,—इति पूर्वमुक्तम् । 'ऐश्वरं बोधं' रौद्रं तेजः, स हि रुद्रक्रोधादुद्भूत इति भावः । 'वैरभद्रोर्ध्वत' इति वीरभद्रसंबन्धिनो विजयाख्यात्पुरादूर्ध्वमित्यर्थः । 'सालिलमण्डम्' अम्मयमावरणं, तत्प्रधानं भुवनमिति यावत् । अत एवासत्त्वीयानां समस्तानां भुवनानामूर्ध्वं तेजस्तत्त्वस्य चाधःस्थितं तच्चाण्डं 'रुद्राण्डं' तच्छब्दव्यपदेश्यम् । अत्रापि च वीरभद्राख्य एवासौ भगवान्महात्मा रुद्रः सूक्ष्मरूपेणास्ते,--इत्यभिप्रायः ।

तच्च विष्कम्भात्कोटिः, ऊर्ध्वमेतन्मानामित्यर्थः । विस्तृतं त्रिधेति, तिर्यक्कोटित्रयपरीमाणमित्यर्थः । एतच्च निखिलाप्तत्त्वापेक्षया न व्याख्येयं, तन्मानस्य धरापेक्षया दशगुणत्वेन प्रागेवोक्तत्वात् । यदुक्तम्

'भुवनस्यास्य देवेशि ह्युपर्यावरणं महत् ।
अम्मयं तु घनं चापि शक्रचापाकृति स्थितम् ॥
वितानमिव तद्भद्रमन्तरे समवस्थितम् ।
तत्र चास्ते महात्मासावङ्गुष्ठाग्रप्रमाणकः ।
तत्र योजनकोटिर्वै विष्कम्भादूर्ध्वमुच्यते ।
तिर्यक्त्रिगुणविस्तारमाप्यमावरणं प्रिये ॥'

(स्व० १० । ७५८)

इति ।

'रुद्राण्ड इति विख्यातं रुद्रलोक इति प्रिये ।'

(स्व० १० । ७५९)

इति च । एवमिति सिद्धम्—यदप्तत्त्वस्यारम्भ एव भद्रकाल्या भुवनम्, अत एव तत्र 'शतरुद्रोर्ध्वत' इत्युक्तं, प्रान्ते तु वीरभद्रस्य स्थूलसूक्ष्मतया पुरद्वयमिति ॥१९८॥

तन्मध्ये तु भुवनान्तराणि किं स्थितानि न वा ? इत्याशङ्क्याह

CENTRAL ARCHAEOLOGICAL LIBRARY New Delhi

आ वीरभद्रभुवना-
द्भद्रकाल्यालयात्तथा ॥ १९९ ॥
त्रयोदशभिरन्यैश्च
भुवनैरुपशोभितम् ।

आङ्शब्दो मर्यादायां, तेन भद्रकाल्यालयादारभ्य वीरभद्रभुवनं यावत् अर्थात् भद्रकाल्यालयेन सह त्रयोदश भुवनान्यवस्थितानीत्यर्थः । उपशोभितमिति, अर्थादसत्त्वम्, एवं-पाठ एव च आगम इति उद्द्योतकारव्याख्यया न भ्रमितव्यम् ॥ १९९ ॥

तान्येवाह

ततो भुवः सहाद्रेः पू-
र्गन्धतन्मात्रधारणात् ॥ २०० ॥
मृता गच्छन्ति तां भूमिं[1]
धरित्र्याः परमां बुधाः ।
अब्धेः पुरं ततस्त्वाप्यं
रसतन्मात्रधारणात् ॥ २०१ ॥
ततः श्रियः पुरं रुद्र-
क्रीडावतरणेष्वथ ।

१ क० पु० तां भूतिमिति पाठः ।

प्रयागादौ श्रीगिरौ[1] च
विशेषान्मरणेन तत् ॥ २०२ ॥
सारस्वतं पुरं तस्मा-
च्छब्दब्रह्मविदां पदम् ।
रुद्रोचितास्ता मुख्यत्वा-
द्रुद्रेभ्योऽन्यास्तथा स्थिताः ॥२०३॥
पुरेषु बहुधा गङ्गा
देवादौ श्रीः सरस्वती ।
लकुलाद्यमरेशान्ता
अष्टावप्सु सुराधिपाः ॥ २०४ ॥

'सह्राद्रेः' इति मेर्वादिप्रागुक्तपर्वतयुक्ताया इत्यर्थः । 'रसतन्मात्रधारणात्' इति रसतन्मात्रधारणयेत्यर्थः । मृता गच्छन्ति,—इति प्राच्येन संबन्धः । रुद्रस्य क्रीडयावतरणेषु न तु अनुजिघृक्षया, तत्र हि नैतावन्मात्रप्राप्तिर्भवेदिति भावः एतच्चाग्रत एव व्यक्तीभविष्यति,—इति नेह्यायस्तम् । 'तत्' श्रियः

---

१ ग० पु० श्रीकुरौ चेति पाठः ।

पुरं, गच्छन्तीति प्राच्येन संबन्धः । 'शब्दब्रह्मविदाम्' इति गीतज्ञानां वाक्तत्त्वधारणानिष्ठानां च । तदुक्तम्

'हाहा हूहूश्चित्ररथस्तुम्बुरुर्नारदस्तथा ।
विश्वावसुर्विश्वरथो दिव्यगीतविचक्षणाः ॥
संयोज्य मनसात्मानं त्यक्त्वा कर्मफलस्पृहाम् ।
ते वै सारस्वतं स्थानं प्राप्ता वै सुरपूजिते ॥
ये च वाग्धारणां ध्यात्वा प्राणान्मुञ्चन्ति देहिनः ।
ते वै सारस्वतं लोकं प्राप्नुवन्ति नरोत्तमाः ॥'

(स्व० १० । ८४३)

इति । 'अप्सु' इत्यनेन तत्त्वयोजनाख्यमपि प्रमेयमुद्दिङ्कितम्, एवमुत्तरत्रापि ज्ञेयम् । अष्टावित्यनेन भद्रकाल्या भुवोऽब्धेः श्रियः सरस्वत्याश्च भुवनानां पञ्चकेन सह त्रयोदश भवन्ति,—इति प्रागुपक्रान्तायाः संख्याया अपि संकलनं स्मारितम् । तदुक्तम्

'नकुली भारभूतिश्च दिण्ड्याषाढी च पुष्करः ।
नैमिषश्च प्रभासश्च अमरेशस्तथाष्टमः ॥
एतत्पैत्यष्टकं प्रोक्तम्[1] .... ।'

(मा० वि० ५ । १७)

इति । श्रीस्वच्छन्दशास्त्रे पुनरेषाम्

'अमरेशं प्रभासं च नैमिषं पुष्करं तथा
आषाढिं दिण्डिमुण्डं च भारभूतिं च लाकुलम् ॥

---

१ प्रत्यात्मकं प्रोक्तमिति श्रीमालिनीविजयपाठः ।

गुह्याष्टकमिति ख्यातं जलावरणगं प्रिये ।'

(स्व० १० । ८५४)

इत्यादिनान्यथा पाठः । इह श्रीस्वच्छन्दशास्त्रानुसारं प्रक्रमेऽपि सर्वत्र पूर्वशास्त्रप्रक्रिययैषां पाठेऽयमाशयो—यदेतदेव भुवनेशाष्टकमसत्त्वे सर्वागमेषु प्रधानतयोक्तम्,—इत्यत एव प्रतिष्ठायामेतदाद्यष्टकसप्तकस्वीकारेणैव सर्वत्र भुवनानां संकलनम् ॥२०४॥

ततस्तु तैजसं तत्त्वं
शिवाग्नेरत्र संस्थितिः ।
ते चैनं वह्निमायान्ति
वाह्नीं ये धारणां श्रिताः ॥२०५॥
भैरवादिहरीन्द्रान्तं
तैजसे नायकाष्टकम् ।
प्राणस्य भुवनं वायो-
र्दशधा दशधा तु तत् ॥२०६॥
ध्यात्वा त्यक्त्वाथ वा प्राणान्
कृत्वा तत्रैव धारणाम् ।
तं विशन्ति महात्मानो
वायुभूताः खमूर्तयः ॥२०७॥

भीमादिगयपर्यन्त-
मष्टकं वायुतत्त्वगम् ।
खतत्त्वे भुवनं व्योम्नः
प्राप्यं तद्व्योमधारणात् ॥२०८॥
वस्त्रापदान्तं स्थाणवादि
व्योमतत्त्वे सुराष्टकम् ।

'तत' इत्यसत्त्वात् । तदुक्तम्

'तत्र भैरवकेदारमहाकालाः समध्यमाः ।
आम्रातकेशजल्पेशश्रीशैलाः सहरीन्दवः ॥'
(मा० वि० ५ । १८)

इति । श्रीस्वच्छन्दे तु

'हरिश्चन्द्रं च श्रीशैलं जल्पमाम्रातकेश्वरम् ।
महाकालं मध्यमं च केदारं भैरवं तथा ॥
अतिगुह्यं समाख्यातम्.....।'
(स्व० १० । ८७३)

इति । 'वायौ' इति वायुतत्त्वे । दशधेति, प्राणादि-नागादिभेदात् । ध्यानाद्यप्येवमिति पुनर्दशधेति । भीमादीति, तदुक्तम्

'भीमेश्वरमहेन्द्राट्टहासाः सविमलेश्वराः ।
कनखलं नाखलं च कुरुक्षेत्रं गया तथा ॥'
(मा० वि० ५ । १९)

इति । श्रीस्वच्छन्दे तु

'गयां चैव कुरुक्षेत्रं नाखलं कनखलं तथा ।
विमलं चाट्टहासं च माहेन्द्रं भीममष्टमम् ॥
गुह्याद्गुह्यतरं ह्येतत्.....।'

(स्व० १० । ८८४)

इति । 'व्योम्न' इत्याकाशस्य । तदुक्तम्

'स्थाणुस्वर्णाक्षकावाद्यौ रुद्रगोकर्णकौ परौ ।
महालयाविमुक्तेशरुद्रकोट्यम्बरापदाः ॥'

(मा० वि० । ५ । २०)

इति । श्रीस्वच्छन्दे तु

'वस्त्रापदं रुद्रकोटिमविमुक्तं महालयम् ।
गोकर्णं भद्रकर्णं च स्वर्णाक्षं स्थाणुमष्टमम् ॥
पवित्राष्टकमेतत्..... ।'

(स्व० १० । ८८७)

इति ॥२०८॥

ननु

'न चाधिकारिता दीक्षां विना योगेऽस्ति शाङ्करे ।'

(मा० वि० ४ । ६)

इत्याद्युक्तयुक्त्या दीक्षामन्तरेणाधिकार एव शाङ्करे योगे नास्ति,—इति का कथा तदभ्यासादेर्वृत्तायां च दीक्षायां निर्व्यूढे च योगाभ्यासे जीवत एव मुक्तिर्भवेत्,—इति कस्तत्र शरीरान्ते सन्देहः ।

गन्धतन्मात्रधारणाद्यभ्यस्यन्तो योगिनः शरीरान्ते धरादिभुवनान्यासादयन्ति,—इति कथमुक्तम् ? इत्याशङ्क्याह

अदीक्षिता ये भूतेषु
शिवतत्त्वाभिमानिनः ॥२०९॥
ज्ञानहीना अपि प्रौढ-
धारणास्तेऽण्डतो बहिः ।
धराब्धितेजोऽनिलख-
पुरगा दीक्षिताश्च वा ॥२१०॥
तावत्संस्कारयोगार्थं
न परं पदमीहितुम् ।
तथाविधावतारेषु
मृताश्चायतनेषु ये ॥२११॥
तत्पदं ते समासाद्य
क्रमाद्यान्ति शिवात्मताम् ।

भूतेष्विति, पृथिव्या एव प्राधान्याद् बहुवचनेन निर्देशः । यद्वा तन्मध्यात् 'प्रौढधारणा' इति पातञ्जलादिपाशवयोगाभ्यासात् । दीक्षिता इति,

'यो यत्राभिलषेद्भोगान्स तत्रैव नियोजितः ।
सिद्धिभाक्..... ॥'

इत्याद्युक्तयुक्त्या धरादिपदास्तये एव कृतलोकधर्मिसाधकदीक्षा इत्यर्थः । तदाह 'तावत्संस्कारेत्यादि' । तथाविधावतारेष्विति, भूमण्डलगतेष्वमरेशाद्यायतनेषु ॥२११॥

किमत्र प्रमाणमित्याशङ्क्याह

पुनः पुनरिदं चोक्तं
श्रीमद्वेद्याख्ययामले ॥२१२॥

पुनः पुनरिति, प्रत्यष्टकम् । तदुक्तं तत्र

'ये मृता जन्तवस्तत्र ते व्रजन्तीह तत्पदम् ।'

इति ।

'एतेष्वपि मृताः सम्यग्घित्वा लोकानशेषतः ।
दीप्यमानास्तु गच्छन्ति स्थानेष्वेतेषु ते प्रिये ॥'

इति ॥ २१२ ॥

न केवलमेतदत्रैवोक्तं यावदन्यत्रापि,—इत्याह

श्रीकामिकायां कश्मीर-
वर्णने चोक्तवान्विभुः ।

तद्ग्रन्थमेव पठति

सुरेश्वरीमहाधाम्नि
ये म्रियन्ते च तत्पुरे ॥२१३॥

ब्राह्मणाद्याः सङ्करान्ताः
पशवः स्थावरान्तगाः ।
रुद्रजातय एवैते
इत्याह भगवाञ्छिवः ॥२१४॥
आकाशावरणादूर्ध्व-
महङ्कारादधः प्रिये ।
तन्मात्रादिमनोऽन्तानां
पुराणि शिवशासने ॥२१५॥

शिवशासने इति, उक्तानीति शेषः । तदुक्तम्

आकाशावरणादूर्ध्वमहङ्कारादधः प्रिये ।
भुवनानि प्रवक्ष्यामि····· ॥'

(स्व० १० । ८९५)

इति ॥२१५॥

तान्येवाह

पञ्चवर्णायुतं गन्ध-
तन्मात्रमण्डलं महत् ।
आच्छाद्य योजनानेक-
कोटिभिः स्थितमन्तरा ॥२१६॥

एवं रसादिमात्राणां
मण्डलानि स्ववर्णत
शर्वो भवः पशुपति-
रीशो भीम इति क्रमात् ॥२१७॥
तन्मात्रेशा यदिच्छातः
शब्दाद्याः खादिकारिणः ।
ततः सूर्येन्दुवेदानां
मण्डलानि विभुर्महान् ॥२१८॥
उग्रश्चेत्येषु पतय-
स्तेभ्योऽर्केन्दू सयाजकौ ।
इत्यष्टौ तनवः शंभो-
र्याः पराः परिकीर्तिताः ॥२१९॥
अपरा ब्रह्मणोऽण्डे ता
व्याप्य सर्वं व्यवस्थिताः ।
कल्पे कल्पे प्रसूयन्ते
धराद्यास्ताभ्य एव तु ॥२२०॥
ततो वागादिकर्मात्त-
युक्तं करणमण्डलम् ।

अग्नीन्द्रविष्णुमित्राः स-
ब्रह्माणस्तेषु नायकाः ॥ २२१ ॥
प्रकाशमण्डलं तस्मा-
च्छूतं बुद्ध्यत्तपञ्चकम् ।
दिग्विद्युदर्कवरुणा-
भुवः श्रोत्रादिदेवताः ॥२२२॥
प्रकाशमण्डलादूर्ध्वं
स्थितं पञ्चार्थमण्डलम् ।
मनोमण्डलमेतस्मात्
सोमेनाधिष्ठितं यतः ॥२२३॥
बाह्यदेवेष्वधिष्ठाता
साम्यैश्वर्यसुखात्मकः ।
मनोदेवस्ततो दिव्यः
सोमो विभुरुदीरितः ॥२२४॥

पञ्चवर्णयुतमिति, तदुक्तम्

'शुक्लपीतसितरक्तहरितं स्फटिकप्रभम् ।
पञ्चवर्णसमायुक्त शक्रचापसमप्रभम् ॥'

(स्व० १०। ८९७)

इति । 'अन्तराच्छाद्य' इति वितानवदाकाशादि सर्वमन्तर्गर्भीकृत्येत्यर्थः । तदुक्तम्

'आदौ तु गन्धतन्मात्रं विस्तीर्णं मण्डलं महत् ।
स्थितं वितानवद्देवि योजनानेककोटयः ॥'

(स्व० १० । ८९६)

इति ।

'शर्वो ह्यधिपतिस्तत्र एक एव वरानने ।
तस्मात्तु जायते पृथ्वी शर्वेशेन प्रचोदिता ॥'

(स्व० १० । ८९८)

इति । यदिच्छात इति, अन्यथा कथमेषां जडानां कारणता भवेदिति भावः । एवमिति, गन्धतन्मात्र-मण्डलवदिति भावः । तदुक्तम्

'तस्मात्तु मण्डलादूर्ध्वं रसतन्मात्रमण्डलम् ।
हरितं मरकतश्यामं चाषपक्षनिभं प्रिये ॥
भवो ह्यधिपतिस्तत्र एक एव वरानने ।
तस्मादापो विनिष्क्रान्ता भवेशेन प्रचोदिताः ॥
तस्मात्तु मण्डलादूर्ध्वं रूपतन्मात्रमण्डलम् ।
स्फुरत्सूर्यांशुदीप्ताभं पद्मरागसमप्रभम् ॥
रुद्रः पशुपतिस्तत्र एक एवावतिष्ठते ।
तस्मात्तेजो विनिष्क्रान्तं तद्वै पशुपतीच्छया ॥'

(स्व० १० । ९०२)

इति ।

तस्मात्तु मण्डलादूर्ध्वं स्पर्शतन्मात्रमण्डलम् ।
सन्ध्यारुणसमच्छायं.....॥'

(स्व० १० । ९०४)

इति ।

'तत्रैव मण्डले देवि ईशानः संव्यवस्थितः ।
तस्माद्वायुर्विनिष्क्रान्त ईशेच्छाप्रेरितः प्रिये ॥'

(स्व० १० । ९०५)

इति ।

'तस्मात्तु मण्डलादूर्ध्वं शब्दतन्मात्रमण्डलम् ।
नीलोत्पलदलश्यामं स्वच्छोदकसमप्रभम् ॥'

(स्व० १० । ९०७)

इति ।

'भीमस्तत्राधिपत्येन एक एवावतिष्ठते ।
तस्मान्नभो विनिष्क्रान्तं भीमेच्छाचोदितं महत् ॥'

(स्व० १० । ९०९)

इति । 'तत' इति तत्तन्मात्रमण्डलमाश्रित्येत्यर्थः । तेन च शब्दतन्मात्रस्योपरितने भागे मण्डलत्रयमेतद्वर्तते, इति । 'विभुः' इति रुद्रः । 'महान्' इति महादेवः । 'तेभ्य' इति निजनिजरुद्राधिपतिचोदितेभ्यः सूर्यादिमण्डलेभ्यः । यदुक्तम्

'तत ऊर्ध्वं सूर्यसंज्ञं यत्र रुद्रो विभुः स्थितः ।
तत ऊर्ध्वं सोमसंज्ञं महादेवश्च तत्पतिः ॥

---

१ ग० पु० तेभ्य इत्यर्थादिति पाठः ।

उग्रेशाधिष्ठितं तस्मादूर्ध्वं वै वेदमण्डलम् ।
एभ्यः सूर्यस्तथा सोमो यजमानो विनिर्गताः ॥
कल्पे कल्पे ह्यसंख्याताः.....।'

इति । 'परा' इति तन्मात्रादीनां सूक्ष्मरूपत्वात् । 'ताभ्य' इति पराभ्यस्तनुभ्यः । 'तत' इति तन्मात्रेभ्योऽनन्तरं 'करणमण्डलम्' इति, तत्तच्छब्दोदीरणादिव्यापारात्मकत्वात् करणप्रधानं पञ्चानां तत्त्वानां मण्डलं समूह इत्यर्थः । तच्च वागादिभिः कर्मेन्द्रियैः संबद्धं न तु बुद्धीन्द्रियैरित्युक्तं 'वागादिकर्माक्षयुक्तम्' इति । तदुक्तम्

'एभ्यः परतरं चापि मण्डलं करणात्मकम् ।'
(स्व० १० । ९१९)

इत्युपक्रम्य

'कर्मदेवाः प्रवर्तन्ते तस्माद्वै सर्वदेहिनाम् ।
वाक्पाणिपादपायुश्च उपस्थश्चेति पञ्चमः ॥'
(स्व० १० । ९२१)

इति । 'तेषु' इति वागादिषु पञ्चसु तत्त्वेषु । तेन वाक्तत्त्वे वह्निर्नायको यावदुपस्थतत्त्वे ब्रह्मा । तदुक्तम्

'कर्मेन्द्रियाणां पतयो वह्नीन्द्रहरिवेधसः ।
मित्रश्च.....॥'

इति । तस्मात्करणमण्डलादूर्ध्वं तत्तच्छब्दाद्यर्थ-प्रकाशत्वात् प्रकाशप्रधानं तत्त्वानां मण्डलं बुद्ध्य-त्मपञ्चकं 'श्रुतं' तत्त्वेन विख्यातमित्यर्थः । तदुक्तम्

'तेभ्यः प्रकाशकं नाम परितः सूर्यसन्निभम् ।
तस्माद्वै संप्रवर्तन्ते पञ्च बुद्धीन्द्रियाणि तु ॥
श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका च यथाक्रमम् ।'
(स्व० १० । ९२३)

इति । श्रोत्रादीति, तेन श्रोत्रे दिशां देवतात्वं याव-द्घ्राणे पृथिव्या इति । तदुक्तम्

'घ्राणादिश्रोत्रपर्यन्ता पृथिवी च अपां पतिः ।
रविर्विद्युद्दिशो ह्येवं स्थिता बुद्धीन्द्रियेषु ते ॥'

इति । प्रकाशमण्डलादूर्ध्वमिति, मनस्तत्त्वे तत्रैव पञ्चानामपि शब्दादीनामर्थानामवस्थानमुचितं, यत्तद्विषयत्वेनैव मनस्तानि तानीन्द्रियाणि प्रवर्त-यतीति । तदत्रैषां परेण रूपेणैतद्भुवनमिति भावः । यदुक्तम्

'एभ्यः परतरं नास्ति चन्द्रमण्डलसन्निभम् ।
विस्तारात्परिणाहाच्च सर्वतो रश्मिमण्डलम् ।
तस्माद्वै संप्रवर्तन्ते पञ्चार्थाः सर्वदेहिनाम् ॥'
(स्व० १० । ९२५)

इति । मनोमण्डलमिति, मनसः प्रधानं भुवनमि-

त्यर्थः । एतस्मादिति प्रकाशमण्डलादप्यूर्ध्वम् । अत्र च सोमस्याधिष्ठातृत्वे किं निमित्तम् ? इत्याशङ्क्याह 'यतः' इत्यादि । यतः साम्येनाविशेषेण सर्वेन्द्रियाणां तत्तद्विषयौन्मुख्येन प्रवर्तकत्वात्मकं यत् 'ऐश्वर्यसुखं' स्वातन्त्र्यचमत्कारस्तदात्मकः संस्तत्तत्सङ्कल्पात्मव्यवहाररूपत्वात् मन एव देवो 'बाह्यदेवेषु' बहीरूपतया द्योतमानेषु बुद्धीन्द्रियादिष्वधिष्ठाता, ततोऽस्य 'दिव्यः' सर्वदेवानामाप्यायकारितया दिवे हितः सोमो विभुरुक्त इत्यर्थः ॥ २२४ ॥

ततोऽपि सकलात्राणां
योनेर्बुद्ध्यत्तजन्मनः ।
स्थूलादिच्छगलान्ताष्ट-
युक्तं चाहङ्कृतेः पुरम् ॥२२५॥

बुद्धितत्त्वं ततो देव-
योन्यष्टकपुराधिपम् ।
पैशाचप्रभृतिब्राह्म-
पर्यन्तं तच्च कीर्तितम् ॥२२६॥

एतानि देवयोनीनां
स्थानान्येव पुराऽयतः ।
अवतीर्यात्मजन्मानं
ध्यायन्तः संभवन्ति ते ॥२२७॥

'ततोऽपि' इति मनसोऽप्यनन्तरम् । 'अहङ्कृतेः' इति अहङ्कारस्य । ननु किमिति नामास्य मनस ऊर्ध्वं बुद्धेश्चाधोऽवस्थानम्? इत्याशङ्क्योक्तं 'सकलाक्षाणां योनेर्बुद्ध्यक्षजन्मन' इति । 'स्थूल' इति स्थूलेश्वरः । 'छगल' इति छगलाण्डः । तदुक्तम्

'स्थूलस्थलेश्वरौ शङ्कुकर्णकालञ्जरावपि ।
मण्डलेश्वरमाकोटदुरण्डच्छगलाण्डकाः ॥'
(मा० वि० ५ । २१)

इति । श्रीस्वच्छन्दे च

'छगलाण्डं दुरदण्डं च माकोटं मण्डलेश्वरम् ।
कालञ्जरं शङ्कुकर्णं स्थूलेश्वरस्थलेश्वरौ ॥
स्थाण्वष्टकं समाख्यातं..... ।'
(स्व० १० । ८८९)

इति । देवयोन्यष्टकमेव 'पुराधिपं' भुवनेश्वरं यत्र तत्तथा 'तत्' इति देवयोन्यष्टकम् । तदुक्तम्

'पैशाचं राक्षसं याक्षं गान्धर्वं त्वैन्द्रमेव च ।
सौम्यं तथा च प्राजेशं ब्राह्ममष्टममुच्यते ॥'
(मा० वि० ५ । २३)

इति । एतान्येव बुद्धिगतानि ककुभादीनि पुराणि आसां देवयोनीनां 'स्थानानि' मुख्यानि अवस्थितेर्धामानीत्यर्थः । अधः पञ्चाष्टकादिरूपतयावस्थितानां पुनरासाममुख्यानि भुवनानीति भावः । 'अवतीर्य' इत्यर्थादधो ब्रह्माण्डादौ, 'संभवन्ति' इति पुनःपुनः सृष्टिमासादयन्तीत्यर्थः ॥२२७॥

अत्रैव निमित्तमाह

परमेशनियोगाच्च
चोद्यमानाश्च मायया ।
नियामिता नियत्या च
ब्रह्मणोऽव्यक्तजन्मनः ॥२२८॥
व्यज्यन्ते तेन सर्गादौ
नामरूपैरनेकधा ।

ब्रह्मणः सर्गादौ 'व्यज्यन्ते' तथा तथा स्थूलेन रूपेण व्यक्तीभवन्तीत्यर्थः । अनेकधेति, तारतम्यादिभेदात् ॥ २२८ ॥

न चैवमपि आसां बुद्धाववस्थितेभ्यो भुवनेभ्यः प्रच्यावः,—इत्याह

स्वांशेनैव महात्मानो
न त्यजन्ति स्वकेतनम् ॥ २२९ ॥

एतच्च बृहस्पतिपादैरेवं स्वग्रन्थे व्याकृतमित्याह

उक्तं च शिवतनाविद-
माधिकारपदस्थितेन गुरुणा नः ।
अष्टानां देवानां
शक्त्याविर्भावयोनयो ह्येताः ॥ २३० ॥

'देवानां' पिशाचादीनाम् 'आविर्भावो' व्यक्तिस्तेन शक्तिव्यक्तिरूपाद् विविधा योनय इत्यर्थः । तत्र बुद्धौ शक्त्यात्मना आसामवस्थितिरधस्तु व्यक्त्यात्मनेति ॥ २३० ॥

तदाह

तनुभोगाः पुनरेषा-
मधः प्रभूतात्मकाः प्रोक्ताः ।

'प्रभूतात्मकाः' स्थूलरूपाः ॥

तदेव दर्शयति

चत्वारिंशत्तुल्यो-
पभोगदेशाधिकानि भुवनानि ॥ २३१॥

चत्वारिंशदिति, लकुल्यादिभेदात् ॥ २३१ ॥

ननु यद्येषां तुल्योपभोगादित्वमस्ति तत्कथं गुह्याष्टकाद्यष्टकपञ्चकतया भेदः ? इत्याशङ्क्याह

साधनभेदात्केवल-
मष्टकपञ्चकतयोक्तानि ।

साधनभेदमेवाह

एतानि भक्तियोग-
प्राणत्यागादिगम्यानि ॥ २३२ ॥

तेषूमापतिरेव
प्रभुः स्वतन्त्रेन्द्रियो विकरणात्मा ।
तरतमयोगेन ततोऽ-
पि देवयोन्यष्टकं लक्ष्यं तु ॥ २३३ ॥

प्राणत्याग एतत्क्षेत्रादौ, आदिशब्दाल्लोकधर्मिसाधकदीक्षादि । एषां चैवं व्यक्तीभावः किं स्वयमुत कस्यापि अधिष्ठानेन ? इत्याशङ्क्याह 'तेष्वित्यादि'

पिशाचादिषु । स्वतन्त्रेन्द्रियत्वादेव 'विकरणात्मा' स्वेच्छाधीनेन्द्रियवृत्तिरित्यर्थः । यदुक्तं तत्रैव

'इच्छाधीनानि पुनर्विकरणसंज्ञानि ।'

इति । नन्वासामविशेषेणैव किं सर्वत्रावस्थानं न वा ? इत्याशङ्क्याह 'तरतमेत्यादि' । 'तत' इति बुद्धेः । अपिर्भिन्नक्रमः, तेन अष्टावपीति योज्यम् ॥ २३३ ॥

न केवलमासामेव तरतमभावो यावदज्ञाणामपि, इत्याह

लोकानामज्ञाणि च
विषयपरिच्छित्तिकरणानि ।

पिशाचादयो हि व्यवहितमपि चक्षुषा पश्यन्तीत्याशयः ॥

न केवलमासां प्रतितत्त्वमेव तरतमभावो यावदन्योन्यमपीत्याह

गन्धादेर्महदन्ता-
देकाधिक्येन जातमैश्वर्यम् ॥२३४॥

अणिमाद्यात्मकमस्मि-
न्पैशाचाद्ये विरिञ्चान्ते ।

गन्धशब्देनात्र पृथ्व्या अभिधानं, कार्यकारणयोरभेदोपचारात् । एकाधिक्येन इति, तत्पैशाचे यादृशमैश्वर्यं ततोऽपि द्विगुणं राक्षसे, यावद्ब्राह्मेऽष्टगुणमित्यर्थः ॥२३४॥

अत एव च दीक्षायामेतच्छुद्धौ यतितव्यमित्याह

ज्ञात्वैवं शोधयेद्बुद्धिं
सार्धं पुर्यष्टकेन्द्रियैः ॥२३५॥

एवमिति, बुद्धेरेवेदं निखिलं जगद्विजृम्भितम्,—इत्यत एवोक्तं 'पुर्यष्टकेन्द्रियैः सार्धम्' इति ॥२३५॥

न केवलमत्र देवयोन्यष्टकमेवास्ति यावदन्यदपि, इत्याह

क्रोधेशाष्टकमानीलं
संवर्ताद्यं ततो विदुः ।
तेजोष्टकं बलाध्यक्ष-
प्रभृतिक्रोधनाष्टकात् ॥२३६॥

अकृतादि ततो बुद्धौ
योगाष्टकमुदाहृतम् ।
स्वच्छन्दशासने तत्तु
मूले श्रीपूर्वशासने ॥२३७॥
योगाष्टकपदे यत्तु
सोमे श्रैकण्ठमेव च ।
ततो मायापुरं भूयः
श्रीकण्ठस्य च कथ्यते ॥२३८॥
तेन द्वितीयं भुवनं
तयोः प्रत्येकमुच्यते ।
तत्र मायापुरं देव्या
यया विश्वमधिष्ठितम् ॥२३९॥
प्रतिकल्पं नामभेदै-
र्भण्यते सा महेश्वरी ।
उमापतेः पुरं पश्चा-
न्मातृभिः परिवारितम् ॥२४०॥
श्रीकण्ठ एव परया
मूर्त्योमापतिरुच्यते ।

'आनीलम्' इति नीलोत्पलाभम् । तदुक्तम्

'संवर्तस्त्वेकवीरश्च कृतान्तो जननाशनः ।
मृत्युहर्ता च रक्ताक्षो महाक्रोधश्च दुर्जयः ॥
नीलोत्पलदलाभानि तेषां वै भुवनानि तु ।'
(स्व० १० । ९७६)

इति । क्रोधनाष्टकादिति, तदूर्ध्वमित्यर्थः । तदुक्तम्

'क्रोधेश्वराष्टकादूर्ध्वं स्थितं तेजोऽष्टकं महत् ।
बलाध्यक्षो गणाध्यक्षस्त्रिदशस्त्रिपुरान्तकः ॥
सर्वरूपश्च शान्तश्च निमेषोन्मेष एव च ।'
(स्व० १० । ९७८)

इति । 'तत' इति तेजोष्टकादनन्तरम् । तदुक्तम्

'अकृतं च कृतं चैव वैभवं ब्राह्ममेव च ।
वैष्णवं त्वथ कौमारमौमं श्रैकण्ठमेव च ॥'
(स्व० १० । ९८१)

इति । तुशब्दो व्यतिरेके 'मूल' इति प्रकृतौ । यदुक्तं तत्र

'योगाष्टकं प्रधानं च.....'

इति । 'योगाष्टकपद' इत्यपरेण रूपेणोक्तं, भूय इति परेण रूपेण, तयोरिति उमापतिश्रीकण्ठयोः, तत्रेति द्वयनिर्धारणे । पुरमिति, अर्थाद् द्वितीयम् ।

एवं विश्वाधिष्ठाने हेतुर्भण्यते 'सा महेश्वरी' इति । तदुक्तम्

'ततः साक्षाद्भगवती जगन्माता व्यवस्थिता ।
उमा त्वमेया विश्वस्य विश्वयोनिः स्वयंभवा ॥'
(स्व० १० । ९८३)

इत्यादि ।

'कल्पे पूर्वे जगन्माता जगद्योनिर्द्वितीयके ।
तृतीये शाम्भवी नाम चतुर्थे विश्वरूपिणी ॥'
(स्व० १० । ९९२)

इत्यादि । मध्ये

'कात्यायनीति दुर्गेति विविधैर्नामपर्ययैः ।
मानुषाणां तु भक्तानां वरदा भक्तवत्सला ॥
पूर्वमेवावतीर्णासि विन्ध्यपर्वतमूर्धनि ।'
(स्व० १० । १००३)

इत्यन्तम् । 'पश्चात्' इत्युमापुरानन्तरम् । ननु श्रीकण्ठस्य 'भूयः पुरं कथ्यते' इत्युपक्रम्य कथमुमापतेरित्युक्तम् ? इत्याशङ्क्याह 'श्रीकण्ठ एव' इत्यादि ॥२४०॥

कास्ता मातरः ? इत्याशङ्क्याह

ब्राह्म्यैशी स्कन्दजा हारी
वाराह्यैन्द्री सविच्चिका [चर्चिका] ॥२४१॥

पीता शुक्ला पीतनीले
नीला शुक्लारुणा क्रमात् ॥
अग्नीशसौम्ययाम्याप्य-
पूर्वनैर्ऋतगास्तु ताः ॥२४२॥
अंशेन मानुषे लोके
धात्रा ता ह्यवतारिताः ।

तदुक्तम्

'ब्राह्मी कमलपत्राभा दिव्याभरणभूषिता ।
आग्नेय्यां दिशि ... ... ।'
(स्व० १० । १०१७)

इति ।

'शंखगोक्षीरसंकाशा त्वैशान्यां तु वरानने ।
माहेश्वरी .... ॥'
(स्व० १० । १०१८)

इति ।

'कौमारी पद्मगर्भाभा हारकेयूरभूषिता ।
दिश्युत्तरस्यां .... ॥'
(स्व० १० । १०१९)

इति ।

'स्निग्धनीलोत्पलनिभा हारकुण्डलमण्डिता ।
दक्षिणस्यां दिशि तु सा उपास्ते परमेश्वरम् ॥

वैष्णवीति च विख्याता ···· ···· ···· ।'

(स्व० १० । १०२०)

इति ।

'नीलजीमूतसंकाशा सर्वाभरणभूषिता ।
वारुण्यां दिशि वाराही..... ॥'

(स्व० १० । १०२१)

इति ।

'शङ्खकुन्देन्दुधवला हारकुण्डलमण्डिता ।
ऐन्द्र्यां दिशि तु चैन्द्राणी.....॥'

(स्व० १० । १०२२)

इति ।

करालवदना दीप्ता सर्वाभरणभूषिता ।
नैर्ऋत्यां दिशि चामुण्डा.....॥'

(स्व० १० । १०२३)

इति च । अंशेनेति, न तु सर्वसर्विकया । तदुक्तम्

'न त्यजन्ति हि ता देवं सर्वभावसमन्वितम् ।
अंशेन मानुषं लोकं ब्रह्मणा चावतारिताः ॥
असुराणां वधार्थाय मानुषाणां हिताय च ।'

(स्व० १० । १०२५)

इति ॥ २४२ ॥

न चेयदन्तमेवासां व्यासिरित्याह

स्वच्छन्दास्ताः पराश्चान्याः
परे व्योम्नि व्यवस्थिताः ॥ २४३ ॥

स्वच्छन्दं ता निषेवन्ते
सप्तधेयमुमा यतः ॥

'परे व्योम्नि' इति उन्मनाधाम्नि । 'उमा' इति परशिवाभिन्ना परा पारमेश्वरी शक्तिः । तदुक्तम्

'स्वच्छन्दाश्च पराश्चान्याः परे व्योम्नि व्यवस्थिताः ।
स्वच्छन्दं पर्युपासीनाः परापरविभागतः ॥
उमा वै सप्तधा भूत्वा नामरूपविपर्ययैः ।'
(स्व० १०।१०२७)

इति ॥ २४३ ॥

उमापतिपुरस्योर्ध्वं
स्थितं मूर्त्यष्टकं परम् ॥ २४४ ॥
शर्वादिकं यस्य सृष्टि-
र्धराद्या याजकान्ततः ।
ताभ्य ईशानमूर्तिर्या
सा मेरौ संप्रतिष्ठिता ॥ २४५ ॥
श्रीकण्ठः स्फटिकाद्रौ सा
व्याप्ता तन्वष्टकैर्जगत् ।
ये योगं सगुणं शम्भोः
संयताः पर्युपासते । २४६ ॥

तन्मण्डलं वा दृष्ट्वैव
मुक्तद्वैता हृतत्रयाः ।

मूर्त्यष्टकमिति, तदधिष्ठातृ परमिति, अपरस्य परापरस्य च पूर्वमुक्तत्वात् । 'यस्य' इति मूर्त्यष्टकाधिष्ठातुः शर्वादेः । 'ताभ्य' इति अष्टाभ्यो मूर्तिभ्यो मध्यात् 'सगुणम्' इति सत्त्वादिवृत्तिप्रधानं न तु पराद्वयरूपम् । तन्मण्डलमिति, श्रीश्रीकण्ठाद्युक्तम् । 'मुक्तद्वैता' इति सांख्यादिक्रमेण लब्धकैवल्याः ॥२४६॥

ननु यदि नाम योगस्येयदन्तं प्रासौ सामर्थ्यमस्ति तत्कथमस्य अधराधरतत्त्वप्राप्तिरप्युक्ता ? इत्याशङ्क्याह

गुणानामाधरौत्तर्या-
च्छुद्धाशुद्धत्वसंस्थितेः ॥२४७॥
तारतम्याच्च योगस्य
भेदात्फलविचित्रता ।
ततो भोगफलावाप्ति-
भेदाद्भेदोऽयमुच्यते ॥२४८॥

'आधरौत्तर्यात्' इति गुणप्रधानभावात् । शुद्धत्वं, निर्बीजत्वात् । अशुद्धत्वं, सबीजत्वात् । 'तारतम्यात्' इति मृदुमध्याधिमात्ररूपत्वात् । फलविचित्रतेति, तत्तत्त्वप्राप्तिरूपा येनायं भेदः । कस्यचिद्योगस्योर्ध्वोर्ध्वं तत्त्वेषु प्राप्तिनिमित्तत्वम्, अन्यस्य च अधराधरेष्विति ॥२४८॥

मूर्त्यष्टकोपरिष्टात्तु
सुशिवा द्वादशोदिताः ।
वामाद्येकशिवान्तास्ते
कुङ्कुमाभाः सुतेजसः ॥२४९॥

तदूर्ध्वं वीरभद्राख्यो
मण्डलाधिपतिः स्थितः ।
यत्त [स्त] त्सायुज्यमापन्नः
स तेन सह मोदते ॥२५०॥

ततोऽप्यङ्गुष्ठमात्रान्तं
महादेवाष्टकं भवेत् ।

'सुतेजस' इति सूर्यकोटिसमप्रभाः । तदुक्तम्

'वामो भीमस्तथोग्रश्च शिवः शर्वस्तथैव च ।
विद्यानामधिपश्चैव एकवीरः प्रचण्डधृत् ॥
ईशानश्चाप्युमाभर्ता अजेशोऽनन्त एव च ।
तथा एकशिवश्चैव सुशिवा द्वादश स्मृताः ॥
सर्वे कुङ्कुमसङ्काशाः सूर्यकोटिसमप्रभाः ।' ·

(स्व० १० । १०३८)

इति । तदूर्ध्वमिति, तच्छब्देन सुशिवपरामर्शः । 'तत' इति वीरभद्रमण्डलादप्यनन्तरम् । तदुक्तम्

महादेवो महातेजा वामदेवभवोद्भवौ ।
एकपिङ्गेक्षणेशानभुवनेशपुरःसराः ॥
अङ्गुष्ठमात्रसहिता महादेवाष्टके शिवाः ।'

(स्व० १० । १०४२)

इति ॥२५०॥

एतदेवोपसंहरति

बुद्धितत्त्वमिदं प्रोक्तं
देवयोन्यष्टकादितः ॥२५१॥
महादेवाष्टकान्ते तद्
योगाष्टकमिहोदितम् ।
तत्र श्रैकण्ठमुक्तं यत्
तस्यैवोमापतिस्तथा ॥२५२॥

मूर्तयः सुशिवा वीरो
महादेवाष्टकं वपुः ।

एवंविधे च बुद्धितत्त्वे योगाष्टकमध्ये यदष्टमं श्रैकण्ठं भुवनमुक्तं तदधिष्ठाता च यः श्रीकण्ठनाथ उक्तः, तस्यैवायमुमापतेरारभ्य सर्वः प्रपञ्चः,—इत्युक्तं 'तस्यैवेत्यादि' । 'वीरो' वीरभद्रः । तदुक्तम्

'सर्वेश्वरानधिष्ठाय श्रीकण्ठः कारणेच्छया ।
एकः स बहुभी रूपैरास्ते प्रतिनिकेतनम् ॥'

इति ॥ २५२ ॥

उपरिष्टाद्धियोऽधश्च
प्रकृतेर्गुणसंज्ञितम् ॥ २५३ ॥
तत्त्वं तत्र तु संक्षुब्धा
गुणाः प्रसुवते धियम् ।

'गुणसंज्ञितं तत्त्व' गुणतत्त्वमित्यर्थः । ननु 'प्रकृतेर्महान्' (सां० का० २२) इत्युक्त्या प्रकृत्यनन्तरं तत्कार्यभूतं बुद्धितत्त्वमन्यैरुक्तम्,—इति कथमिहान्तरा गुणतत्त्वमुच्यते ? इत्याशङ्क्याह 'तत्र तु' इत्यादि । तुशब्दो हेतौ । 'संक्षुब्धा' इति परस्परा-

ङ्गाङ्गिभावेन वैषम्यापत्त्या कार्यजननोन्मुखा इत्यर्थः । प्रकृतौ हि तेषामविशेषेणावस्थानम् । यदाहुः

"सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः ।"

(सा० सू० १ । ६१)

इति ॥

न च वैषम्यमनापन्नं कारणं कार्यं जनयेत्, बीजं हि जलादिसंपर्कादुच्छूनतामापन्नं सत् अङ्कुरादि उत्पादयेत् नान्यथा, तथात्वे हि मूलादपि तदुत्पादः स्यात्, तदाह

न वैषम्यमनापन्नं
कारणं कार्यसूतये ॥ २५४ ॥

अत एव वैषम्यमनापन्ना प्रकृतिः कथं बुद्धिजन्मनि कारणं स्यात् ? इत्याह

गुणसाम्यात्मिका तेन
प्रकृतिः कारणं भवेत् ।

'तेन' इति वैषम्यापत्तिभावेन । तदवश्यं प्रकृतिकार्यं तत्क्षोभरूपं गुणतत्त्वमन्तराङ्गीकार्यं येन बुद्धिजन्म स्यात् ॥

---

१ क० ख० पु० मूलस्यादिति पाठः ।

ननु यद्येवं तद्गुणतत्त्वमपि प्रकृतिः किं क्षोभं विना जनयेन्न वा? तत्राद्ये पक्षे बुद्धितत्त्वमेव तथा जनयतु किमन्तराकल्पितेन गुणतत्त्वेन । अथ सति क्षोभे तत् सोऽपि क्षोभः किं क्षोभान्तरे सत्यसति वा? इत्यनवस्था स्यात्, येन न गुणानां नापि बुद्धेर्जन्म सिद्ध्येत्; तदाह

नन्वेवं सापि संक्षोभं
विना तान्विषमान्गुणान् ॥ २५५ ॥
कथं सुवीत तत्राद्ये
क्षोभे स्यादनवस्थितिः ।

ननु भवेदयं दोषः किंतु सांख्यस्य न पुनरस्माकं, न हि नाम जडं कारणं क्षोभं विना कार्यमेव जनयितुमलं लोके बीजाङ्कुरादौ तथा दर्शनात्, तदाह

सांख्यस्य दोष एवायं

एवकारो भिन्नक्रमः । तेन सांख्यस्यैवेति । यद्वा तस्यापि नायं दोषो यत्तेन स्वत एव क्षुब्धास्ते गुणा अव्यक्तस्य रूपमिष्टम्, अन्यथा कथं तत्कार्योत्पादः स्यात्; अत एव 'प्रसवधर्मि' (सां०का०११) इत्युक्तम् ॥

तदाह

यदि वा तेन ते गुणाः ॥२५६॥

अव्यक्तमिष्टाः

ननु यद्येवं तत्तस्य 'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः' इति कथं संगच्छेत ? इत्याशङ्क्याह

साम्यं तु

सङ्गमात्रं न चेतरत् ।

साम्यं पुनरत्र गुणानां सङ्गमात्रत्वं, क्षुब्धत्वेऽपि समस्पर्धितया समुदितत्वमेव केवलं विवक्षितं न त्वितरत् अक्षुब्धत्वात् अविशेषेणावस्थानं, तथात्वे हि यथोक्तदोषावकाशात्मा बाधः स्यात् ॥

तन्न सांख्यानां कश्चिद्दोष उक्तः किंतु गुणतत्त्ववादिनामेव ? इत्याशङ्क्याह

अस्माकं तु स्वतन्त्रेश-

तथेच्छात्तोभसंगतम् ॥ २५७ ॥

अव्यक्तं बुद्धितत्त्वस्य

कारणं क्षोभिता गुणाः ।

इह तावज्जडं कारणं क्षुब्धतामनापन्नं सत् कार्यं जनयितुमेव नालमित्युक्तं, न चास्य क्षुब्धतापत्ता-

वपि क्षोभान्तरमपेक्षणीयम् ईश्वरेच्छातस्तथाभावात्, न च तामन्तरेण कार्यकारणभाव एव स्यात्,—इत्यग्रे भविष्यति,—इति नेहायस्तम् । अतश्च अस्मद्दर्शने प्रकृतितत्त्वाधिष्ठातुः स्वतन्त्रस्येश्वरस्य तथा स्वतन्त्रैवेयमिच्छा, तया क्षुब्धमव्यक्तं क्षोभिता गुणा गुणात्मतत्त्वात्मतां यातं सत् बुद्धितत्त्वस्य 'कारणं' तत्प्रसवसमर्थमित्यर्थः ॥ २५७ ॥

ननु यद्येवं तदीश्वरेच्छातः क्षुब्धं सदव्यक्तं बुद्धितत्त्वमेव जनयतु किमन्तरापरिकल्पितेन प्रतिपत्तिगौरवकारिणा गुणतत्त्वेन ? इत्याह

ननु तत्त्वेश्वरेच्छातो
यः क्षोभः प्रकृतेः पुरा ॥२५८॥
तदेव बुद्धितत्त्वं स्यात्
किमन्यैः कल्पितैर्गुणैः ।

एतदेव प्रतिविधत्ते

नैतत्कारणतारूप-
परामर्शाविरोधि यत् ॥ २५९ ॥

---

१ ग० पु० अविरोधीति पाठः ।

क्षोभान्तरं ततः कार्यं
बीजोच्छूनाङ्कुरादिवत् ।

तद्धि नाम कारणमुच्यते यत्क्षोभापत्तावपि तद्रूपतापरामर्शमेव अवरुन्ध्यात्, उच्छूनमपि हि बीजं बीजमेवोच्यते, तेन तत्क्षोभरूपमपि गुणतत्त्वं कारणत्वपरामर्शमवरोद्धुमुत्सहते, तथात्वेऽपि कथंचित् प्रकृत्यैक्यानपायात्; अतश्च गुणतत्त्वं नाम न प्रकृतितत्त्वातिरिक्तं तत्त्वान्तरं किंतु तस्यैव कार्यजननोन्मुखं क्षुब्धं रूपान्तरमिति । तस्य हि तत्त्वान्तरत्वे सप्तत्रिंशत्तत्त्वानि स्युरिति ।

'षट्त्रिंशत्तत्त्वमुख्यानि यथा शोध्यानि पार्वति ।
पृथिव्यादिशिवान्तानि.....॥' (स्व० ५।२)

इत्यादि दुष्येत् ।

'चतुर्विंशतितत्त्वानि ब्रह्मा व्याप्य व्यवस्थितः ।
प्रधानान्तं.....॥' (स्व० ११।४६)

इति । तथा

'.....पुरुषः पञ्चविंशकः ।'

इत्याद्यपि विरुद्ध्येत, एवं हि प्रधानं पञ्चविंशं स्यात् पुरुषश्च षड्विंशकः इति । तस्मात् यथा मायाया

ग्रन्थितत्त्वात्मना द्वैविध्यं तथा प्रकृतेरपि क्षुब्धाक्षुब्धरूपतया,—इत्यवगन्तव्यं येन सर्वं समञ्जसं स्यात् । बुद्धितत्त्वं तु सर्वस्यैवोद्रेकादत्यन्तमेव ततो विलक्षणं बीजादिवाङ्कुरः,—इति तत्कार्यमेव न तु कारणमपि,—इत्यवश्यमन्तरा बुद्धिकारणं गुणतत्त्वमङ्गीकार्यम् । एवं 'स्वतः क्षुब्धा एव गुणाः प्रकृतिः?—इत्यभिदधतोऽपि सांख्यस्य न दोषावकाशः,—इति प्रकाशितम् । तथात्वे हि गुणानामक्षुब्धमपि रूपं पूर्वं वक्तव्यम् अन्यथा क्षुब्धत्वं किमपेक्षं स्यात्; अत एवात्र 'बीजोच्छूनाङ्कुरादिवत्' इत्यवस्थात्रयमेव दर्शितम् ॥ २५९ ॥

एवं गुणतत्त्वं साधयित्वा तदन्तर्वर्ति भुवनजातमपि दर्शयति

क्रमात्तमोरजःसत्त्वे
गुरूणां पङ्क्तयः स्थिताः ॥ २६० ॥
तिस्रो[1] द्वात्रिंशदेकात-
स्त्रिंशदप्येकविंशतिः ।

---

१ क० ख० ग० पु० 'त्र्यशीतेः प्राक्त्रयस्त्रिंशत्तत्तस्त्रिंशच्च विंशतिः ।' इति पाठः ।

स्वज्ञानयोगबलतः
क्रीडन्तो दैशिकोत्तमाः ॥२६१॥
त्रिनेत्राः पाशनिर्मुक्ता-
स्ते ऽत्रानुग्रहकारिणः ।

'तमोरजःसत्त्वे' इति समाहारः । तदुक्तम्

'प्रथमा तमसः पङ्क्तिरुपरिष्टाद्व्यवस्थिता ।
तेषां नामानि कथ्यन्ते यथावदनुपूर्वशः ॥
शिवः प्रभुर्वामदेवश्चण्डश्चैव प्रतापवान् ।
प्रह्लादश्चोत्तमो भीमः करालः पिङ्गलस्तथा ॥
महेन्द्रो दिनकृच्चैव प्रतोदो दक्ष एव च ।
कडेवरश्च विख्यातस्तथैव च कटङ्कटः ॥
अम्बुहर्ता च नारीशः श्वेत ऋग्वेद एव च ।
यजुर्वेदः सामवेदस्त्वथर्वा सुशिवस्तथा ॥
विरूपाक्षस्तथा ज्येष्ठो विप्रो नारायणस्तथा ।
गण्डोदरो यमो माली गहनेशश्च पीडनः ॥
प्रथमा पङ्क्तिरुद्दिष्टा रुद्रैर्द्वात्रिंशता वृता ।
रजसश्चोपरिष्टात्तु द्वितीया पङ्क्तिरुच्यते ॥
शुक्रो दासः सुदासश्च लोकाक्षः सूर्य एव च ।
सुहोत्र एकपादश्च गृद्ध्रश्चैव शिवेश्वरः ॥
गौतमश्चैव योगीशो दधिबाहुस्तथापरः ।
ऋषभश्चैव गोकर्णो देवश्चैव गुहेश्वरः[२] ॥
गुह्येशानः शिखण्डी च जटी माली तथोग्रकः ।

---

१ क० ख० पु० स्तोत्रेति ग० पु० तेनेति पाठः ।

२ महेश्वर इति श्रीस्वच्छन्दपाठः ।

भृगुः शिखी तथा शूली सुगतिश्च सुपालनः ॥
अट्टहासो दारुकश्च लाङ्गुलिश्च त्रिदण्डकः ।
भावनश्च तथा भाव्यो लकुलेशस्तथा परः ॥
त्रिंशद्रुद्राः समाख्याता द्वितीया पङ्क्तिरुत्तमा ।
सत्त्वस्य चोपरिष्टात्तु तृतीया पङ्क्तिरुच्यते ॥
देवारुणो दीर्घबाहुररिर्भूतिश्च स्थाणुकः ।
सद्योजातस्तथा शण्डी षण्मुखश्चतुराननः ॥
चक्रपाणिश्च कूर्माक्षस्त्वर्धनारीश एव च ।
संवर्तकश्च भस्मीशः कामनाशन एव च ॥
कपाली भूर्भुवश्चैव वषट्कारस्तथैव च ।
वौषट्कारस्तथा स्वाहा सुधा च परिकीर्तिता ॥
[1]एकविंशतिरुद्रास्तु पङ्क्तिरेषा तृतीयिका । (स्व० १० । १०५८)

इति ॥ २६१ ॥

इयदन्तं भुवनानि संकलयति

बुद्धेश्च गुणपर्यन्त-
मुभे सप्ताधिके शते ॥ २६२ ॥
रुद्राणां भुवनानां च
मुख्यतोऽन्ये तदन्तरे ।

बुद्धेरिति, कार्यप्रपञ्चरूपायाः । तेन पृथ्वीतत्त्वादारभ्य गुणतत्त्वपर्यन्तं मुख्यतोऽन्यथा संख्याया आनन्त्यात् भुवनानां सप्ताधिकं शतद्वयं भवेत् ।

---

१ क० ख० ग० पु० एवं विंशतीति पाठः ।

तथा हि पृथिव्यामधस्तादनन्तस्यैकं भुवनम्, अन्तः कालाग्निकूष्माण्डहाटकब्रह्मविष्णुरुद्राणां षट्, बहिः शतरुद्राणां शतं, तदधिष्ठातुर्वीरभद्रस्य चैकम्,—इत्यष्टोत्तरं शतम्। अप्तत्त्वे तदधिष्ठातुर्वीरभद्रस्य गुह्याष्टकस्य च,—इति नव भुवनानि। तेजस्तत्त्वे शिवाग्नेरतिगुह्याष्टकस्य च,—इति नव। वायुतत्त्वे प्राणस्य गुह्याद्गुह्यतराष्टकस्य च,—इति नव। आकाशतत्त्वे आकाशस्य पवित्राष्टकस्य चेति नव। तन्मात्रेषु मूर्तीनामष्टौ, कर्मेन्द्रियाधिपानां पञ्च, ज्ञानेन्द्रियाधिपानां पञ्च, मनसि सोमस्यैकम्, अहङ्कारेऽहङ्कारेशस्य स्थाणवष्टकस्य चेति नव, बुद्धौ देवयोनिक्रोधतेजोयोगाख्यानि चत्वार्यष्टकानि, इति द्वात्रिंशत्, गुणतत्त्वे च पङ्क्तित्रयमिति ॥ २६२ ॥

अन्यत्र पुनरियान्विशेषः, इत्याह

योगाष्टकं गुणस्कन्धे
प्रोक्तं शिवतनौ पुनः ॥ २६३ ॥

'गुणस्कन्धे' गुणतत्त्वे ॥२६३॥

तद्ग्रन्थमेव पठति

योनीरतीत्य गौणो
स्कन्धे स्युर्योगदातारः ।
अकृतकृतविभुविरिञ्चा
हरिर्गुहः क्रमवशात्ततो देवी ॥२६४॥
करणान्यणिमादिगुणाः
कार्याणि प्रत्ययप्रपञ्चश्च ।
अव्यक्तादुत्पन्ना
गुणाश्च सत्त्वादयोऽमीषाम् ॥ २६५ ॥
धर्मज्ञानविरागा-
नैश्वर्यं तत्फलानि विविधानि ।
यच्छन्ति गुणेभ्योऽमी
पुरुषेभ्यो योगदातारः ॥ २६६ ॥
तेभ्यः परतो भुवनं
सत्त्वादिगुणासनस्य देवस्य ।
सकलजगदेकमातु-
र्भर्तुः श्रीकण्ठनाथस्य ॥ २६७ ॥

'प्रत्ययप्रपञ्च' इति विपर्ययादिः पञ्चाशदाद्यः । 'अमीषाम्' अकृतादीनां योगदातृणाम् । एतच्चैषां

---

१ ग० पु० धातार इति पाठः ।

दातृत्वं यत्परेभ्योऽपि धर्मादि प्रयच्छन्तीति । 'परत' इत्यूर्ध्वम् ॥२६७॥

ननु एभ्योऽप्यूर्ध्वमवस्थानेन अस्य किं स्यात् ? इत्याशङ्क्याह

येनोमागुहनील-
ब्रह्मऋभुक्षकृताकृतादिभुवनेषु ।
ग्रहरूपिण्या शक्त्या
प्राप्त्याधिष्ठानि भूतानि ॥ २६८ ॥

'नीलो' विष्णुः, ग्रहरूपिण्येति, अवष्टम्भात्मिकयेत्यर्थः । 'अधिष्ठानि' अधिष्ठितानि ॥ २६८ ॥

तत्तदधिष्ठानमेव व्याचष्टे

उपसंजिहीर्षुरिह य-
श्चतुराननपङ्कजं समाविश्य ।
दग्ध्वा चतुरो लोका-
ञ्ज्ञनलोकान्निर्मिणोति पुनः ॥२६९॥

यस्येच्छातः सत्त्वा-
दिगुणशरीरा विसृजति रुद्राणी ।

अनुकल्पो रुद्राण्या
वेदी तत्रेज्यतेऽनुकल्पेन ॥ २७० ॥
पशुपतिरिन्द्रोपेन्द्र-
विरिञ्चैरथ तदुपलम्भतो देवैः ।
गन्धर्वयक्षराक्षस-
पितृमुनिभिश्चित्रितास्तथा यागाः
॥२७१॥

'समाविश्य' इति अधिष्ठाय 'दग्ध्वा' इति अर्थात्कालाग्निरूपतया । 'रुद्राणी' उमादेवी । 'अनुकल्पो' गौणी मूर्तिः, 'वेदी' क्रियाशक्त्यात्मा पीठिका । तत्रेति वेद्यां । पशुपतिरिति, अर्थाद् बाह्यलिङ्गरूपः ॥ २७१ ॥

गुणानां यत्परं साम्यं
तदव्यक्तं गुणोर्ध्वतः ।
क्रोधेशचण्डसंवर्ता
ज्योतिःपिङ्गलसूरकौ ॥ २७२ ॥
पञ्चान्तकैकवीरौ च
शिखोदश्चाष्ट तत्र ते ।

'परं साम्यम्' इति अक्षुब्धतयावस्थानम्, अत एव

---

१ ग० पु० च तत इति पाठः ।

'अव्यक्तम्' इत्युक्तम्। इह सर्वत्र भुवनेश्वराणामादिग्रहणेनैव प्रक्रान्तेऽपि संग्रहे स्वकण्ठेनैव पाठेऽयमाशयो—यदत्र बहूनि शास्त्रान्तरेष्वसमञ्जसानि पाठान्तराणि संभवन्ति,—इति श्रोतॄणां मा भूत्संमोहः—इति । तदुक्तं श्रीरुरौ

'क्रोधेशचण्डसंवर्तज्योतिःपिङ्गलसूरकाः ।
पञ्चान्तकैकवीरेशशिखोदाख्या महेश्वराः ॥'

इति । श्रीनन्दिशिखायामपि

'अष्टौ भुवनपाला ये क्रोधेशश्चण्डसंज्ञकः ।
संवर्तः पिङ्गलो ज्योतिस्तथा पञ्चान्तको विभुः ॥
एकवीरः शिखोदश्च गुणानां परतः स्थिताः ।'

इति ॥ २७२ ॥

अत्रापि शिवतनावुक्तं विशेषं दर्शयति

गहनं पुरुषनिधानं
प्रकृतिर्मूलं प्रधानमव्यक्तम् । २७३ ॥
गुणकारणमित्येते
मायाप्रभवस्य पर्यायाः ।

नन्वेवमभिधानानामत्र प्रवृत्तौ किं निमित्तम्? इत्याशङ्क्याह

यावन्तः क्षेत्रज्ञाः
सहजागन्तुकमलोपदिग्धचितः ॥२७४॥
ते सर्वेऽत्र विनिहिता
रुद्राश्च तदुत्थभोगभुजः ।
मूढविवृत्तविलीनैः
करणैः केचित्तु विकरणाकाः ॥ २७५ ॥

यतोऽत्र सर्व एव क्षेत्रज्ञा रुद्रा वा विनिहिताः सन्तः केचिन्मूढादिरूपैः करणैस्तदुत्थं भोगं भुञ्जते, केचित्तु विकरणा एव,—इति । 'सहज' आणवः । 'आगन्तुकौ' कार्ममायीयौ ॥ २७५ ॥

मूढादिरूपत्वमेव व्याचष्टे

अकृताधिष्ठानतया
कृत्याशक्तानि मूढानि ।
प्रतिनियतविषयभाञ्जि
स्फुटानि शास्त्रे विवृत्तानि ॥२७६॥
भग्नानि महाप्रलये
सृष्टौ नोत्पादितानि लीनानि ।

---

१ ग० पु० भोगभाज इति पाठः ।

इच्छाधीनानि पुन-
र्विकरणसंज्ञानि कार्यमप्येवम् ॥ २७७ ॥

'कृत्यं' शब्दाद्यालोचनम्; अत एव बाधिर्यादि-विशिष्टवृत्तित्वे हेतुः 'प्रतिनियतविषयभाञ्जि' इति । स्रष्टावनुत्पाद एव लीनत्वे हेतुः । 'इच्छाधीनानि' इति स्वात्मायत्तानीत्यर्थः । अत एव श्रीकण्ठादीनां स्वतन्त्रेन्द्रियत्वम् । यदुक्तमत्रैव

'तेषूमापतिरेव प्रभुः स्वतन्त्रेन्द्रियो विकरणात्मा ।'
(तं० ८ । २२९)

एवमिति, मूढादिभेदाच्चतुर्धा ॥२७७॥

पुंस्तत्त्वे तुष्टिनवकं
सिद्धयोऽष्टौ च तत्पुरः ।
तावत्य एवाणिमादि-
भुवनाष्टकमेव च ॥ २७८ ॥

तावत्यो, नवाष्टौ च । तदुक्तम्

'अम्बा च सलिला ओघा वृष्टिः सार्धं च तारया ।
सुतारा च सुनेत्रा च कुमारी च ततः परम् ॥
उत्तमाम्भसिका चैव तुष्टयो नव कीर्तिताः ।
तारा चैव सुतारा च तारयन्ती प्रमोदिका ॥
प्रमुदिता मोदमाना रम्यका च ततः परम् ।
सदाप्रमुदिका चैव सिद्ध्यष्टकमुदाहृतम् ॥
अणिमा लघिमा चैव महिमा प्राप्तिरेव च ।

प्राकाम्यं च तथेशित्वं वशित्वं यदुदाहृतम् ॥
यत्र कामावसायित्वमणिमाद्यष्टकं स्मृतम् ।'
(स्व० १० । १०७०)

इति ॥ २७८ ॥

तुष्ट्यादीनां च किं रूपम् ? इत्याशङ्क्याह

अतत्त्वे तत्त्वबुद्ध्या यः
सन्तोषस्तुष्टिरत्र सा ।
हेयेऽप्यादेयधीः सिद्धिः

न चैतदस्मदुपज्ञमेवेत्याह

तथा चोक्तं हि कापिलैः ॥२७९॥

तदाह

[1]आध्यात्मिकाश्चतस्रः
प्रकृत्युपादानकालभाग्याख्याः ।
पञ्च विषयोपरमतोऽ-
र्जनरक्षासङ्गसंक्षयविघातैः ॥२८०॥
ऊहः शब्दोऽध्ययनं
दुःखविघातास्त्रयः सुहृत्प्राप्तिः ।
दानं च सिद्धयोऽष्टौ
सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः ॥२८१॥

---

१ सा० का० ४०—४१ ।

'आध्यात्मिका' इति अनात्मरूपे प्रकृत्यादौ भवन्तीत्यर्थः । तत्र प्रधानमहदादिरूपतयाष्टविधा प्रकृतिरेव विश्वोत्पत्तिनिमित्तं नान्यत्,—इति तत्रैव सङ्कल्पेषादिनिवृत्तिनिमित्तं भोक्तृत्वाध्यवस्यतो योगिनः प्रकृत्याख्या तुष्टिः । एवं च प्रकृतेरविशेषात् सर्वदा सर्वस्माच्च सर्वस्योत्पत्तिः स्यात्,—इति यथास्वोपादानं भावानामुत्पादो न्याय्यः,—इति । तदेव विश्वकारणम्,— इति पृथिव्यादावुपादान एव भोक्तृत्वाध्यवस्यत उपादानाख्या । एवमपि कालमपेक्ष्य भावानामुत्पत्तिरिति स एव विश्वकारणम्,—इति तत्रैव भोक्तृत्वाध्यवस्यतः कालाख्या । एवमपि भाग्यविशेषात्फलविशेषः,—इति तेषामेव विश्वकारणत्वमिति तत्रैव भोक्तृत्वाध्यवस्यतो भाग्याख्येति चतस्रः । पञ्चेति, बाह्यविषयोपरमस्य पञ्चहेतुत्वात्, ते चार्जनादयः, सर्वस्य सुखार्थं विषयेषु प्रवृत्तिः न च तेभ्यः कदाचिदपि तद्भवेत् यद्विषयाणामर्जनादौ त्रितये यतमानस्य पुंसः परं कष्टमेव, एवमपि एषामाकस्मिकः स्वयमेव संक्षयः,—इति महत्कष्टम्, न चैतत्परोपघातं विना सिद्धचेत्,—

इति कष्टात्कष्टतरम्। तदेषामेवं दोषदर्शनान्माध्यस्थ्यमवलम्बमानस्य योगिनः पञ्चेति नवास्वाद्यास्तुष्टयः क्रमेण उक्ताः। अनेन च पाठेनैवमीश्वरकृष्णः शिक्षितो—यदन्यथा नवानां तुष्टीनां स्वकण्ठेनैवोपादानं न स्यादिति । ऊहः प्रत्यक्षादिप्रमाणव्यतिरेकेण स्वयमेव तत्तदर्थविषयः प्रत्ययः, शब्दः स्वयमेवमप्रतिपत्तौ तद्विषयः सकृद्गुरूपदेशः, अध्ययनमेवमप्रतिपत्तौ तत्रैव पौनःपुन्येनाभ्यासः, एषां पञ्च प्रत्यनीका दुःखत्रयं सन्देहो दौर्भाग्यं चेति । तत्र दुःखत्रयस्य शास्त्रान्तरदृष्टैरुपायैर्विघातं कृत्वा कल्याणमित्रपरिचयाच्च सन्देहं व्युदस्य, दानेन च दौर्भाग्यमपाकृत्य पूर्वेषां त्रयाणामन्यतमेन साधयन्ति,—इत्यष्टौ सिद्धयस्तारावाः क्रमेण उक्ताः। ननु सर्वेषामविशेषेणोक्ताः सिद्धयः किं न स्युरित्याशङ्क्योक्तम् 'सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः' इति पूर्वो विपर्ययाशक्त्यतुष्टिलक्षणोऽङ्कुशो निरोधकारित्वात्, तेनाविशेषेण सर्वप्राणिषु सिद्धीनामप्रवृत्तिरिति ॥२८१॥

अणिमाद्यूर्ध्वतस्तिस्रः
पङ्क्तयो गुरुशिष्यगाः ।
तत्रापि त्रिगुणच्छाया-
योगात् त्रित्वमुदाहृतम् ॥ २८२ ॥
नाडीविद्याष्टकं चोर्ध्वं
पङ्क्तीनां स्यादिडादिकम् ।

तत्रापीति, अपिशब्देन न केवलं गुणतत्त्वे गुरूणां गुणत्रययोगितया त्रित्वमुक्तं यावदिहापि,—इत्यभिहितम् । तदुक्तम्

'यधोर्ध्वं गुरुशिष्याणां पङ्क्तित्रयमतः शृणु ।
मस्करी पूरणः कृत्स्नः कपिलः काश एव च ॥
सनत्कुमारगौतमवसिष्ठाद्यांशकास्तथा ।
काश्यपो नासिकेतुश्च गालवो भौतिकस्तथा ॥
शाकल्यस्तु समाख्यातो दुर्वासाः परमो मुनिः ।
वाल्मीकिश्च गुरुश्रेष्ठः सपराशरगालवः ॥
पिप्पलादश्च सौमित्रो वायुपुत्रो भदन्तकः ।
मस्कर्यादिभदन्तान्ता दृष्टादृष्टस्य वादिनः ॥
द्वाविंशतिर्गुरुवराः प्रथमा पङ्क्तिरिष्यते ।
जह्नुश्च तृणबिन्दुश्च मुनिस्तार्क्ष्यस्तथैव च ॥
ध्यानाश्रयोऽथ दीर्घश्च होताजगर एव च ।
अगस्त्यो वसुभौमश्च उपाध्यायश्च कीर्तितः ॥

शुक्रो भृग्वङ्गिरा रामो जमदग्निसुतोर्ध्वगः ।
स्थूलशिरा बालखिल्यो मनुजश्चेति कीर्तितः ॥
वज्रात्रेयो विशुद्धश्च शिवश्चारुरथानुगः ।
जह्वादिचारुपर्यन्ता द्वितीया पङ्क्तिरिष्यते ॥
हरो जण्ठी प्रतोदश्च अमरेशश्चतुर्थकः ।
कृष्णपिङ्गेशरुद्रश्च इन्द्रजिद्वृषभः शिवः ॥
यमः क्रूरश्च विख्यातो गङ्गाधर उमापतिः ।
भूतेश्वरः कपालीशः शङ्करश्च तथैव च ॥
अर्धनारीश्वरश्चैव पिङ्गलश्च तथा परः ।
महाकालश्च संवर्तो मण्डली त्वेकवीरकः ॥
तथा चान्यश्च विख्यातो भारभूतेश्वरो ध्रुवः ।
जह्न्वादिचारुपर्यन्ता ऋषयः पञ्चविंशतिः ॥
हरादयो ध्रुवान्ताश्च गुरवो विंशतिः स्मृताः ।'
(स्व० १० । १०८३)

इति । अत्र च पङ्क्तिद्वये गुरुशब्दोपादानान्मध्यमायां पङ्क्तौ शिष्या एव,—इत्यर्थसिद्धम् । नाडीरूपाश्च ता विद्यास्तदधिष्ठातृदेवता इत्यर्थः । तदुक्तम्

'इडा च चन्द्रिणी चैव शान्तिः शान्तिकरी तथा ।
माला च मालिनी चैव स्वाहा चैव सुधा तथा ॥' स्व०१० । १०८५)

इति ॥ २८२ ॥

ननु नाड्यधिष्ठातृदेवतानां पुंस्तत्त्वावस्थाने किं निमित्तम् ? इत्याशङ्क्याह

पुंसि नादमयी शक्तिः
प्रसराख्या च यत्स्थिता ॥ २८३ ॥

चोऽवधारणे। यद्यस्मात्पुंस्तत्त्वाधिष्ठातरि संकुचितरूपत्वात् अणुशब्दादिव्यपदेश्ये पुंस्येव, नदति स्वात्माभेदेन विश्वं परामृशति इति 'नादः' स्वातन्त्र्यात्मपरकर्तृत्वलक्षणो विमर्शः, तन्मयी शक्तिर्बहीरूपतया प्रसरणशीलत्वात् प्रसराख्या स्थिता, क्रियाशक्तिपर्यन्तेन स्थूलरूपेण स्फुरतीत्यर्थः । इदमुक्तं भवति, चिच्छक्तिरेव हि स्वस्वातन्त्र्यात् संकुचितात्मरूपतामाभास्य देहाद्यात्मतामपि जिघृक्षुः प्रथमं नाडीरूपतामियादिति । यदुक्तं प्राक्

'चित्स्पन्दप्राणवृत्तीनामन्त्या या स्थूलता सुधिः ।
सा नाडीरूपतामेत्य देहं सन्तानयेदिदम्' ॥ (तं० ७ । ६६)

इति ॥ २८३ ॥

ननु भवेदेवं यदि पुंसः कर्तृत्वं सिद्ध्येत्, तदेव पुनरतिदुर्लभं यत् तथात्वेऽस्य क्षीरादिवदचैतन्यं स्यात्,—इत्याशङ्क्याह

न ह्यकर्ता पुमान्कर्तुः
कारणत्वं च संस्थितम् ।

एवं हि भुजिक्रियाकर्तृत्वायोगात् भोक्तृत्वमपि अस्य न स्यात् । ननु भवद्भिर्जगतां कार्यत्वं साधयितुं पुंसः कर्तृत्वमभ्युपेयते, तच्च अस्माकं प्रकृतिरेव उद्बोढुमुत्सहते,—इति किं तेन अचैतन्याधायिना,—इत्याशङ्क्योक्तं 'कर्तुः कारणत्वं च संस्थितम्' इति । कर्तुरिति न तु जडस्य प्रकृत्यादेः । एतच्च समनन्तराह्निक एव साधयिष्यते तत एवावधार्यम् ॥

ननु यद्यचैतन्यात्पुंसः कर्तृत्वं नाभ्युपेयेत तत्तथात्वेऽपि तन्नोपरमेत्, इत्याह

अकर्तर्यपि वा पुंसि
सहकारितया स्थिते ॥ २८४ ॥
शेषकार्यात्मतैष्टव्या-
न्यथा सत्कार्यहानितः ।

इह तावद्विश्वोत्पत्तौ प्रकृतिः कारणं सा च पुरुषमनपेक्ष्य न किंचिदाधातुं शक्नुयात् तत्संयोगेनैव विश्वोत्पादस्योक्तत्वात् । यदाहुः

पुरुषस्य दर्शनार्थः कैवल्यार्थस्तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संसर्गस्तत्कृतः सर्गः ॥(सां० २१ का०)

इति । तदन्वयव्यतिरेकानुविधानात् पुमानपि विश्वो-

त्पत्तौ कारणं, तच्च विश्वस्य तद्रूपानुवृत्त्यसंभवात् नोपादानरूपं किंतु सहकारिरूपं तथात्वे च अस्योपादेयातिरिक्तसहकार्यात्मतावश्यमेषितव्यान्यथा सत्कार्यवादो हीयेत,—इत्येवमपि अस्य विश्वात्मतापरिणामादचैतन्यमेवापतेत् ॥२८४॥

तदेवं विश्वोत्पत्तौ पुंस एव कर्तृत्वमेष्टव्यं येनास्य तत्तद्रूपोपग्रहेऽपि स्वस्वरूपाप्रच्युतेरचैतन्यं न स्यात्, तदाह

तस्मात्तथाविधे कार्ये
या शक्तिः पुरुषस्य सा ॥२८५॥
तावन्ति रूपाण्यादाय
पूर्णतामधिगच्छति ।

'तथाविध' इति क्रियाशक्त्यात्मनि स्थूलरूपे । तावन्तीति, नाडीविद्यादिरूपाणि । पूर्णतामित्येवमपि स्वात्ममात्रविश्रान्तत्वात् ॥२८१॥

इदानीं प्रकृतमेवानुसरति

नाड्यष्टकोर्ध्वे कथितं
विग्रहाष्टकमुच्यते ॥ २८६ ॥

कथितमिति, सर्वशास्त्रे ॥२८६॥

तदाह

कार्यं हेतुर्दुःखं
सुखं च विज्ञानसाध्यकरणानि ।
साधनमिति विग्रहता-
युगष्टकं भवति पुंस्तत्त्वे ॥२८७॥

कार्यं तन्मात्रं हेतुरिति, वागादीन्द्रियदशकात्म कारणम् । 'विज्ञानसाध्य' इत्यनेन बुद्धिकर्मेन्द्रियाभिव्यङ्ग्यं ज्ञानमात्रं व्यापारमात्रं चोक्तम्। करणेति, अन्तःकरणत्रयम् । साधनमिति, सर्वकारणं प्रधानमित्यर्थः । विग्रहतायुगिति, सूक्ष्मशरीरारम्भकत्वात्, भवति—इति सूक्ष्मेण रूपेण, स्थूलेन रूपेणैषामुक्तत्वात्; परेण च रूपेण मायाया वक्ष्यमाणत्वात् ॥ २८७ ॥

भुवनं देहधर्माणां
दशानां विग्रहाष्टकात् ।
अहिंसा सत्यमस्तेयं
ब्रह्माकल्काक्रुधो गुरोः ॥ २८८ ॥

शुश्रूषाशौचसन्तोषा
ऋजुतेति दशोदिताः ।
पुंस्तत्त्व एव गन्धान्तं
स्थितं षोडशकं पुनः ॥ २८९ ॥
आरभ्य देहपाशाख्यं
पुरं बुद्धिगुणास्ततः ।
तत्रैवाष्टावहंकार-
स्त्रिधा कामादिकास्तथा ॥ २९० ॥
पाशा आगन्तुकगाणो-
शवैद्येश्वरभेदिताः ।
त्रिविधास्ते स्थिताः पुंसि
मोक्षमार्गोपरोधकाः ॥ २९१ ॥

विग्रहाष्टकादिति, ऊर्ध्वम् । पुंस्तत्त्व एवेत्यर्थात्, दशविधस्यापि धर्मस्योर्ध्वम् । देहपाशेत्याद्यावृत्त्यापि एतदनन्तरं देहपाशानां सूक्ष्मदेहारम्भिणां विषयशब्दवाच्यानां शब्दादीनां पञ्चानामपि पुरं व्याख्येयम् । तदुक्तम्

---

१ ग० पु० के मनः इति पाठः ।
२ ग० पु० आगन्तुमायोशवैद्येश्वरभिदोदिता इति पाठः ।

'शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः।
विषयास्तु समाख्याताः शोधनीयाः प्रयत्नतः॥'

(स्व०१०।१०९६)

इति। एतच्च यद्यपि श्रीस्वच्छन्दे त्रिविधादहङ्कारादनन्तरमुक्तं तथापि इह विकारषोडशकसाजात्येनैवं व्याख्यातम्। शब्दादीनामेव च सर्वतोमुखं परं बन्धकत्वं समस्ति,—इति परसूक्ष्मस्थूलतयैषां तत्र तत्र पौनःपुन्येन शोध्यत्वेनाभिधानम्,—इति न कश्चिद्दोषः। कामादिकाः पाशास्त्रिविधा उदिता इति संबन्धः। एषां चात्र अवस्थाने हेतुर्मोक्षमार्गोपरोधका इति। तदुक्तम्

'कामः क्रोधश्च लोभश्च मोहः पैशुन्यमेव च।
जन्ममृत्युजराव्याधिक्षुत्तृट्तृष्णास्तथैव च॥
विषादश्च भयं चैव मदो हर्षणमेव च।
रागो द्वेषश्च वैचित्त्यं कुपितानृतद्रोहिता॥
माया मात्सर्यं धर्मश्च अधर्मश्चास्वतन्त्रता।
आगन्तुकाश्च बोद्धव्या गणपाशान्निबोध मे॥
देवी नन्दिमहाकालौ गणेशो वृषभस्तथा।
भृङ्गी चण्डेश्वरश्चैव कार्तिकेयोऽष्टमः स्मृतः॥
अनन्तस्त्रितनुः सूक्ष्मः श्रीकण्ठश्च शिवोत्तमः।
शिखण्डी चैकनेत्रश्च एकरुद्रस्तथा परः॥
विद्येश्वराष्टकान्पाशान्दीक्षाकाले विशोधयेत्।'

(स्व०१०।११०१)

इति ॥ २६१ ॥

नन्विह त्रिविधाः पाशाः—आणवः कार्मो मायीयश्चेति । तत्र विकारषोडशकादेः पाशत्वं यद्यभिधीयते तदास्तां, स हि मायीयस्यैव पाशस्य प्रपञ्चः; यत्पुनरिदं गणानां विद्येशानां च पाशत्वमुच्यते तदपूर्वमिव नः प्रतिभासते,—इत्याशङ्क्याह

यत्किंचित्परमाद्वैत-
संवित्स्वातन्त्र्यसुन्दरात् ।

पराच्छिद्वादुक्तरूपा-
दन्यत्तत्पाश उच्यते ॥ २६२ ॥

इह खलु पूर्वमुक्तस्वरूपात्प्रकाशैकमात्रवपुषः 'परात्' पूर्णाच्छिद्वात् यत्किंचित् न तु नियतमेव 'अन्यत्' अतिरिक्तं तन्निखिलमेव पाश उच्यते, बन्धकतयैव अभिमतमित्यर्थः । ननु परस्मात्प्रकाशादन्यन्नाम न किंचिदेव संभवेत् तदतिरेकेणास्य भानायोगात्, तथात्वे वा तदेकमात्ररूपत्वात् तत्कस्य पाशत्वेन अभिधानम् ? इत्याशङ्क्योक्तं 'परमाद्वैत-

संवित्स्वातन्त्र्यसुन्दरात्' इति। स हि परः शिवः परमाद्वैतसंविद्रूपत्वेऽपि स्वातन्त्र्यसुन्दरो येन स्वं स्वरूपं गोपयित्वा तेन तेन संकुचितेन रूपेण प्रस्फुरेत्, यतोऽयं भेदप्रथात्मा मायीय एव मलः प्रबलतामियात् ॥ २९२ ॥

नन्वेवं वेदकैकस्वरूपात् पराच्छिवादन्ये वेद्यैकरूपास्तनुकरणादयो जडा यदि पाशत्वेनेष्यन्ते तदास्तां, कथं पुनः वेदकैकस्वभावाः पररूपाः प्रमातारोऽपि ? इत्याशङ्क्याह

तदेवं पुंस्त्वमापन्ने[1]
पूर्णोऽपि परमेश्वरे ।
तत्स्वरूपापरिज्ञानं
चित्रं हि पुरुषास्ततः ॥ २९३ ॥

इह खलु पारमेश्वराद्रूपात् भेदेन प्रथनं नाम बन्धो यदख्यातिरिति सर्वत्रोद्घोष्यते, तच्च वेदकानां वेद्यानां चाविशिष्टम्,—इति सर्वेषामपि पाशरूपतायां समानः पन्थाः। एवमपि तत्स्वरूपापरिज्ञाने पुंसामन्योन्यमतिशयः संभवेत् येनैषा-

१ क० ख० पु० तदेव पुंस्त्वमादत्ते इति पाठः।

मपि वैचित्र्यम् । तथा हि—कस्यचिदेक एव मलः कस्यचित् द्वौ, कस्यचित्त्रयोऽपीति । एवमपि पाशरूपतायामेषां न कश्चिद्विशेषः, पारमेश्वरस्य स्वरूपापरिज्ञानस्य तादवस्थ्यात् । एवं च विद्येशत्वं त्वपरा मुक्तिः,—इत्यादि युक्तमेव । अत एव

'समनान्तं वरारोहे पाशजालमनन्तकम् ।' (स्व०४।४२९)

इत्याद्युक्तम् ॥ २९३ ॥

एवमिहापि अनुक्तं यत्किंचित्पराच्छिवादन्यत् तत्सर्वं पाशतयैव ज्ञेयमित्याह

उक्तानुक्तास्तु ये पाशाः
परतन्त्रोक्तलक्षणाः ।
ते पुंसि सर्वे तांस्तत्र
शोधयन्मुच्यते भवात् ॥ २९४ ॥

पुंस ऊर्ध्वं तु नियति-
स्तत्रस्थाः शंकरा दश ।
हेमाभाः सुसिताः काल-
तत्त्वे तु दश ते शिवाः ॥ २९५ ॥

कोटिः षोडशसाहस्रं
प्रत्येकं परिवारिणाः ।
रागे वीरेशभुवनं
गुर्वन्तेवासिनां पुरम् ॥ २९६ ॥
पुरं चाशुद्धविद्यायां
स्याच्छक्तिनवकोज्ज्वलम् ।
मनोन्मन्यन्तगास्ताश्च
वामाद्याः परिकीर्तिताः ॥ २९७ ॥
कलायां स्यान्महादेव-
त्रयस्य पुरमुत्तमम् ।

'शंकरा' इत्येतत्संज्ञाः ।

'वामदेवस्तथा शर्वस्तथा चैव भवोद्भवौ ।
वज्रदेहः प्रभुश्चैव दाता च क्रमविक्रमौ ॥
सुप्रभेदश्च दशमो नियत्यां शंकराः स्मृताः ।'
(स्व० १०। ११०४)

इति । हेमाभा इति, शंकराः । सुसिता इति, शिवाः । तदुक्तम्

'हेमाभाः शंकराः प्रोक्ताः शिवाः स्फटिकसंनिभाः ।'
(स्व० १०। ११०८)

इति ।

'शुद्धो बुद्धः प्रबुद्धश्च प्रशान्तः परमाक्षरः ।
शिवश्च सुशिवश्चैव ध्रुवश्चाक्षरशंभुराट् ॥
दशैते कालतत्त्वे तु शिवा ज्ञेया वरानने ।'
(स्व० १० । ११०७)

इति च । वीरेशभुवनमिति, अर्थादष्टसंख्यावच्छिन्नम् । 'परम्' इति अन्यत् दशसंख्यावच्छिन्नम् । तदुक्तम्

'अत ऊर्ध्वं हरिहरौ रागतत्त्वे निबोध मे ।
संहृष्टः सुप्रहृष्टश्च सुरूपो रूपवर्धनः ॥
मनोन्मनो महावीरो वीरेशाः परिकीर्तिताः ।'
(स्व० १० । १११२)

इति ।

'कल्याणः पिङ्गलो बभ्रुर्वीरश्च प्रभवस्तथा ।
मेधातिथिश्छेदकश्च दाहकः शास्त्रकारिणः ॥
पञ्च शिष्यास्तथाचार्या दशैते संव्यवस्थिताः ।'
(स्व० १० । १११४)

इति च । 'ता' इति शक्तयः । तदुक्तम्

'वामा ज्येष्ठा च रौद्री च काली विकरणी तथा ।
बलविकरणी चैव बलप्रमथनी तथा ॥
सर्वभूतदमनी च तथा चैव मनोन्मनी ।' (स्व० १०।११४४)

इति च । अत्र च स्त्रीपाठ एव साधुर्महाजनैः परिगृहीतत्वात् । उत्तममिति, विश्वस्य परायां काष्ठायामधिरोहात् । तदुक्तम्

'महादेवो महातेजा महाज्योतिः.....।'

इति ॥ २९७ ॥

इदानीं ग्रन्थितत्त्वशक्त्यात्मना त्रिप्रकारं मायायाः स्वरूपं निरूपयति

ततो माया त्रिपुटिका
मुख्यतोऽनन्तकोटिभिः ॥२९८॥
आक्रान्ता सा भगबिलैः
प्रोक्तं शैव्यां तनौ पुनः ।
अङ्गुष्ठमात्रपर्यन्तं
महादेवाष्टकं निशि ॥ २९९ ॥
चक्राष्टकाधिपत्येन
तथा श्रीमालिनीमते ।

मुख्यत इति, अन्यथा हि अस्या वक्ष्यमाणदृशा पुटानामानैक्यम् । 'महादेवाष्टकं निशि' इत्यत्रापि 'शैव्यां तनौ' इति योज्यम् । तदुक्तं तत्र

'भगबिलसहस्रकलितं गुह्याशिरो यत्प्रपञ्चसर्वगतम् ।'

इति ।

'तत्रानघप्रभावः प्रथमश्चक्राधिपो महातेजाः ।
वामो नाम्ना बलवान् द्वितीयचक्राधिपो रुद्रः ॥

चक्रं भवोद्भवाख्यस्तृतीयमधितिष्ठति स्ववीर्येण ।
प्रभुरेकपिङ्गचक्षुश्चक्रस्य पतिश्चतुर्थस्य ॥
ईशान इति प्रथितो यच्चक्रं पञ्चमं प्रवर्तयति ।
षष्ठस्याधिष्ठाता भुवनेशो भुवनचक्रस्य ॥
प्रथितः पुरःसराख्यो यः सप्तमचक्रनायको देवः ।
अङ्गुष्ठमात्रनामा पतिरष्टमभुवनचक्रस्य ॥'

इति च । न केवलमत्रैवैतदुक्तं यावदन्यत्रापि,—इत्याह 'तथा श्रीमालिनीमते' इति । यदुक्तं तत्र

'महातेजःप्रभृतयो मण्डलेशानसंज्ञकाः ।
मायातत्त्वे स्थितास्तत्र वामदेवभवोद्भवौ ॥
एकपिङ्गेक्षणेशानभुवनेशपुरःसराः ।
अङ्गुष्ठमात्रसहिताः कालानलसमत्विषः ॥'
(मा० वि० ५ । २९)

इति ॥ २९९ ॥

अत्र च श्रीपूर्वशास्त्रादपि विशेषान्तरमस्ति,—इत्याह

वामाद्याः पुरुषादौ ये
प्रोक्ताः श्रीपूर्वशासने ॥ ३०० ॥
ते मायातत्त्व एवोक्ता-
स्तनौ शैव्यामनन्ततः ।

पुरुषादाविति, आदिशब्दाद्रागतत्त्वम् । यदुक्तं तत्र

'पुरुषे वामभीमोग्रभवेशानैकवीरकाः।
प्रचण्डो माधवोऽजश्च अनन्तैकशिवावध॥'

(मा० वि० ५। २६)

इति। 'अनन्तत' इति अनन्तपर्यन्तमित्यर्थः। यदुक्तं तत्र

'वामस्य ततो भुवनं तस्माद्भैमं ततोऽपि चोग्रस्य।
तस्माद्भवस्य भुवनं तदुपरि शर्वस्य देवस्य॥'

इात।

'तस्माद्गुणैर्विचित्रैर्भुवनवरं चकवीरस्य।'

इति।

'अपरिमितगुणनिधानं भुवनवरं तदुपरि प्रचण्डस्य।
यत्र प्रचण्डनामा स्थितोऽनुशास्त्येकवीरादीन्॥'

इति च॥ ३००॥

अत्र चैषामुपदेशेन कोऽर्थः? इत्याशङ्क्याह

कपालव्रतिनः स्वाङ्ग-
होतारः कष्टतापसाः॥ ३०१॥
सर्वाभयाः खड्गधारा-
व्रतास्तत्तत्त्ववेदिनः।

'तत्तत्त्ववेदिन' इति वामादिसायुज्यभाज इत्यर्थः। तदुक्तम्

'ज्ञातज्ञेया विप्राः कापालव्रतभृतो विगतसंगाः[1]।
भस्मोपलेपनिष्ठा व्रजन्ति वामस्य सायुज्यम् ॥
उपलब्धवेदनीया अतिभीमपदेप्सवो निजशिरोभिः ।
स्वयमुल्लूनैरिष्ट्वा भैमं गच्छन्ति तद्धाम ॥
विहितोग्रयोगविधयो ये धीरा दुष्करे तपस्युग्रे ।
ध्यायन्त्युग्रमजस्रं तेऽपि लभन्ते गुणानौग्रान् ॥
विज्ञाय भवं देवं भीतानामभयदानसंसिद्धाः ।
भवपदमारोहन्तो ध्यानाहितचेतसो विप्राः ॥
अग्वस्त्रालङ्कारैरभिरामं रूपमात्मनः कृत्वा ।
असिधाराव्रतनिष्ठाः पूर्वपदं ध्यायिनो यान्ति ॥'

इति ॥ ३०१ ॥

नन्वेषामपि सृष्ट्यादिकारी प्रभुरनन्तोऽस्ति,—इति किमेतावत्पदप्राप्त्या,—इत्याशङ्क्याह

क्रमात्तत्तत्त्वमायान्ति
यत्रेशोऽनन्त उच्यते ॥ ३०२ ॥

'तत्तत्त्वम्' इति मायीयं प्रधानं भुवनमित्यर्थः । ईश इति, अर्थादियदन्तस्याध्वनः ॥३०२॥

किमत्र प्रमाणम् ? इत्याशङ्क्याह

उक्तं च तस्य परतः
स्थानमनन्ताधिपस्य देवस्य ।

---

१ ग० पु० विगलितसङ्गा इति पाठः ।

स्थितिविलयसर्गकर्तु-
गुहाभगद्वारपालस्य ॥ ३०३ ॥

उक्तमिति, शिवतनावेव। 'परत' इत्यूर्ध्वम्। 'गुहा' इति माया ॥ ३०३ ॥

स्थित्यादिकारित्वमेवास्य दर्शयति

धर्मानणिमादिगुणा-
ञ्ज्ञानानि तपःसुखानि योगांश्च ।
मायाबिलात्प्रदत्ते
पुंसां निष्कृष्य निष्कृष्य ॥ ३०४ ॥
तच्छक्तीड्स्वबला
गुहाधिकारान्धकारगुणदीपाः ।
सर्वेऽनन्तप्रमुखा
दीप्यन्ते शतभवप्रमुखान्ताः ॥ ३०५ ॥
सोऽव्यक्तमधिष्ठाय
प्रकरोति जगन्नियोगतः शम्भोः ।
शुद्धाशुद्धस्रोतोऽ-
धिकारहेतुः शिवो यस्मात् ॥ ३०६ ॥

---

१ क० ख० पु० तस्मादिति पाठः ।

"तच्छक्तीति, तच्छब्देन अनन्तपरामर्शः । अनेन च न केवलमयं क्षेत्रज्ञानामेव स्थितिं विधत्ते यावद्रुद्राणामपीत्युक्तम् । 'गुणाः' सर्वज्ञत्वादयः । अनन्तप्रमुखा इति, अनन्तस्वामिका इत्यर्थः । जगदिति, कार्यकारणात्मनियोगतः शम्भोरिति, न तु स्वेच्छामात्रात् । अत्र हेतुः 'शुद्धेत्यादिना' । तदुक्तं तत्र

'अव्यक्तमधिष्ठाय प्रकरोति जगद्यतः स देवेशः ।
संसारमहाविवरे पर्यस्तांस्त्रायते च यतः ॥
शिवयोगबलोपेतस्तस्मात्पत्युर्नियोग आसीनः ।
शुद्धाशुद्धस्रोतोऽधिकारहेतुः शिवो ज्ञेयः ॥'

इति ॥ ३०६॥

ननु को नाम शुद्धाशुद्धयोः स्रोतसोरधिकार ? इत्याशङ्क्याह

शिवगुणयोगे तस्मिन्
महति पदे ये प्रतिष्ठिताः प्रथमम् ।
तेऽनन्तादेर्जगतः
सर्गस्थितिविलयकर्तारः ॥ ३०७ ॥
मायाबिलमिदमुक्तं
परतस्तु गुहा जगद्योनिः ।

'महति पदे' इति शुद्धे स्रोतसि। तस्य विशेषणं 'शिवगुणयोगे' इति, सर्वज्ञत्वादिसंभवात्। अनन्तादेरिति 'अनन्तो' मायातत्त्वाधिष्ठाता। मायाबिलमिति, ग्रन्थिरूपा माया, गुहेति, तत्त्वरूपा। 'परत' इति अशुद्धे स्रोतसीत्यर्थः। तेन ग्रन्थितत्त्वरूपतया द्विविधापि माया जगद्योनिरिति संबन्धः। उक्तं च तत्र

'परतो गुहा भगवती जगतामुत्पत्तिकारणं माया।
यस्यां स्थितिमनुभूय प्रविलीयन्ते पुनर्लोकाः॥'

इति॥ ३०७॥

अत्र च भगसंज्ञायां प्रवृत्तौ किं निमित्तम्? इत्याशङ्क्याह

उत्पत्त्या तेष्वस्याः
पतिशक्तिक्षोभमनुविधीयमानेषु॥३०८॥
योनिविवरेषु नाना-
कामसमृद्धेषु भगसंज्ञा।
कामयते पतिरेना-
मिच्छानुविधायिनीं यदा देवीम्॥३०९॥

१ ग० पु० येष्विति पाठः।

प्रतिभगमव्यक्ताद्याः
प्रजास्तदास्याः प्रजायन्ते ।

'तेषु' इति सृष्ट्यादिलाभरूपेष्वित्यर्थः । 'अस्या' इति ग्रन्थिरूपाया मायायाः । 'एनाम्' इति ग्रन्थिरूपामेव मायाम् । 'प्रतिभगम्' इति भगे भगे इत्यर्थः । अत एव प्रकृत्यण्डादेरसंख्यातत्वम् । एतत्साम्यनिमित्त एव चात्र लौकिकः स्त्रीपुंसवृत्तान्तोऽपि कटाक्षितः ॥ ३०९ ॥

एते चानवच्छिन्ना इत्याह

तेषामतिसूक्ष्माणा-
मेतावत्त्वं न वर्ण्यते विधिषु ॥३१०॥

'विधिषु' शास्त्रेषु ॥ ३१० ॥

एतदेव दृष्टान्तोपदर्शनेन द्रढयति

अववरकाण्येकस्मि-
न्यद्वत्साले बहूनि बद्धानि ।
योनिबिलान्येकस्मिं-
स्तद्वन्मायाशिरःसाले ॥ ३११ ॥

मायापटलैः सूक्ष्मैः
कुड्यैः पिहिताः परस्परमदृश्याः ।
निवसन्ति तत्र रुद्राः
सुखिनः प्रतिबिलमसंख्याताः ॥३१२॥
स्थाने सायुज्यगताः
सामीप्यगताः परे सलोकस्थाः ।

'तत्र स्थाने' इति ग्रन्थिरूपायां मायायाम् । असंख्यातत्वे निमित्तमाह 'सायुज्य' इत्यादि ॥३१२॥

एतदेवान्यत्रापि अतिदिशति

प्रतिभुवनमेवमयं
निवासिनां गुरुभिरुद्दिष्टः ॥३१३॥

एषां चाधिष्ठातृभिः समामियत्ताकलने निमित्ताभावं दर्शयति

अपि सर्वसिद्धवाचः
क्षीयेरन्दीर्घकालमुद्गीर्णाः ।
न पुनर्योन्यानन्त्या-
दुच्यन्ते स्रोतसां संख्याः ॥ ३१४ ॥

---

१ ग० पु० नमयं न्याय इति पाठः ।

नन्वस्मात्स्रोतसः किं स्रोतोन्तराणि विलक्षणानि न वा ? इत्याशङ्क्याह

तस्मान्निरयाद्येकं
यत्प्रोक्तं द्वारपालपर्यन्तम् ।
स्रोतस्तेनान्यान्यपि
तुल्यविधानानि वेद्यानि[1] ॥३१५॥
अव्यक्तकले गुहया
प्रकृतिकलाभ्यां विकार आत्मीयः ।
ओतः प्रोतो व्याप्तः
कलितः पूर्णः परिक्षिप्तः[2] ॥३१६॥

गुहाया हि अव्यक्तं कला च विकारः, अतश्च तयाव्यक्तकलयोरोतत्वादि न्याय्यम् । कारणेन हि स्वकार्यापूरकेण भाव्यम् । यदाहुः

'कारणमापूरकं च तस्यैव ।'

इति । आपूरणमेव च 'ओतः प्रोत' इत्यादिना विभक्तम् । 'आत्मीय' इति महदादिरविद्यादिश्च ॥ ३१६ ॥

---

१ ग० पु० वेदितव्यानीति पाठः । २ ग० पु० प्रति इति पाठः ।

एवमस्याः शास्त्रान्तरेभ्यो विशेषं दर्शयित्वा प्रकृतमेवाह

मध्ये पुटत्रयं तस्या[1]
रुद्राः षडधरेऽन्तरे ।
एक ऊर्ध्वे च पञ्चेति
द्वादशैते निरूपिताः ॥ ३१७ ॥

'अधरे' इति पुटे । एवमन्यत्र ॥ ३१७ ॥

तान्येव पठति

गहनासाध्यौ हरिहर-
दशेश्वरौ [2]त्रिकलगोपती षडिमे ।
मध्येऽनन्तः क्षेमो
द्विजेशविद्येशविश्वशिवाः ॥ ३१८ ॥

इति पञ्च तेषु पञ्चसु
षट्सु च पुटगेषु तत्परावृत्त्या ।
परिवर्त्तते स्थितिः किल
देवोऽनन्तस्तु सर्वथा मध्ये ॥३१९॥

तदुक्तम्

---

१ ग० पु० त्रये तस्यामिति पाठः । २ क० ख० पु० त्रिदशेति पाठः ।

'गहनश्च असाध्यश्च तथा हरिहरः प्रभुः ।
दशेशानश्च देवेशि त्रिकलो गोपतिस्तथा ॥
अधःपुटे तु विज्ञेया मायातत्त्वे वरानने ।
क्षेमेशो ब्राह्मणस्वामी विद्येशानस्तथैव च ॥
विश्वेशश्च शिवश्चैव अनन्तः षष्ठ उच्यते ।
ऊर्ध्वं मायापुटस्थास्तु रुद्रा एते प्रकीर्तिताः ॥
एषां मध्ये तु भगवाननन्तेशो जगत्पतिः ।
(स्व० १० । ११२५)

इति । अत्र चैषां परेण रूपेणान्यथावस्थानेऽपि अनन्तस्य न कश्चिद्विशेषः,—इत्याह 'तेषु' इत्यादि । पुटगोष्विति, अर्थादूर्ध्वाधः । तत्परावृत्त्येति, तच्छब्देन रुद्राणां परामर्शः, तेन अधःपुटे ऊर्ध्वपुट एव च उपर्युपरिभावस्य व्यत्ययादेषां स्थितिः परिवर्तते,—इति यावत् । तदुक्तम्

प्रथमेन तु भेदेन रुद्रा द्वादश कीर्तिताः ।
अस्मिंस्तु ये महारुद्रा मायातत्त्वे व्यवस्थिताः ॥
तानहं संप्रवक्ष्यामि भेदत्रयविभागशः ।
गोपतिश्च ततो देवि अधोग्रन्थौ व्यवस्थितः ॥
ग्रन्थ्यूर्ध्वं संस्थितो विश्वस्त्रिकलः क्षेम एव च ।
ब्रह्मणोऽधिपतिश्चैव शिवश्चैव स पञ्चमः ॥
अध ऊर्ध्वमनन्तस्तु···· ····।' (स्व० १० । ११३०)

इति । एवमत्र अधःपुटे परापररूपतया सप्त भुव-

१ रा० पु० अत ऊर्ध्वमिति पाठः ।

नानि, ऊर्ध्वपुटे च दश, मध्यपुटे च पुनरेकमेव,—इत्यष्टादश ॥३१९॥

अन्यत्र पुनरियान्विशेषः,—इत्याह

[1]ऊर्ध्वाधरगकपालक-
पुटषट्कयुगेन तत्परावृत्त्या ।
मध्यतोऽष्टाभिर्दिक्स्थै-
र्व्याप्तो ग्रन्थिर्मतङ्गशास्त्रोक्तः ॥३२०॥

षट्कयुगेनेति, रुद्राणां, तेनोर्ध्वकपालेऽवस्थितैः षड्भिरनन्ताद्यै रुद्रैरधश्च गोपत्यादिभिर्मध्ये च विग्रहेशाद्यैरष्टभिः,—इति विंशत्या रुद्राणां मायाग्रन्थिरधिष्ठित इत्यर्थः । तदुक्तं तत्र

'ग्रन्थेरूर्ध्वं कपालानि षट्संख्यातानि सुव्रत ।
तावन्त्यधस्ताद्रम्याणि रचितानीह धातुभिः ॥'
(मतं० ८। ६७)

इत्याद्युपक्रम्य

'अनन्तोऽनन्तवीर्यात्मा सर्वेषां मूर्ध्नि संस्थितः ।
ततोऽधस्ताच्छिवो नाम रुद्रो भुवनकृत् प्रभुः ॥

---

१ गं० पु० 'ऊर्ध्वाधःस्थकपालक पुटषट्कयुगेन मध्यतोऽष्टाभिः । दिक्स्थैर्व्याप्तो मायाग्रन्थिः श्रीमन्मतङ्गशास्त्रोक्तः' इति पाठः । क० ख० भुवनभुगिति पाठः ।

विश्वेशश्च महातेजा विद्येशानः परस्ततः ।
ततोऽन्यो ब्राह्मणस्वामी क्षेमेशश्चाप्यनन्तरम् ॥
एते षट् भुवनेशानाः.....।' (मतं० ८ । ८२)

इति ।

'एभ्योऽधः संस्थितो ग्रन्थिर्दुर्भेद्यश्चातिविस्तृतः ।
यत्रासौ विग्रहेशानः.....॥' (मतङ्ग । ८ । ८४)

इति ।

'यत्र शर्वो भवश्चैव उग्रो भीमश्च वीर्यवान् ।
भस्मान्तको दुन्दुभिश्च श्रीवत्सश्च महाबलः ॥
तस्मादूग्रन्थेरधश्चक्रं षट्कपालमयं महत् ।'
(मतंग० ८ । ८६)

इति ।

'गोपतेर्भुवनं दिव्यं त्रिकलस्याप्यनन्तरम् ।
तदधस्ताद्दशेशस्य भुवनं चारु निर्मलम् ॥
हरेर्हरस्य देवस्य तथा हरिहरस्य च ।'
(मतंग० ८ । ८८)

इति च ॥ ३२० ॥

अन्यत्र पुनर्विशेषान्तरमप्यस्ति,—इत्याह

श्रीसारशासने पुन-
रेषा षट्पुटतया विनिर्दिष्टा ।

यदुक्तं तत्र

'तस्याधस्तान्महामाया षट्पुटा संव्यवस्थिता ।'

इति ॥

एवं मायाया ग्रन्थिरूपतामुपसंहरंस्तत्त्वरूपतां वक्तुमुपक्रमते

ग्रन्थ्याख्यमिदं तत्त्वं
मायाकार्यं ततो माया ॥३२१॥

मायाकार्यमिति, जननौन्मुख्यात् मायातत्त्वमेव वैषम्यमापन्नमित्यर्थः । तस्य पुनरक्षुब्धमेव रूपम् ॥३२१॥

अत आह

मायातत्त्वं विभु किल
गहनमरूपं समस्तविलयपदम् ।

'विभु' व्यापकम्, अत एव गहनम् । अरूपमिति, सूक्ष्मत्वात् । समस्तविलयपदमिति, सूक्ष्मेण क्रमेणात्र विश्वस्यावस्थानात् ॥

अत एव न चात्र कश्चिद्भौवनविभागः,—इत्याह

तत्र न भुवनविभागो
युक्तो ग्रन्थावसौ तस्मात् ॥३२२॥

ग्रन्थाविति, तस्यैव स्थूले रूपे इत्यर्थः ॥३२२॥

नन्वेवमपि अस्या जाड्यात् कथमेवं कार्याविर्भावने सामर्थ्यम् ? इत्याशङ्क्याह

मायातत्त्वाधिपतिः
सोऽनन्तः [1]समुदितान्विचार्याणून् ।
युगपत्क्षोभयति निशां
सा सूते संपुटैरनन्तैः स्वैः ॥ ३२३ ॥

क्षोभयतीति, कार्यप्रसवयोग्यां करोतीत्यर्थः । संपुटैरिति, भगाकारैः । एषां चानन्त्यं शिवतनुग्रन्थेनैव उक्तम् ॥ ३२३ ॥

अत एव कार्यस्यापि आनन्त्यमित्याह

तेन कलादिधरान्तं
यदुक्तमावरणजालमखिलं तत् ।
निःसंख्यं च विचित्रं
मायैवैका त्वभिन्नेयम् ॥ ३२४ ॥

ननु कारणस्यैक्येऽपि कार्यमनन्तमित्यत्र किं प्रमाणम् ? इत्याशङ्क्याह

---

१ ग० पु० समुचितानिति पाठः । २ ग० पु० जातमिति पाठः ।

उक्तं श्रीपूर्वशास्त्रे च

धराव्यक्तात्मकं द्वयम्।
असंख्यातं निशाशक्ति-
संज्ञं त्वेकस्वरूपकम्॥ ३२५॥

तदुक्तं तत्र

'पृथग्द्वयमसंख्यातमेकैकं च पृथग्द्वयम्।' (मा० वि० २। ५०)

इति॥ ३२५॥

एवमेतत्प्रसङ्गादभिधाय प्रकृतमेवावतारयति

पाशाः पुरोक्ताः प्रणवाः
पञ्च मानाष्टकं मुनेः।
कुलं योनिश्च वागीशी
यस्यां जातो न जायते॥ ३२६॥

पुरेति पुंस्तत्त्वप्रकरणे। मुनेः कुलमिति गुरु-शिष्यादिरूपतया प्रागेव उक्तम्। योनिरिति,

'वागेव विश्वा भुवनानि जज्ञे'

इति स्थित्या विश्वकारणम्। जात इति मन्त्रादि-बलेन। न जायते इति, परशिवे योजित-त्वात्॥ ३२६॥

किं बहुना यत्किंचित्कलादावधराध्वन्युक्तं तत्सर्वमत्रैव स्थितमित्याह

दीक्षाकालेऽधराध्वस्थ-
शुद्धौ यच्चाधराध्वगम् ।
अनन्तस्य समीपे तु
तत्सर्वं परिनिष्ठितम् ॥ ३२७ ॥

कारणे हि कार्यस्य सूक्ष्मेण रूपेणावस्थानमुचितमिति भावः ॥ ३२७ ॥

ननु भवतु नामैतत्प्रणवादि पुनः किमुच्यते ? इत्याशङ्क्याह

साध्यो दाता दमनो
ध्यानो भस्मेति बिन्दवः पञ्च ।
पञ्चार्थगुह्यरुद्रा-
ङ्कुशहृदयलक्षणं च सव्यूहम् ॥३२८॥
आकर्षादर्शौ चे-
त्यष्टकमेतत्प्रमाणानाम् ।
'बिन्दवः' प्रणवाः ॥ ३२८ ॥

एषां च सर्वेषामेव यथासंभवं स्वरूपमभिधातुमाह

अलुप्तविभवाः सर्वे
मायातत्त्वाधिकारिणः ॥ ३२९॥
मायामयशरीरास्ते
भोगं स्वं परिभुञ्जते ।

स्वमिति, स्वाधिकारोचितमित्यर्थः ॥३२९॥

मायामयशरीरत्वमेव व्याचष्टे

प्रलयान्ते ह्यनन्तेन
संहृतास्ते त्वहर्मुखे ॥३३॥
अन्यानन्तप्रसादेन
विबुधा अपि तं परम् ।
सुप्तबुद्धं मन्यमानाः
स्वतन्त्रम्मन्यताजडाः ॥ ३३२ ॥
स्वात्मानमेव जानन्ति
हेतुं मायान्तरालगाः ।

'अहर्मुखे' पुनःसृष्टौ । अन्यानन्तेति, अन्यशब्दो मायाधिकार्यपेक्षया । तं परमनन्तं हेतुं न जानन्ति, अपि तु स्वात्मानमेव,—इति संबन्धः । अत्र च एवकारसामर्थ्यान्निषेधावगमः, तदपरि-

ज्ञाने च हेतुद्वयं सुप्तबुद्धं मन्यमानाः स्वतन्त्रंमन्यता-जडाश्चेति । स्वात्मनि च तथापरिज्ञाने हेतुः 'मायान्तरालगा' इति । इदमुक्तं भवति यद्यपि एषां

'शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनन्तोऽसिते प्रभुः ।'

इत्याद्युक्त्या अनन्तादीनामेव सृष्टिसंहाराः, तथाप्येते मायामोहितत्वात् ऐश्वर्यमदेनैतन्न जानते, प्रत्युत वयमेव जगतां सृष्टिसंहारकारिणो न पुनरस्मदप्यधिकः कश्चिदस्ति,—इति; यत एते स्वात्मनि पारतन्त्र्येऽपि स्वातन्त्र्याभिनिवेशात् सुप्तप्रबुद्धन्यायेन सृष्टिं प्रलयं च स्वात्माधीनमेव मन्यन्ते इति । तदुक्तम्

'ऐश्वर्यमदमाविश्य मन्यमाना महोदयाः ।
मत्तः श्रेष्ठतरं नान्यत्कारणं जगतां परम् ॥
अहमेव समस्तस्य जगतोऽस्य जगत्पतिः ।'

(मतङ्ग० ८ । ७३)

इति ।

यतोऽधोदृष्टयः सर्वे स्वसृष्टिमदमोहिताः ।
तस्मिन्नभिरताः सन्तः क्रीडाभोगेष्वनिन्दिताः ॥
स्वकार्यकरणैः सम्यक्संहारे स्वापमागताः ।
ततः क्षोभिकयाविष्टाः संप्रबुद्धाः परस्परम् ॥
तद्विधामेव पश्यन्ति स्वां सृष्टिं रचनोज्ज्वलाम् ।
सुप्तोत्थिता वयं किं नु स्वनिद्रावशवर्तिनः ॥

क्रीडामो विगतक्लेशाः स्वार्जितेषु बुभुक्षवः ।
सूक्ष्मपाशावृताः सर्वे न च स्थूलैस्तिरस्कृताः ॥'
(मतङ्ग० ८ । ८०)

इति ॥ ३३२ ॥

एवं मायाया ग्रन्थितत्त्वरूपतया द्वैविध्यं निरूप्य शक्तिरूपतामपि आख्यातुमाह

अतः परं स्थिता माया
देवी जन्तुविमोहिनी ॥ ३३२ ॥
देवदेवस्य सा शक्ति-
रतिदुर्घटकारिता ।
निर्वैरपरिपन्थिन्या
तया भ्रमितबुद्धयः ॥ ३३३ ॥
इदं तत्त्वमिदं नेति
विवदन्तीह वादिनः ।
गुरुदेवाग्निशास्त्रेषु
ये न भक्ता नराधमाः ॥ ३३४ ॥
सत्पथं तान्परित्याज्य
सोत्पथं नयति ध्रुवम् ।

असद्युक्तिविचारज्ञा-
ञ्छुष्कतर्कावलम्बिनः ॥३३५॥
भ्रमयत्येव तान्माया
ह्यमोक्षे मोक्षलिप्सया ॥

देवीति, देवाभिन्नत्वात् । अतिदुर्घटकारिंतेति, स्वातन्त्र्यरूपत्वात् 'विवदन्ति, इति विमर्तिं कुर्वन्तीत्यर्थः । शुष्केति, वस्तुशून्यत्वात् ॥ ३३५ ॥

नन्वेवंविधाया अस्याः कथं समुच्छेदः स्यात् ? इत्याशङ्क्याह

शिवदीक्षासिना च्छिन्ना
शिवज्ञानासिना तथा ॥३३६॥
न प्ररोहेत्पुनर्नान्यो[1]
हेतुस्तच्छेदनं प्रति ।

दीक्षेति, क्रिया । नान्यो हेतुरिति, शास्त्रान्तरोदितः ॥३३६॥

महामायोर्ध्वतः शुद्धा
महाविद्याथ मातृका ॥ ३३७ ॥

---

१ ग० पु० पुर इति पाठः ।

वागीश्वरी च तत्रस्थं
वामादिनवसत्पुरम् ।

शुद्धत्वादेव च अस्या महत्त्वमित्युक्तं 'महाविद्या' इति ॥ ३३७ ॥

वामाद्या एव पठति

वामा ज्येष्ठा रौद्री
काली कलविकरणीबलविकारिके तथा
॥३३८॥

मथनी दमनी मनोन्म-
नी च त्रिदशः पीताः समस्तास्ताः ।
सप्तकोट्यो मुख्यमन्त्रा[1]
विद्यातत्त्वेऽत्र संस्थिताः ॥ ३३९ ॥
एकैकार्बुदलक्षांशाः
पद्माकारपुरा इह ।
विद्याराज्यस्त्रिगुरुयाद्याः
सप्त सप्तार्बुदेश्वराः ॥ ३४० ॥

'अंशा' इति परिवाराः 'सप्तार्बुदेश्वरा' इति, अर्बु-

१ ग० पु० महामन्त्रा इति पाठः ।

दशब्देनात्र कोटिर्लक्ष्यते, तेन सप्तकोटिसंख्याकानां मन्त्राणामीश्वर्य इत्यर्थः । तदुक्तम्

'त्रिगुणी ब्रह्मवेताली स्थाणुमत्यम्बिका परा ।
रूपिणी मर्दिनी ज्वाला सप्तसंख्यास्तदीश्वराः ॥
विद्याराज्यस्तथा ख्याताः.....।' (स्व ० १०।११४९)

इति ॥ ३४० ॥

विद्यातत्त्वोर्ध्वमैशं तु[1]
तत्त्वं तत्र क्रमोर्ध्वगम् ।
शिखण्ड्याद्यमनन्तान्तं
पुराष्टकयुतं पुरम् ॥ ३४१ ॥
शिखण्डी श्रीगलो मूर्ति-
रेकनेत्रैकरुद्रकौ ।
शिवोत्तमः सूक्ष्मरुद्रोऽ-
नन्तो विद्येश्वराष्टकम् ॥ ३४२ ॥
क्रमादूर्ध्वोर्ध्वसंस्थानं[2]
सप्तानां नायको विभुः ।
अनन्त एव ध्येयश्च
पूज्यश्चाप्युत्तरोत्तरः[3] ॥ ३४३ ॥

---

१ ग० पु० र्ध्वं इति पाठः । २ ग० पु० संस्थानामिति पाठः ।
३ ग० पु० रैरिति पाठः ।

'ऐशं तत्त्वम्' ईश्वरतत्त्वं, तत्र पुरमप्यैशमित्यर्थाद्योज्यं, यत्र भगवानीश्वरः साक्षादस्ति । तदुक्तम्

'बाह्ये तस्यैश्वरं तत्त्वं भुवनान्यत्र मे शृणु ।' (स्व०१०।११४९)

इत्याद्युपक्रम्य

'तत्रस्थ ईश्वरो देवो वरदः सर्वतोमुखः ।' (स्व० १०।११५२)

इति । पुराष्टकस्य च वृतिच्छन्नत्वेऽपि विशेषणं 'शिखण्डाद्यमनन्तान्तम्' इति, तथा 'क्रमोर्ध्वगम्' इति । तत्त्वं चैषां यथायथं गुणाधिक्यात् । शिखण्डिनो हि सृष्ट्यादिकारित्वे श्रीकण्ठोऽधिकस्तस्माच्च त्रिमूर्त्यादिरपीति । यदाहुः 'ततश्चानन्तात्सूक्ष्मस्य कलया न्यूनं कर्तृत्वं ततः शिवोत्तमस्य' इत्यादि सर्वेषामत्र सिद्धमिति दोषतः पुनरेतन्न व्याख्येयम् । एषां पूर्वादिदिगष्टकक्रमेण संस्थानस्य श्रूयमाणत्वात् । यदुक्तम्

'विद्येश्वरानतो वक्ष्ये पूर्वादीशान्तगान्क्रमात् ।'

(स्व० १० । ११५९)

इति । एवं क्रमादूर्ध्वोर्ध्वसंस्थानमित्यपि व्याख्येयम् ॥३४३॥

एषां च विद्येश्वरत्वाभिधाने किं निमित्तम् ? इत्याशङ्क्याह

मुख्यमन्त्रेश्वराणां यत्
सार्धं कोटित्रयं स्थितम् ।
तन्नायका इमे तेन
विद्येशाश्चक्रवर्तिनः ॥३४४॥

सार्धं कोटित्रयमित्यन्यस्य सार्धस्य कोटित्रयस्य तत्कालमेव अपवृक्तत्वात् । तदुक्तम्

'ब्रह्मादिस्तम्बपर्यन्ते जातमात्रे जगत्यलम् ।
मन्त्राणां कोटयस्तिस्रः सार्धाः शिवनियोजिताः ॥
अनुगृह्याणुसंघातं याताः पदमनामयम् ।
(मा० वि० १ । ४०)

इति ॥३४४ ॥

नन्वनन्तस्यैव प्राधान्ये किं प्रमाणम् ? इत्याशङ्क्याह

उक्तं च गुरुभिरित्थं
शिवतन्त्राद्येषु शासनेष्वेतत् ।

आदिशब्दादरुरुवार्तिकादि ॥

तदेवाह

भगबिलशतकलितगुहा-
मूर्धासनगोऽष्टशक्तियुग्देवः ॥ ३४५ ॥

---

१ ग० पु० गुहापूर्वेति पाठः ।

गहनाद्यं निरयान्तं
सृजति च रुद्रांश्च विनियुङ्क्ते ।
उद्धरति मनोन्मन्या
पुंसस्तेष्वेव भवति मध्यस्थः ॥३४६॥
ते तेनोदस्तचितः
परतत्त्वालोचनेऽभिनिविशन्ते ।
स पुनरधः पथवर्ति-
ष्वधिकृत एवाणुषु शिवेन ॥ ३४७ ॥
अवसितपतिविनियोगः
सार्धमनेकात्ममन्त्रकोटीभिः ।
निर्वात्यनन्तनाथ-
स्तद्धामाविशति सूक्ष्मरुद्रस्तु ॥३४८॥
अनुगृह्याणुमपूर्वं
स्थापयति पतिः शिखण्डिनः स्थाने ।
इत्यष्टौ परिपाट्या
यावद्धामानि याति गुरुरेकः ॥३४९॥
तावदसंख्यातानां
जन्तूनां निर्वृतिं कुरुते ।

तेऽष्टावपि शक्त्यष्टक-
योगामलजलरुहासनासीनाः ॥३५०॥
आलोकयन्ति देवं
हृदयस्थं कारणं परमम् ।
तं भगवन्तमनन्तं
ध्यायन्तः स्वहृदि कारणं शान्तम् ॥३५२॥
सप्तानुध्यायन्त्यपि
मन्त्राणां कोटयः शुद्धाः ।

गुह्यामूर्धेति, मायोपरिवर्तिनी शुद्धविद्या । अष्टौ शक्तयो वामाद्याः । देवोऽनन्तः, रुद्रान्सूक्ष्मादीन्, विनियुङ्क्ते इति, सृष्ट्यादौ । मनोन्मन्येति, नवम्या । आस हि नवानामपि शक्तीनां भिन्न एव नियोगः,—इत्यभिप्रायः । तदुक्तम्

'नयते परमं स्थानमुन्मन्या परमेश्वरः ।'

इति । 'मध्यस्थ' इति तटस्थः, अत एव सर्वेषामेषां यथोचितमेव सृष्ट्यादि विदध्यात् । उदस्तेति उत्तेजिताः । एवकारो भिन्नक्रमः, तेन अधःपथ-वर्तिष्वेवेति । यदुक्तम्

'.....प्रोक्तोऽनन्तोऽसिते प्रभुः ।'

इति। अनेकात्मेति, मन्त्रकोटीनां विशेषणम्। तदुक्तं तत्रैव

'तस्मिन्नुदितमुदारं शाङ्करमारोहति प्रभौ धाम।
निर्वान्ति मन्त्रकोट्योऽनेकाः परिहार्य कार्यत्वम्॥'

इति। निर्वातीति, कृतकृत्यत्वाद् अधिकारेच्छाया अप्युपरमात् निर्वाणमेतीत्यर्थः। न हि भगवान-निच्छोर्बलादधिकारं विधत्त इत्याशयः। 'तद्धाम' इत्यनन्तस्थानम्। सूक्ष्मरुद्रो द्वितीयः। 'अणुं' विज्ञानाकलम्। शिखण्डिन इति, अष्टमस्य। स हि तदानीं श्रैकण्ठं पदमधितिष्ठतीति भावः। तदुक्तं तत्रैव

'तत्रोपरतेऽनन्ते परिपाट्या नायकास्तदधिकारम्।
कुर्वन्ति संचरन्तः पदात्पदं शासनात्पत्युः॥
उपरमति पतिरनन्तस्तत्पदमधितिष्ठति प्रभुः सूक्ष्मः।
सूक्ष्मपदमपि शिवोत्तम एष विधिः सर्वमन्त्राणाम्॥
वामाद्यान्नव विभवान्भगवान्निजतेजसः समुद्द्योत्य।
अनुगृह्याणुमपूर्वं स्थापयति पतिः शिखण्डिनः स्थाने॥'

इति। श्रीमतङ्केऽपि

'निर्वाति कृतकृत्यत्वादनन्तोऽनन्तवीर्यवान्।
ततस्तस्मिन्समारूढे पञ्चमन्त्रतनुः शिवः॥
ददात्यनुज्ञां सूक्ष्मस्य विद्येशस्य महात्मनः।
स च प्राप्तवरः श्रीमान्भर्तुराज्ञानुवर्तकः॥

तत्तन्त्रः पदमानन्तमधिष्ठाय महायशाः ।
निर्वर्तयत्यघश्चक्रं यत्तन्मायात्मकं महत् ॥
एवं शिवोत्तमस्यापि सूक्ष्मस्योपरमे शिवः ।
प्रददातीशसंघस्य कारणत्वमनिन्दितम् ॥
पदात्पदं विचरतो ह्येकैकस्य महात्मनः ।
यावत्सा परमा काष्ठा तावच्चक्रस्य कारणम् ॥
अव्युच्छेदाय रुद्राणां कृत्वा शक्तिबलान्वितम् ।
नियुनक्ति पदे तस्मिन्यवीयसि शिखण्डिनम् ॥'
(मतङ्ग० ५ । ६२)

इति । यत्पुनः

'अनन्तोपरमे तेषां महतां चक्रवर्तिनाम् ।
विहितं सर्वकर्तृत्वकारणं परमं पदम् ॥' (रौरवे)

इत्याद्युक्तं तन्महाप्रलयविषयत्वेन योज्यम् । तत्र हि युगपदेव सर्वेषामुपरमः,—इत्युक्तं प्राक् । श्रीमतङ्केऽपि

'शुद्धाध्वपतयो देवा महान्तश्चक्रवर्तिनः ।
समाप्य स्वाधिकारं ते प्रयान्ति पदमुत्तमम् ॥'

इति । 'एक' इति एक एक इत्यर्थः । 'परमं देवं' परमशिवम् । अपिशब्दो भिन्नक्रमः, तेन सप्तापि मन्त्राणां कोटय इति ॥ ३५१ ॥

नन्वधर एवाध्वन्यनन्तोऽधिकृतः,—इत्युक्तं, तत्कोऽसावधरोऽन्यो वाध्वा ? इत्याशङ्क्याह

मायादिरवीच्यन्तो
भवस्त्वनन्तादिरुच्यतेऽप्यभवः॥३५२॥
शिवशुद्धगुणाधीका-
रान्तः सोऽप्येष हेयश्च ।

अनाश्रितानन्ताद्यधिकारपर्यन्त इत्यर्थः ॥३५२॥

हेयत्वे चात्र किं निमित्तम् ? इत्याशङ्क्याह

अत्रापि यतो दृष्टानु-
ग्राह्याणां नियोज्यता शैवी ॥ ३५३ ॥
इष्टा च तन्निवृत्ति-
र्ह्यभवस्त्वधरे न भूयते यस्मात् ।

ननु यद्येवं तत्कथमत्राभवशब्दस्य प्रवृत्तिरित्याशङ्क्योक्तं 'ह्यभवस्त्वधरे न भूयते यस्मात्' इति ॥ ३५३ ॥

तन्निवृत्तिमेव व्याचष्टे

पत्युरपसर्पति यतः
कारणता कार्यता च सिद्धेभ्यः ॥३५४॥

---

१ क० ख० पु० नियोजितेति पाठः ।

कञ्चुकवच्छिवसिद्धौ
तावतिभवसंज्ञयातिमध्यस्थौ ।

'कारणता' नियोक्तृत्वं, 'कार्यता' नियोज्यत्वं, 'सिद्धेभ्य' इति मुक्ताणुभ्यः, 'कञ्चुकवत्' इति मायीयावरणवत् । तदपि हि तथा निवर्तत एवेति भावः । यतस्तौ शिवसिद्धौ अतिभवरूपत्वात् 'अतिमध्यस्थौ' अत्युदासीनौ नियोज्यनियोक्तृतादिक्षोभशून्यौ भवत इत्यर्थः ॥ ३५४ ॥

इदानीं प्रकृतमेवाह

धर्मज्ञानविरागैश्य-
चतुष्टयपुरं तु यत् ॥ ३५५ ॥
रूपावरणसंज्ञं त-
त्तत्त्वेऽस्मिन्नैश्वरे विदुः ।
वामा ज्येष्ठा च रौद्रीति
भुवनत्रयशोभितम् ॥ ३५६ ॥
सूक्ष्मावरणमाख्यात-
मीशतत्त्वे गुरूत्तमैः ।

'तत्त्वेऽस्मिन्नैश्वर' इति, तथा 'ईशतत्त्वे' इत्यनेनेदमुक्तं—यदियदेव भुवनजातमीश्वरतत्त्वे शोधनीयमिति । तदुक्तम्

'दश पञ्च च शोध्यानि भुवनान्यैश्वरे क्रमात् ।'

इति । तत्र विद्येशानामष्टौ भुवनानि, रूपावरणे चत्वारि, सूक्ष्मावरणे त्रीणीति पञ्चदश । अत एवेयतैवोपसंहारगर्भीकारेण श्रीस्वच्छन्दशास्त्रे

'व्रतं पाशुपतं दिव्यं ये चरन्ति जितेन्द्रियाः ।
भस्मनिष्ठाजपध्यानात्ते व्रजन्त्यैश्वरं पदम् ॥
तत्रेश्वरस्तु भगवान् देवदेवो निरञ्जनः ।
अधिकारं प्रकुरुते शिवेच्छाविधिचोदितः ॥'

(स्व० १०। ११ ६९)

इत्याद्युक्तम् । श्रीनन्दिशिखायामपि

'अत्राधिकारवानेवमीश्वरः शिवचोदितः ।
तज्जपध्याननिष्ठा ये ते व्रजन्त्यैश्वरं पदम् ॥'

इति ॥ ३५६ ॥

ऐशात्सादाशिवं ज्ञान-
क्रियायुगलमण्डितम् ॥३५७॥

शुद्धावरणमित्याहु-
रुक्ता शुद्धावृतेः परम् ।

विद्यावृतिस्ततो भावा-
भावशक्तिद्वयोज्ज्वला ॥३५८॥
शक्त्यावृतिः प्रमाणाख्या
ततः शास्त्रे निरूपिता ॥
शक्त्यावृतेस्तु तेजस्वि-
ध्रुवेशाभ्यामलङ्कृतम् ॥३५९॥
तेजस्व्यावरणं वेद-
पुरा मानावृतिस्ततः ।
मानावृतेः सुशुद्धावृ-
त्पुरत्रितयशोभिता ॥३६०॥
सुशुद्धावरणादूर्ध्वं
शैवमेकपुरं भवेत् ।
शिवावृतेरूर्ध्वमाहु-
र्मोक्षावरणसंज्ञितम् ॥३६१॥
अस्यां मोक्षावृतौ रुद्रा
एकादश निरूपिताः ।
मोक्षावरणतस्त्वेक-
पुरमावरणं ध्रुवम् ॥३६२॥

ऊर्ध्वे ध्रुवावृतेरिच्छा-
वरणं तत्र ते शिवाः ॥
ईश्वरेच्छागृहान्तस्था-
स्तत्पुरं चैकमुच्यते ॥३६३॥
इच्छावृतेः प्रबुद्धाख्यं
दिग्युद्राष्टकचर्चितम् ।
प्रबुद्धावरणादूर्ध्वं
समयावरणं महत् ॥३६४॥
भुवनैः पञ्चभिर्गर्भी-
कृतानन्तसमावृति ।
सामयात्सौशिवं तत्र
सादाख्यं भुवनं महत् ॥३६५॥
तस्मिन्सदाशिवो देव-
स्तस्य सव्यापसव्ययोः ।
ज्ञानक्रिये परेच्छा तु
शक्तिरुत्सङ्गगामिनी ॥३६६॥

---

१ ग० पु० भूतेति पाठः ।

सृष्ट्यादिपञ्चकृत्यानि
कुरुते स तयेच्छया ।
पञ्च ब्रह्माणयङ्गषट्कं
सकलाद्यष्टकं शिवाः ॥३६७॥
दशाष्टादश रुद्राश्च
तैरेव सुशिवो वृतः ।

सादाशिवमिति तत्त्वम्, अर्थात्तत्र शुद्धावरणमाहुरिति संबन्धः । 'शुद्धावृतेः परम्' इति शुद्धावरणादूर्ध्वमित्यर्थः । 'विद्यावृतिः' विद्यावरणमित्यर्थः । तदुक्तम्

'भावसंज्ञा त्वभावाख्या तस्मिञ्छक्तिद्वयं स्थितम् ।'

इति । 'तत' इति विद्यावरणात्, तेन तदूर्ध्वं शक्त्यावृतिस्तदूर्ध्वमपि प्रमाणावृतिरिति । शास्त्र इति, विशेषानुपादानात् सर्वत्र । तत्र शक्त्यावृतौ रुद्रद्वयम् । तदुक्तम्

'तेजस्वीशो ध्रुवेशश्च प्रमाणानां परं पदम् ।' (स्व०१०।११७२)

इति । शक्त्यावरणमूर्ध्वं चेति प्रमाणावरणं

चोर्ध्वमित्युद्द्योतकारदृष्टः पाठः पुनरसाधुर्मह्राजनैर-परिगृहीतत्वात् । श्रीनन्दिशिखायामपि

'तेजेश्वरो ध्रुवेशश्च शक्त्यावरणसंस्थितौ ।'

इत्यादिरास्माक एव पाठः । प्रमाणावरण-शब्दस्य चात्र प्रवृत्तौ किं निमित्तमित्याशङ्क्योक्तं 'तेजस्त्यावरणम्' इति । तेजेशध्रुवेशौ हि मायातत्त्वा-वस्थितस्य प्रमाणाष्टकस्य परं पदं, तयोरपीदं द्वितीयं परमावरणमिति । 'वेदपुरा' इति चतुर्भुवना । तदुक्तम्

'ब्रह्मा रुद्रः प्रतोदश्च अनन्तश्च चतुर्थकः ।' (स्व०१०।११७३)

इति । श्रीनन्दिशिखायामपि

'ब्रह्मा रुद्रः प्रमाणाख्यः प्रतोदोऽनन्तसंज्ञकः ।
प्रमाणावरणे ह्येते चत्वारः परिकीर्तिताः ॥'

इति । 'सुशुद्धावृत्' इति सुशुद्धावरणमित्यर्थः । तदुक्तम्

'सुशुद्धावरणं चोर्ध्वं तत्र रुद्रत्रयं विदुः ।
एकाक्षः पिङ्गलो हंसः कथितं तु समासतः ॥' (स्व०१०।११७४)

इति । 'शैवं पुरं' शिवावरणमित्यर्थः । तदुक्तम्

'शिवावरणमूर्ध्वे तु तत्रैको ध्रुवसंज्ञकः ।' (स्व०१०।११७४)

इति । एकादशेति, ब्रह्मादयः । तदुक्तम्

ब्रह्मदर्कदिण्डिमुण्डाः सौरभश्च तथैव च ।
जन्ममृत्युहरश्चैव प्रणीतः सुखदुःखदः ॥
विजृम्भितः समाख्याताः ।' .....(स्व०१०।११७७)

इति । 'आवरणं ध्रुवं' ध्रुवावरणमित्यर्थः । 'ते' इति इतः प्रभृति पृथिवीपर्यन्तमुक्ताः सर्व एवेत्यर्थः । ईश्वरेच्छागृहान्तःस्था इति, तदेकरूपा इति यावत् । यदभिप्रायेणैव

'स्वामिनश्चात्मसंस्थस्य भावजातस्य भासनम् ।
अस्त्येव न विना तस्मादिच्छामर्शः प्रवर्तते ॥'(ई० प्र०१।५।१०)

इत्याद्यन्यत्रोक्तम् । एकमिति, इच्छाशक्त्यैवाधिष्ठेयत्वात् । प्रबुद्धाख्यमित्यावरणम् । तदुक्तम्

'प्रबुद्धावरणं चोर्ध्वं कथयामि समासतः ।
प्रीतः प्रमुदितश्चैव प्रमोदश्च प्रलम्बनः ॥
विष्णुर्मदन एवाथ गहनः प्रथितस्तथा ।
रुद्राष्टकं समाख्यातं विज्ञेयं प्राग्दिशः क्रमात् ॥'
(स्व० १० । ११८०)

इति । पञ्चभिर्भुवनैर्युक्तमिति शेषः । तदुक्तम्

'प्रभवः समयः क्षुद्रो विमलश्च शिवस्तथा ।
ततो घनः समाख्यातो निरञ्जन इतः परम् ॥
रुद्रोङ्कारास्तु पञ्चैते' .... (स्व० १० । ११८२)

इति । गर्भीकृतानन्तसमावृतीति, सर्वशेषत्वेनोक्तं यन्नाम हि किंचिदुपरिवर्ति तत्सर्वमधस्तनं गर्भीकृत्य

वर्तत इति । 'सौशिवम्' इति सुशिवावरणम् । 'सादाख्यं भुवनम्' इति सदाशिवभट्टारकस्य साक्षादधिष्ठानस्थानमित्यर्थः । अत एव महदित्युक्तम् । उद्द्योतकृता पुनः

'ईश्वरस्य तथोर्ध्वे तु अधश्चैव सदाशिवात् ।' (स्व०१०।११८६)

इत्यर्धं परिकल्प्य इतः प्रभृति सादाशिवं तत्त्वमिति यदुक्तं तदयुक्तम्, अस्यार्धस्य महाजनैरगृहीतत्वात् । अत एव च एवमपि 'ऊर्ध्वं' इति पुनरुक्तम्, 'अधश्चैव सदाशिवात्' इत्यप्यसंगतं तत्रैव तस्योक्तत्वात्; अपरिकल्पितत्वेऽपि एतदित्थं यथाकथञ्चिदव्याख्येयं यदीश्वरस्येति रुद्रोड्डारस्य, सदाशिवादिति अधिष्ठातुः, अधिष्ठेयं हि अधिष्ठातुरध एव भवेदिति । यत्तु श्रीनन्दिशिखायाम्

'कथितं त्वैश्वरं तत्त्वमत ऊर्ध्वं सदाशिवः ।'

इत्युक्तं तदप्येवमवगन्तव्यं यदैश्वरमिति सादाशिवं, सदाशिव इति तत्र साक्षात्स्थित इति । अन्यथा हि उभयत्रापि ईश्वरतत्त्वोपसंहारग्रन्थस्य व्याघातः स्यात्; तन्महाजनचुरण एव मार्गोऽनुगन्तव्यः;— इति उद्द्योतकारव्याख्यया न भ्रमितव्यमित्यलं

बहुना । 'तस्मिन्' इति सादाख्ये भुवने । 'सुशिवः' सदाशिवः । वृतश्चतुर्धावरणक्रमेण ॥ ३६७ ॥

एतदेव क्रमेण पठति

सद्यो वामाघोरौ
पुरुषेशौ ब्रह्मपञ्चकं हृदयम् ॥३६८॥

मूर्धशिखावर्महृ-
गस्त्रमङ्गानि षट् प्राहुः ।
सकलाकलशून्यैः सह
कलाद्यखमलङ्कृते त्वपणामन्त्यम्
॥३६९॥

करण्यौष्ट्यमष्टमं किल
सकलाष्टकमेतदाम्नातम् ।
ओंकारशिवौ दीप्तो
हेत्वीशदशेशकौ सुशिवकालौ ॥३७०॥

सूक्ष्मसुतेजःशर्वाः
शिवाः दशैतेऽत्र पूर्वादेः ।
विजयो निःश्वासश्च
स्वायम्भुवो वह्निवीररौरवकाः ॥३७१॥

मुकुटविसरेन्दुविन्दु-
प्रोद्गीता ललितसिद्धरुद्रौ च।
सन्तानशिवौ परकिर-
णापारमेशा इति स्मृता रुद्राः ॥३७२॥
सर्वेषामेतेषां
ज्ञानानि विदुः स्वतुल्यनामानि।

'अकल' इति निष्कलः। अन्त्यमन्ते भवं क्षयान्तं, हेत्वीशः कारणेश्वरः सूक्ष्मः सूक्ष्मरूपः, सर्वेषामिति शिवानां रुद्राणां च, अत एव दशाष्टादशभेदभिन्नं शैवमुच्यते ॥३७२।

मन्त्रमुनिकोटिपरिवृत
मथ विभुवामादिरुद्रतच्छक्तियुतम्
तारादिशक्तिजुष्टं ॥३७३॥
सुशिवासनमतिसितकैजमसंख्यदलम्[1]।
यः शक्तिरुद्रवर्गः
परिवारे विष्टरे च सुशिवस्य ॥ ३७४ ॥

---

१ क० ख० पङ्कजमिति पाठः।

प्रत्येकमस्य निजनिज-
परिवारे परार्धकोटयोऽसंख्याः ।
मायामलनिर्मुक्ताः
केवलमधिकारमात्रसंरूढाः ॥३७५॥
सुशिवावरणे रुद्राः
सर्वज्ञाः सर्वशक्तिसम्पूर्णाः ।
अधिकारबन्धविलये
शान्ताः शिवरूपिणो पुनर्भविनः ॥३७६॥

मुनीति सप्त । रुद्रा इति, आवरणादिगताः ॥३७६॥

ऊर्ध्वे बिन्द्वावृतिर्दीप्ता
तत्र तत्र पद्मं शशिप्रभम् ।
शान्त्यतीतः शिवस्तत्र
तच्छक्त्युत्सङ्गभूषितः ॥ ३७७ ॥
निवृत्त्यादिकलावर्ग-
परिवारसमावृतः ।
असंख्यरुद्रतच्छक्ति-
पुरकोटिभिरावृतः ॥ ३७८ ॥

ऊर्ध्वे इति, सुशिवावरणात्। 'तच्छक्ति' इति शान्त्यतीता। तदुक्तम्

'निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च।
परिवारः स्मृतस्तस्य शान्त्यतीतस्य सुव्रते॥
तस्य वामे तु दिग्भागे शान्त्यतीता व्यवस्थिता॥'
(स्व० १०। १६२१)

इति॥ ३७८॥

एतच्च भङ्ग्यन्तरेणोक्तमित्याह

श्रीमन्मतङ्गशास्त्रे च
लयाख्यं तत्त्वमुत्तमम्।
पारिभाषिकमित्येत-
न्नाम्ना बिन्दुरिहोच्यते॥ ३७९॥

यन्नाम सर्वकर्तृत्वादिगुणयोगादुत्तमं लयाख्यं तत्त्वं तदेवैतद्बहिरभिव्यक्तं सदिह स्वशास्त्रपरिभाषया बिन्दुरुच्यते, श्रीमतङ्गपारमेश्वरेऽस्य तथा समयः कृत इत्यर्थः। यदुक्तं तत्र

'तस्मादेव परं तत्त्वमचलं सर्वतोमुखम्।
यस्मिन्प्राप्तस्य न पुनर्जन्मेहास्ति कदाचन॥'

इति।

'इत्थं गुणवतस्तस्मात्तत्त्वात्तत्त्वमनिन्दितम्।
स्फुरद्रश्मिसहस्राढ्यमधस्ताद्व्याप्तकं महत्॥

पारिभाषिकमित्येतन्नाम्ना बिन्दुरिहोच्यते ।
चतुर्धावस्थितं चेदं प्रेरकं सर्वतोऽव्ययम् ॥'

इति ॥३७६॥

ननु इह पत्युः

'लयभोगाधिकाराह्वत्रितत्त्वोक्तिनिदर्शनात् ।
पदार्थः पतिनामासौ प्रथमः परिकीर्तितः ॥' (मतङ्गतं०)

इति ॥.....(?) तदत्रास्य यद्येवं तद्भोगादिरूपत्वं पुनः कुत्र ? इत्याशङ्क्याह

चतुर्मूर्तिमयं शुभ्रं
यत्तत्सकलनिष्कलम् ।
तस्मिन्भोगः समुद्दिष्ट
इत्यत्रेदं च वर्णितम् ॥३८०॥

यदेतन्निवृत्त्याद्यात्मना चतूरूपं तत्त्वेऽपि तदुत्तीर्णत्वात् निर्मलम्, अत एव सकलत्वेऽपि परस्मिन्नेव तत्त्वे लीनत्वान्निष्कलं पदं, तस्मिन्भोगः समुद्दिष्टः सादाशिवं तत्त्वमस्य भोगस्थानमित्यत्र श्रीमतङ्गशास्त्र एवेदमुक्तम् । तदुक्तं तत्र

'सदाशिवस्य देवस्य लयस्तत्त्वेऽतिनिष्कले ।
चतुर्मूर्तिमयं शुभ्रं यत्तत्सकलनिष्कलम् ॥
तस्मिन्भोगः समुद्दिष्टः पत्युर्विश्वस्य सर्वदा ।'

(मतङ्ग० १।३।२३)

इति । अधिकारस्थानं पुनरस्य विद्यादि,—इत्यर्थसिद्धम् । यदुक्तं तत्रैव

'लये च शिवतत्त्वाख्यं व्यक्तौ बिन्द्वाह्वयं पदम् ।
भोगः सदाशिवस्थाने ईश्वराख्ये च शासनम् ॥
विद्यातत्त्वेऽधिकारोऽस्य योनेर्ज्ञेयः सदैव हि ।'

(मतङ्ग० १।७।३३)

इति ॥ ३८० ॥

ननु सकलत्वं नाम कलादिक्षित्यन्तदेहयोग्यत्वमुच्यते, तच्चेत् सदाशिवभट्टारकस्य संभवति तत्कथमस्यापि अस्मदादिवत् क्षित्यादिरूपत्वं न लक्ष्यते ? इत्याशङ्क्याह

निवृत्त्यादेः सुसूक्ष्मत्वा-
द्धराद्यारब्धदेहता ।
मातुः स्फूर्जन्महाज्ञान-
लीनत्वान्न विभाव्यते ॥ ३८१ ॥

'मातुः' सदाशिवभट्टारकस्य । निवृत्त्यादेः सूक्ष्मत्वे हेतुः—स्फूर्जन्महाज्ञानलीनत्वादिति ॥३८१॥

[नन्वत्र] स्थिता च धरादिरूपता न विभाव्यते,—इत्येतद्विप्रतिषिद्धमित्याशङ्क्याह

---

१ क० ख० पु० दौ इति पाठः ।

उद्रिक्ततैजसत्वेन
हेम्नो भूपरमाणवः ।
यथा पृथङ्न भान्त्येव-
मूर्ध्वाधोरुद्रदेहगाः ॥ ३८२ ॥

यथा सुवर्णस्य तेजःपरमाणूनामुद्रिक्तत्वात्काठिन्याद्यन्यथानुपपत्त्या स्थिता अपि भूपरमाणवः पृथङ्न भासन्ते तथात्मज्ञानतिरस्कृतत्वात् शुद्धाशुद्धात्मनि सर्गे तत्तद्भुवनेश्वरदेहगा अपि,—इति वाक्यार्थः ॥ ३८२ ॥

इदानीं प्रकृतमेवाह

बिन्दूर्ध्वेऽर्धेन्दुरेतस्य
कला ज्योत्स्ना च तद्वती ।
कान्तिः प्रभा च विमला
पश्चैता रोधिकास्ततः ॥ ३८३ ॥
रुन्धनी रोधनी रोद्ध्री
ज्ञानबोधा तमोपहा ।

---

१ ग० पु० अथेति पाठः ।

एताः पञ्च कलाः प्राहु-
र्निरोधिन्यां गुरूत्तमाः ॥ ३८४ ॥

'तद्वती' ज्योत्स्नावती, 'तत' इति अर्धेन्दोरप्यूर्ध्वम् ॥ ३८४ ॥

अर्धचन्द्रादेश्च मन्त्रप्रमेयरूपत्वात् तदुचितमेव यथोत्तरं सूक्ष्मसूक्ष्मतरादिरूपत्वं दर्शयति

अर्धमात्रः स्मृतो बिन्दु-
र्व्योमरूपी चतुष्कलः ।
तदर्धमर्धचन्द्रस्त-
दष्टांशेन निरोधिका ॥ ३८५ ॥

'तदर्धं' मात्राचतुर्भागः 'तदष्टांशेन' मात्राष्टांशेन ॥ ३८५ ॥

निरोधिकामेव निर्वक्ति

'हेतून्ब्रह्मादिकान् रुन्द्धे[2]
रोधिकां तां त्यजेत्ततः ।
निरोधिकामिमां भित्त्वा
सादाख्यं भुवनं परम् ॥ ३८६ ॥

---

१ ग० पु० मात्रा इति पाठः । २ ग० पु० रुन्ध्यादिति पाठः ।

पररूपेण यत्रास्ते
पञ्चमन्त्रमहातनुः ।

'हेतून्' इति कारणानि । पररूपेणेति, सुशिवावरणे हि अस्याः परं रूपमित्युक्तम् ॥ ३८६ ॥

अस्यैव स्थानं रूपं च निरूपयति

इत्यर्धेन्दुनिरोध्यन्त-
बिन्द्वावृत्यूर्ध्वतो महान् ॥ ३८७ ॥
नादः किञ्जल्कसदृशो
महद्भिः पुरुषैर्वृतः ।
चत्वारि भुवनान्यत्र
दिक्षु मध्ये च पञ्चमम् ॥ ३८८ ॥
इन्धिकां दीपिका चैव
रोधिका मोचिकोर्ध्वगा ।
मध्येऽत्र पद्मं तत्रोर्ध्व-
गामी तच्छक्तिभिर्[1]वृतः ॥३८९॥
नादोर्ध्वतस्तु सौषुम्नं
तत्र तच्छक्तिभृत्प्रभुः ।

---

१ ग० पु० रोचिकेति पाठः । २ ग० प्र० भृत्प्रभुरिति पाठः ।

तदीशः पिङ्गलेलाभ्यां[1]
वृतः सव्यापसव्ययोः ॥३९०॥
या प्रभोरङ्गगा देवी
सुषुम्ना शशिसप्रभा ।
ग्रथितोऽध्वा तया सर्व
ऊर्ध्वश्चाधस्तनस्तथा ॥३९१॥
नादःसुषुम्नाधारस्तु
भित्त्वा विश्वमिदं[2] जगत् ।
अधःशक्त्या विनिर्गच्छे-
दूर्ध्वशक्त्या च मूर्धतः ॥ ३९२ ॥
नाड्या ब्रह्मबिले लीनः
सोऽव्यक्तध्वनिरक्षरः ।
नदन्सर्वेषु भूतेषु
शिवशक्त्या ह्यधिष्ठितः ॥ ३९३ ॥

एवमर्धेन्दुर्निरोधिनी च बिन्दोरेव प्रसरः,—इत्युक्तं स्यात् । 'महद्भिः पुरुषैः' इति मन्त्रमहेश्वररूपैः । 'तच्छक्तिः' ऊर्ध्वगामिनी । तदुक्तम्

---

१ ग० पु० लेडाभ्यामिति पाठः । २ ग० पु० सर्वमिति पाठः ।

'तस्मिन्पद्मं सुविस्तीर्णमूर्ध्वगेशः स्थितः प्रभुः ।'
(स्व०१०।१२२४)

इति,

'ऊर्ध्वगा तु कला तस्य नित्यमुत्सङ्गगामिनी ।' (स्व०१०।१२२६)

इति च । सौषुम्नमिति भुवनम् । ' तच्छक्तिः' सुषुम्ना । 'तदीशः' सुषुम्नेशः । 'ग्रथित' इति ओत-प्रोतत्वेन व्याप्तः । 'ऊर्ध्वः' शक्तिशिवात्मकः 'अध-स्तनो' नादान्तादिः । अस्याश्चोर्ध्वाधरयोरेव व्याप-कत्वं दर्शयति 'नादः सुषुम्नाधार' इत्यादिना । इह खलु नादः सुषुम्नाख्यां मध्यनाडीमधितिष्ठन्नधः-शक्त्योत्थाय मूलाधारात् प्रबोधमासाद्य प्राणात्मि-कयोर्ध्वशक्त्या निखिलमिदं जगत् तत्तत्कारणोल्लङ्घ-नक्रमेण भित्त्वा तस्या एव सुषुम्नाख्याया नाड्या 'मूर्धत' उपरिष्टान्निर्गच्छेत् येनासौ ब्रह्मबिले विश्रान्तः सन् सर्वेषु भूतेषु

'नास्योच्चारयिता कश्चित्प्रतिहन्ता न विद्यते ।
स्वयमुच्चरते देवः प्राणिनामुरसि स्थितः ॥' (स्व० ७। ५८)

इत्याद्युक्त्या नदन्, अत एव घोषादिस्वभावान्तरा-नुदयात् अव्यक्तध्वनिः, अत एवाविचलद्रूपत्वाद्

अक्षरो यतः शिवशक्त्या त्वधिष्ठितः परसंविन्मात्रात्मक इत्यर्थः । तदुक्तम्

'नाड्याधारस्तु नादो वै भित्त्वा सर्वमिदं जगत् ।
अधःशक्त्या विनिर्गत्य यावद्ब्रह्माणमूर्ध्वतः ॥
नाड्या ब्रह्मबिले लीनस्त्वव्यक्तध्वनिरक्षरः ।
नदते सर्वभूतेषु शिवशक्त्या त्वधिष्ठितः ॥' (स्व०१०।१२३३)

इति ॥ ३९३ ॥

सुषुम्नोर्ध्वे ब्रह्मबिल-
संज्ञयावरणं त्रिदृक् ।
तत्र ब्रह्मा सितः शूली
पञ्चास्यः शशिशेखरः ॥ ३९४ ॥

तस्योत्सङ्गे परा देवी
ब्रह्माणी मोक्षमार्गगा ।
रोद्ध्री दात्री च मोक्षस्य

'तत्र' इति ब्रह्मबिलावरणे । 'मोक्षमार्गगा' इति तन्मार्गावस्थितेत्यर्थः । अत एवास्यास्तद्रोधने तद्दाने च सामर्थ्यमित्युक्तं 'रोद्ध्री दात्री च मोक्षस्य' इति ॥ ३९४ ॥

---

१ ग० पु० संज्ञमावरेति पाठः ।

तां भित्त्वा चोर्ध्वकुण्डली ॥ ३६५ ॥
शक्तिः सुप्ताहिसदृशी
सा विश्वाधार उच्यते ।
तस्यां सूक्ष्मा सुसूक्ष्मा च
तथान्ये अमृतामिते ॥ ३६६ ॥
मध्यतो व्यापिनी तस्यां
व्यापीशो व्यापिनीधरः[1] ।

तां भित्त्वेति, तत ऊर्ध्वमित्यर्थः । ऊर्ध्वकुण्डलीति, निखिलस्यास्य विश्वस्यानुन्मिषितत्वेनान्तर्गर्भीकारात्, अत एव 'सुप्ताहि सदृशी' इत्युक्तम्, अत एव स्वभित्तावेव विश्वोल्लासनात् 'विश्वाधार उच्यते' इत्युक्तम् । शक्तिरित्यनेन इतः प्रभृति शक्तितत्त्वम्,—इत्यासूत्रितम् । तदुक्तं श्रीनन्दिशिखायाम्

'तत ऊर्ध्वे शक्तितत्त्वं कथ्यमानं निबोध मे ।
प्रसुप्तभुजगाकारा ऊर्णातन्तुसमप्रभा ॥
आधारः सर्वतत्त्वानां भुवनानां च सुव्रते ।'

इति । 'तस्याम्' इति शक्तौ । तदुक्तम्

'सूक्ष्मा चैव सुसूक्ष्मा च तथा चैवामृतामिता ।

---

१ ग० पु० श्वर इति पाठः ।

व्यापिनी मध्यतो ज्ञेया शेषाः पूर्वादितः क्रमात् ॥'
(स्व० १० । १२९०)

इति । 'तस्याम्' इति व्यापिन्याम् । व्यापीश इति, यस्यानाश्रितभैरवापेक्षया पूर्वस्यां दिशि व्यवस्थानम् ॥ ३९६ ॥

ननु व्यापिनी शक्तेः पृथगिति तावदविवादः, तर्किं तस्याः शक्तितत्त्वे एवावस्थानम् उत न ? इत्याशङ्क्याह

शक्तितत्त्वमिदं यस्य
प्रपञ्चोऽयं धरान्तकः ॥ ३९७ ॥
शिवतत्त्वं ततस्तत्र
चतुर्दिक्कं[1] व्यवस्थिताः ।
व्यापी व्योमात्मकोऽनन्तोऽ-
नाथस्तच्छक्तिभाँगिनः[2] ॥ ३९८ ॥
मध्ये त्वनाश्रितं तत्र
देवदेवो ह्यनाश्रितः ।
तच्छक्त्युत्सङ्गभृत्सूर्य-
शतकोटिसमप्रभः ॥ ३९९ ॥

१ ग० पु० क्के इति पाठः । २ ग० पु० भोगिन इति पाठः ।

'शक्तितत्त्वम्' इति अनाश्रितभुवनम्। 'तत' इति तच्छक्तितत्त्वमेवाश्रित्येत्यर्थः । तद्धि शक्तितत्त्वे एव व्यापिन्यामवस्थितमिति भावः । 'तत्र' इति अनाश्रितभुवने । 'तच्छक्तयो' व्यापिन्याद्याः । अनाश्रितामिति, भुवनम् । 'तच्छक्तिः' अनाश्रिता । तदुक्तम्

'व्यापिनी व्योमरूपा चानन्तानाथा त्वनाश्रिता ।
(स्व० १० । १२५०)

इति। शिवतत्त्वमिति पुनः स्वार्थवृत्त्या यदि व्याख्यायेत तत्सर्वं व्याहन्येत । यतः

'एवं वै शिवतत्त्वं तु कथितं तव सुव्रते ।
शोधयित्वा ततश्चोर्ध्वं शक्तिश्चैव परा स्मृता ॥
समना नाम सा ज्ञेया·····।' (स्व० १० । १२५४)

इत्याद्युक्त्या शिवतत्त्वादपि ऊर्ध्वं समना व्याप्नोतीति । तत्रापि

'समनान्तं वरारोहे पाशजालमनन्तकम् ।'
(स्व० ४ । ४२९)

इत्याद्युक्तेरनन्तं पाशजालं प्रसक्तं स्यात् । एवम्

'ज्ञेयाध्वानमधः कुर्वन् रेचयेत्तं वरानने ।
यावत्सा समना शक्तिस्तदूर्ध्वं चोन्मना स्मृता ॥'
(स्व० १० । १२७१)

इत्यादि व्याहृतं स्यात् ।

'.... .... उन्मन्यन्ते परः शिवः ।'

इत्याद्यपि दुष्येत् समनाधस्तस्योक्तत्वात्, तस्यापि तत्त्वान्तरत्वे षट्त्रिंशत्तत्त्वानि,—इति प्रतिज्ञाहानिः । नास्य शिवतत्त्वस्य ऊर्ध्वमन्तर्वा समनापि त्वधस्तस्याः शक्तितत्त्व एवाम्नानात् । तदुक्तम्

'प्रणवेन ततः शक्तिर्न्यसितव्या वरानने ।
व्यापिनीं समनां चोर्ध्वे तत्रैव तु विशोधयेत् ॥'

इति । अनाश्रितादीनां च शिवतत्त्वावस्थाने तस्यापि कालकलितत्वमापतेत् ते हि क्षयिणः । यदुक्तम् प्राक्

'शक्तिः स्वकालविलये व्यापिन्यां लीयते पुनः ।
व्यापिन्यां तद्दिवारात्रं लीयते साप्यनाश्रिते ॥
परार्धकोट्या हृत्वा तु शक्तिकालमनाश्रिते ।
दिनं रात्रिश्च तत्काले परार्धगुणितेऽपि च ॥
सोऽपि याति लयं साम्यसंज्ञे सामनसे पदे ।' (तं० ६ । १६६)

इति । ततश्च

'ऊर्ध्वमुन्मनसो यश्च तत्र कालो न विद्यते ।
न कल्पः कल्पते कश्चिन्निष्कलः कालवर्जितः ॥
यः शाङ्कर्युन्मनातीतः स नित्यो व्यापकोऽव्ययः ।'

इत्याद्याः श्रुतयो विरुद्धाः स्युः । न च अनाश्रिता-

दीनां शिवतत्त्वेऽवस्थानमस्ति, अपि तु शक्तितत्त्वे एव व्यापिन्याम् । तदुक्तम्

'अधो ब्रह्मबिलं देवि शक्तितत्त्वं ततः परम् ।
पञ्चकारणसंयुक्ता व्यापिनी तु तथा परा ॥
समना उन्मना चैव प्रक्रियाण्डैर्युता प्रिये ।'

इति । तस्मादस्मदुक्तमेव व्याख्यानं युक्तमित्यन्यदुपेक्ष्यम् ॥ ३९९ ॥

शिवतत्त्वोर्ध्वतः शक्तिः
परा सा समनाह्वया ।
सर्वेषां कारणानां सा
कर्तृभूता व्यवस्थिता ॥ ४०० ॥
बिभर्त्यण्डान्यनेकानि
शिवेन समधिष्ठिता ।

'शिवतत्त्वोर्ध्वत' इति व्यापिनीपदावस्थितानाश्रितभुवनादप्यूर्ध्वमित्यर्थः । न चात्रैव अपूर्वतया तत्त्वशब्दस्य भुवनवाचित्वम्

'बिन्दुतत्त्वं समाख्यातं.....।' (स्व० १० । १२१७)

इत्यादावपि तथा प्रयोगदर्शनात् । कर्तृभूतेति, क्रियाशक्तिरूपत्वात् ॥ ४०० ॥

तदधिष्ठानमेव स्फुटयति

तदारूढः शिवः कृत्य-
पञ्चकं कुरुते प्रभुः ॥ ४०१ ॥

शिव इति, यः सर्वत्र षट्त्रिंशत्तत्त्वतयोद्घोष्यते ॥४०१॥

नन्वयमेतदारूढः सन् कस्मात् सृष्ट्यादि विदध्यात् ? इत्याशङ्क्याह

समना करणां तस्य
हेतुकर्तुर्महेशितुः ।

करणमिति, सृष्ट्यादिक्रियायाम् ॥

ननु सर्वत्र क्रियायां कर्त्रन्तरापेक्षित्वे कर्तुर्हेतुत्वं भवेत्,—इति महेशितुरपि तथात्वे परत्वोन्मुखतया स्वातन्त्र्यं खण्ड्येत,—इति किमेतदुक्तम् ? इत्याशङ्क्याह

अनाश्रितं[1] तु व्यापारे
निमित्तं हेतुरुच्यते ॥४०२॥

'व्यापारे' इति सृष्ट्यादिक्रियायाम् । इह हि स एव परः परमेश्वरः स्वस्वातन्त्र्यात् प्रथमं शून्या-

---

१ ग० पु० तस्तु इति पाठः ।

त्मतामवभासयन् अनाश्रितादिरूपतया प्रथितः,—इत्यपेक्षणीयस्यैवाभावात् अस्यैव तावत् पारमार्थिकं शुद्धं कर्तृत्वम्, अनाश्रितादीनां तु तदधिष्ठानवशाद्भिन्नकार्यविषयमशुद्धमुपचरितप्रायं कर्तृत्वम्, अतश्चानाश्रितादिस्तदिच्छयैव सृष्ट्यादि करोति, इति तस्य साक्षात् तदावेशायोगात् तत्र निमित्तमात्रत्वं यथा विद्यया यशः,—इत्यादाविति उक्तं 'निमित्तं हेतुः' इति । यदाहुः

'अनाश्रितं तु व्यापारे निमित्तं हेतुरिष्यते ।'

इति ॥४०२॥

तदधिष्ठानेऽपि अस्य समनैव करणमित्याह

तयाधितिष्ठति विभुः
कारणानां तु पञ्चकम् ।

अधितिष्ठतीति, स्वस्वातन्त्र्यच्छायानुवेधेन सृष्ट्यादिकारित्वे योग्यं कुर्यादित्यर्थः ॥

एतच्च कथम् ? इत्याशङ्क्याह

अनाश्रितोऽनाथमय-
मनन्तं स्वपुः सदा ॥ ४०३ ॥

स व्यापिनं प्रेरयति
स्वशक्त्या करणेन तु ।
कर्मरूपा स्थिता माया
यदधः शक्तिकुण्डली ॥ ४०४ ॥
नादबिन्द्वादिकं कार्य-
मित्यादिजगदुद्भवः ।

'खवपुः' व्योमात्मा, स्वशक्त्येति यथा हि शिवस्य सृष्ट्यादौ समना करणं तथैषामपि अनाश्रिताद्याः स्वाः शक्तय इति । कर्मरूपेति, सृष्ट्यादिक्रिया-विशेषकत्वात्, मायाशक्तिरेव हि पारमेश्वरी तत्तन्ना-दबिन्द्वात्मविश्वरूपतया प्रस्फुरति,—इत्यभिप्रायः । शक्तिकुण्डलीति, अशेषस्य विश्वस्य स्वतादात्म्येन गर्भीकारात् ॥ ४०४ ॥

इयच्च विश्वं हेयमेव,—इत्याह

यत्सदाशिवपर्यन्तं
पार्थिवाद्यं च शासने ॥४०५॥
तत्सर्वं प्राकृतं प्रोक्तं
विनाशोत्पत्तिसंयुतम् ।

सदाशिवोऽत्रानाश्रितः, प्रकृतिश्च समना, तस्या एव मूलप्रकृतित्वात् ॥ ४०५ ॥

एवं पुरमानतत्त्वयोजनात्म प्रमेयद्वयमभिधाय पुरसंग्रहाख्यं प्रमेयमासूत्रयितुमुपक्रमते

अथ सकलभुवनमानं
यन्मह्यं निगदितं निजैर्गुरुभिः ॥४०६॥
तद्वक्ष्यते समासाद्-
बुद्धौ येनाशु सङ्क्रामेत् ।

येनेति, समासाभिधानेन; अत एवैतन्निष्प्रयोजनं न,—इत्याशयः ॥ ४०६ ॥

तदेवाह

अण्डस्यान्तरनन्तः
कालः कूष्माण्डहाटकौ ब्रह्महरी ॥४०७॥
रुद्राः शतं सवीरं
बहिर्निवृत्तिस्तु साष्टशतभुवना स्यात् ।
जलतेजःसमीरनभोऽ-
हंकृद्धीमूलसप्तके प्रत्येकम् ॥४०८॥

अष्टौ षट्पञ्चाशद्-
भुवना तेन प्रतिष्ठेति कला कथिता ।

अत्र प्राहुः शोध्या-
नष्टौ केचिन्निजाष्टकाधिपतीन् ॥४०९॥

अन्ये तु समस्तानां
शोध्यत्वं वर्णयन्ति भुवनानाम् ।

श्रीभूतिराजमिश्रा
गुरवः प्राहुः पुनर्बहीरुद्रशतम् ॥४१०॥

अष्टावन्तः साकं
शर्वेणेतीदृशी निवृत्तिरियं स्यात् ।

रुद्राः काली वीरो
धराब्धिलक्ष्म्यः सरस्वती गुह्यम् ॥४११॥

इत्यष्टकं जलेऽग्नौ
वह्न्यतिगुह्यद्वयं मरुति वायोः ।

स्वपुरं गयादि खे च
व्योम पवित्राष्टकं च भुवनयुगम् ॥४१२॥

अभिमानेऽहङ्कार-
च्छगलाद्यष्टकमथान्तरा नभोऽहंकृत् ।
तन्मात्रार्केन्दुश्र-
तिपुराष्टकं बुद्धिकर्मदेवानाम् ॥४१३॥
दश तन्मात्रसमूहे
भुवनं पुनरत्तृवर्गविनिपतिते ।
मनसश्चेत्यभिमाने
द्वाविंशतिरेव भुवनानाम् ॥ ४१४ ॥
धियि दैवीनामष्टौ
कुत्तेजोयोगसंज्ञकं त्रयं तदुमा ।
तत्पतिरथ मूर्त्यष्टक-
सुशिवद्वादशकवीरभद्राः स्युः ॥४१५॥
तदथ महादेवाष्टक-
मिति बुद्धौ सप्तदश संख्या ।
गुणतत्त्वे पङ्क्तित्रय-
मिति षट्पञ्चाशतं पुराणि विदुः ॥४१६॥

अण्डस्यान्तर्बहिः साष्टशतभुवना निवृत्तिः स्यादिति संबन्धः । यद्वा अन्तःशब्दः प्रागेव व्याख्यातः । तदुक्तम्

'निवृत्त्यभ्यन्तरे पृथ्वी शतकोटिप्रविस्तरा।
तस्यां च भुवनानां तु शतमष्टोत्तरावधि ॥' (स्व ०४।१०३)

इति । अष्टाविति, गुह्याष्टकादीनि योगाष्टकान्तानि सप्ताष्टकानीत्यर्थः । तेनेति सप्तकस्याष्टभिर्गुणनात् । तदुक्तम्

'प्रतिष्ठाया भवेद्व्याप्तिश्चतुर्विंशतितत्त्विका ।
षट्पञ्चाशद्भुवनिका ..... ॥" (स्व० ४ । १५९)

इति । अत्रेति प्रतिष्ठायाम् । अष्टाविति, क्रोधाष्टकेन सह । समस्तानामिति षट्पञ्चाशतोऽपि, मिश्राः प्रधानाः । शर्वेणेति, भूर्लोकाधिपतिना, तेन वीरभद्रस्थानेऽयमिति गणनासाम्यम् । 'रुद्रा' एकादश । गुह्यमिति, गुह्याष्टकभुवनम् । अन्तरा नभोऽहङ्कृदिति, अहङ्कारनभसोरन्तरित्यर्थः । तन्मात्रेति पञ्च, बुद्धिकर्मदेवानामिति बुद्धिकर्मेन्द्रियदशकस्येत्यर्थः । तन्मात्रसमूहे भुवनमिति पञ्चार्थ-

मण्डलाख्यमित्यर्थः । नन्वेषामुक्तेऽपि भुवनपञ्चके कस्मात्पुनरेतदुच्यते ? इत्याशङ्क्योक्तम् 'अक्षवर्गनिपतित' इति । एतद्धि एषां मनोऽधिष्ठानेनैव भवेदिति अत्र पुनः परेणापि रूपेणावस्थानमिति भावः । क्रुत्तेजोयोगसंज्ञकमिति अर्थात्क्रोधाद्यष्टकत्रयाधिष्ठेयं भुवनत्रयं, पङ्क्तित्रयमिति गुरुशिष्यविषयम् । षट्पञ्चाशतं पुराणीति, जलतत्त्वेऽष्टौ भुवनानि, तेजःप्रभृतौ तत्त्वत्रये प्रत्येकं द्वयमिति षट्, अहङ्कारे द्वाविंशतिः, बुद्धौ सप्तदश, गुणेषु च त्रीणीति ॥ ४१६ ॥

नन्वत्र जलादौ सर्वेषु तत्त्वेषु भुवनानि शोध्यतयोक्तानि प्रकृतौ पुनः कस्मान्न ? इत्याशङ्क्याह

यद्यपि गुणसाम्यात्मनि
मूले क्रोधेश्वराष्टकं तथापि धियि ।
तच्छोधितमिति गणानां
न पुनः प्राप्तं प्रतिष्ठायाम् ॥४१७॥

इति जलतत्त्वान्मूलं
तत्त्वचतुर्विंशतिः प्रतिष्ठायाम् ।

अम्बादितुष्टिवर्ग-
स्ताराद्याः सिद्धयोऽणिमादिगणाः
॥४१८॥
गुरवो गुरुशिष्या ऋषि-
वर्ग इडादिश्च विग्रहाष्टकयुक् ।
गन्धादिविकारपुरं
बुद्धिगुणाष्टकमहंक्रिया विषयगुणाः
॥४१९॥
कामादिसप्तविंशक-
मागन्तु तथा गणेशविद्येशमयौ ।
इति पाशेषु पुरत्रय-
मित्थं पुरुषेऽत्र भुवनषोडशकम् ॥४२०॥
नियतौ शङ्करदशकं
काले शिवदशकमिति पुरद्वितयम् ।
रागे सुहृष्टभुवनं
गुरुशिष्यपुरं च वित्कलायुगले ॥४२१॥
भुवनं भुवनं निशि पुट-
पुरत्रयं वाक्पुरं प्रमाणपुरम् ।

इति सप्तविंशतिपुरा
विद्या पुरुषादितत्त्वसप्तकयुक् ॥४२२॥
वामेशरूपसूक्ष्मं
शुद्धं विद्याथ शक्तितेजस्विमितिः ।
सुविशुद्धिशिवौ मोक्ष
ध्रुवेषिसंबुद्धसमयसौशिवसंज्ञाः ॥४२३॥
सप्तदशपुरा शान्ता
विद्येशसदाशिवपुरत्रितययुक्ता ।
बिन्द्वर्धेन्दुनिरोध्यः
परसौशिवमिन्धिकादिपुरसौषुम्ने ॥४२४॥
परनादो ब्रह्मबिलं
सूक्ष्मादियुतोर्ध्वकुण्डली शक्तिः ।
व्यापिव्योमानन्ता-
नाथानाश्रितपुराणि पञ्च ततः ॥ ४२५ ॥
षष्ठं च परममनाश्रित-
मथ समनाभुवनषोडशी यदि वा ।

---

१ ग० पु० अविशुद्धेति पाठः ।

२ ग० पु० लगा इति पाठः ।

बिन्द्वावरणं परसौ-
शिवं च पञ्चेन्धिकादिभुवनानि ॥४२६॥
सौषुम्नं ब्रह्मबिलं
कुण्डलिनी व्यापिपञ्चकं समना।
इति षोडशभुवनेयं
तत्त्वयुगं शान्त्यतीता स्यात् ॥ ४२७ ॥

तत्त्वचतुर्विंशतिरिति प्रकृतितत्त्वस्य च्छब्धाच्छुब्धतया द्वैविध्यात्। गुरव इति, तत्रापि गुरुशिष्यविषयं पङ्क्तित्रयमुक्तम्। विषयेति, विकारषोडशकानन्तर्येण व्याख्याताः शब्दादयः पञ्च, गुणा देहधर्मत्वेन प्रागुक्ता अहिंसादयः। चः समुच्चये, तेन रागतत्त्वे वीरेशभुवनं गुरुशिष्यभुवनं च, इति भुवनद्वयम्। भुवनं भुवनमिति वामादिशक्तिनवकस्य महादेवत्रयस्य च। पुटपुरत्रयमिति त्रिपुटत्वमस्याः। वाक्पुरं योन्याख्याया वागीश्या भुवनम्। सप्तविंशतिपुरेति, तदुक्तम्

'पुंस्तत्त्वाद्यावन्मायान्तं विद्याया व्याप्तिरिष्यते।
सप्त तत्त्वानि भुवनसप्तविंशतिरेव च ॥'
(स्व० ४। १७३)

इति । वामेति, वामाद्या नव शक्तयः । 'ईश' ईश्वरः । रूपेत्यादि सर्वमावरणान्तं प्रागुक्तम् । तेजस्विप्रधाना चासौ मितिर्मानावरणमित्यर्थः । 'इषिः' इच्छा । सप्तदशपुरेति, तदुक्तम्

'.....विद्यातत्त्वात्सदाशिवम् ।
तत्त्वानां त्रितये व्याप्तिर्वर्णानां त्रय एव च ॥
पदैकादशिका ज्ञेया पुराणि दश सप्त च ।
(स्व० ४ । १८५)

इति । परसौशिवमिति, यत्र परेण रूपेण सदाशिवः । अनाश्रितमिति सर्वाश्रयत्वात् । 'यदि वां' इति पक्षान्तरे, षोडशभुवनेति, तदुक्तम्

पदमेकं मन्त्र एको वर्णाः षोडश कीर्तिताः ।
भुवनानि सुसूक्ष्माणि शान्त्यतीते विभावयेत् ॥
(स्व० ४ । १९७)

इति ॥ ४२७ ॥

एवं श्रीस्वच्छन्दप्रक्रियया विभागमभिधाय शास्त्रान्तरप्रक्रमेणाप्याह

श्रीमन्मतङ्गशास्त्रे च
क्रमोऽयं पुरपूगगः ।

अयमिति वक्ष्यमाणः ॥

तदाह

कालाग्निर्नरकाः खाब्धि-
युतं मुख्यतया शतम् ॥४२८॥

कूष्माण्डः सप्तपातालो
सप्तलोकी महेश्वरः ।
इत्यण्डमध्यं तद्बाह्ये
शतं रुद्रा इति स्थिताः ॥४२९॥

स्थानानां द्विशती भूमिः
सप्तपञ्चाशता युता ।
पञ्चाष्टकस्य मध्याद्ब्रा-
त्रिंशद्भूतचतुष्टये ॥४३०॥

तन्मात्रेषु च पञ्च स्यु-
र्विश्वेदेवास्ततोऽष्टकम् ।
पञ्चमं सेन्द्रिये गर्वे
बुद्धौ देवाष्टकं गुणे ॥४३१॥

योगाष्टकं क्रोधसंज्ञं
मूले काले सनैयते ।

पतद्गुगाद्याश्चाङ्गुष्ठ-
मात्राद्या रागतत्त्वगाः ॥४३२॥
द्वादशैकाशिवाद्याः स्यु-
र्विद्यायां कलने दश ।
वामाद्यास्त्रिंशती सेयं
त्रिपर्वण्यब्धिरस्ययुक् ॥४३३॥

खाब्धीति चत्वारिंशत् । महेश्वरो रुद्रः । पञ्चमम-
ष्टकमिति स्थाणवाख्यम् । पतद्गुगाद्या अष्टौ ।
अङ्गुष्ठमात्राद्या अपि अष्टौ । कलने कलायाम् ।
त्रिपर्वणीति, त्रिभिर्भूतभावतत्त्वाख्यैः पर्वभिर्युक्ते
कलादिक्षितिपर्यन्ते पत्यादिपदार्थापेक्षया तृतीय-
स्मिन्पदार्थे इत्यर्थः । यदुक्तं तत्रैव

'ये भूतभावतत्त्वाख्या मायातः क्षरिताः सदा ।
स पदार्थस्त्रिपर्वायं तृतीयः शिवशासने ॥' (मतंग०१ प०)

इति । अब्धिरस्ययुगिति, रसनीया 'रस्या' रसाः
षट् तेन चतुःषष्टिरित्यर्थः ॥ ४३३ ॥

भुवनेश्वराश्चात्र विचित्राः,—इत्याह

---

१ ग० पु० रुद्राद्या इति पाठः ।

शैवाः केचिदिहानन्ताः
श्रैकण्ठा इति संग्रहः ।

एषां च शिवादिदीक्षितत्वादेवमभिधानम् । यदाहुः

'कालाग्निर्नरकाणां तु चत्वारिंशच्छतं ततः ।
कूष्माण्डः सह पातालैः सप्तभिर्लोकसप्तकम् ॥
रुद्रश्चेत्यण्डमध्येऽयं ततो रुद्रशतं बहिः ।
स्थानानां द्वे शते क्ष्मैवं सप्तपञ्चाशता युता ॥
पञ्चाष्टकानां द्वात्रिंशत्ततो भूतचतुष्टये ।
तन्मात्रेषु ततः पञ्च विश्वेदेवास्ततोऽष्टकम् ॥
पञ्चाष्टकानां षष्ठं यत् सेन्द्रिये गर्व एव तत् ।
स्थितं बुद्धौ ततो देवा अष्टावष्टौ च योगिनः ॥
गुणेष्वष्टौ तथाव्यक्ते क्रोधाद्याः परतस्ततः ।
काले नियतिसंयुक्ते पतद्ग्रुप्रमुखास्ततः ॥
अङ्गुष्ठाद्यास्तु रागेऽष्टौ द्वादशैकशिवादयः ।
विद्यायां तु कलातत्त्वे वामाद्याः परतो दश ॥
एवं त्रिपर्वणि प्रोक्तं भुवनानां शतत्रयम् ।
चतुःषष्ट्यधिकं तेषु विचित्रा भुवनेश्वराः ॥
शैवाः केचित्तथानन्ताः श्रैकण्ठाः केचिदेव तु ।(म० त० वृ०)

इति । अत्र च साक्षादागमे संवादिते ग्रन्थविस्तरः स्यात्,—इति तद्वृत्तिकृदुक्तं संवादितम् ॥४३३॥

नन्वेवं भुवनविभागप्रदर्शनेन कोऽर्थ? इत्याशङ्क्याह

यत्र यदा परभोगान्
बुभुक्षते तत्र योजनं कार्यम् ॥४३४॥
शोधनमथ तद्धानौ
शेषं त्वन्तर्गतं कार्यम् ।
इत्यागमं प्रथयितुं
दर्शितमेतद्विकल्पितं तेन ॥४३५॥

यदुक्तम्

'यो यत्राभिलषेद्भोगान् स तत्रैव नियोजितः ।
सिद्धिभाङ्मन्त्रसामर्थ्यात् ..... ॥'

इति । अथेति पक्षान्तरे । 'तद्धानौ' इति भोगेच्छात्याग इत्यर्थः । अन्तर्गतमिति, प्रधानशुद्ध्यैव तच्छुद्धम् । दर्शितमिति, अन्यथा हि कथमेवं परिज्ञानं भवेदिति भावः । तेनेति तेन तेन गुरुणेत्यर्थः ॥ ४३५ ॥

नन्वत्र किमियन्त एव विकल्पाः संभवन्ति न वा ? इत्याशङ्क्याह

अन्येऽपि बहुविकल्पाः
स्वधियाचार्यैः समभ्यूह्याः ।

---

१ ग० पु० आशयमिति पाठः ।

ननु यद्येवमनेके विकल्पाः संभवन्ति तदिह पुनः किं ग्राह्यम् ? इत्याशङ्क्याह

श्रीपूर्वशासने पुन-
रष्टादशाधिकं शतं कथितम् ॥४३६॥
तदिह प्रधानमधिकं
संक्षेपेणोच्यते शोध्यम्।

शतमिति भुवनानाम्। तदुक्तं तत्र

'एवं तु सर्वतत्त्वेषु शतमष्टादशोत्तरम्।
भुवनानां परिज्ञेयं संक्षेपान्न तु विस्तरात् ॥'
(मा० वि० ५।३३)

प्रधानमिति, तदधिकारेणैवास्य ग्रन्थस्य प्रवृत्तेः ॥४४०॥

तदेवाह

कालाग्निः कूष्माण्डो
नरकेशो हाटकोऽथ भूतलपः ॥४३७॥
ब्रह्मा मुनिलोकेशो
रुद्राः पञ्चान्तरालस्थाः।

---

१ ग० पु० शसमधिकमिति पाठः।

अधरेऽनन्तः प्राच्याः
कपालिवह्न्यन्तनिर्ऋतिबलाख्याः
॥ ४३८ ॥

लघुनिधिपतिविद्याधिप-
शम्भूर्ध्वान्तं सवीरभद्रपति ।
एकादशभिर्बाह्ये[1]
ब्रह्माण्डं पञ्चभिस्तथान्तरिकैः
॥ ४३९ ॥

इति षोडशपुरमेत-
न्निवृत्तिकलयेह कलनीयम् ।
लकुलीशभारभूती
दिगड्याषाढी च पुष्करनिमेषौ
॥ ४४० ॥

प्रभाससुरेशाविति स-
लिले प्रत्यात्मकं सपरिवारे[2] ।

---

१ ग० पु० बाह्यैरिति पाठः । २ ग० पु० वारमिति पाठः । मालिनी-विजयतन्त्र एतत् 'पत्यष्टकम्' इत्युच्यते ।

भैरवकेदारमहा-
काला मध्यामजल्पाख्याः ॥४४१॥

श्रीशैलहरिश्चन्द्रा-
विति गुह्याष्टकमिदं महसि।

भीमेन्द्राट्टहासविम-
लकनखलनाखलकुरुस्थिति-
गयाख्याः ॥४४२॥

अतिगुह्याष्टकमेत-
न्मरुति च सतन्मात्रके च साक्षे च।

स्थाणुसुवर्णाख्यौ किल
भद्रो गोकर्णको महालयकः ॥४४३॥

अविमुक्तरुद्रकोटी
वस्त्रापद इत्यदः पवित्रं खे।

स्थूलस्थूलेशशङ्कु-
श्रुतिकालञ्जराश्च मण्डलभृत् ॥४४४॥

---

१ ग० पु० चाथेति पाठः।

माकोटाण्डद्वितय-
च्छगलाण्डा अष्टकं ह्यहङ्कारे ।

मुनीति सप्त । एवमीशत्वविशेषेणैषां तदन्तःकारः प्रकाशितः । प्राच्या इत्यारभ्य । 'अन्त' इति अन्तकारित्वात् यमः । 'लघु' इति शीघ्रकारित्वाच्छीघ्रः । यदुक्तम्

'आदौ कालाग्निभुवनं शोधितव्यं प्रयत्नतः ।' (मा० वि० ५ । १)

इत्युपक्रम्य

'कालाग्निपूर्वकैरेभिर्भुवनैः पञ्चभिः प्रिये ।
शुद्धैः शुद्धमिदं सर्वं ब्रह्माण्डन्तर्व्यवस्थितम् ॥
तद्बहिः शतरुद्राणां भुवनानि पृथक् पृथक् ।
दशमं शोधयेत्पश्चादेकं तन्नायकावृतम् ॥
अनन्तः प्रथमस्तेषां कपालीशस्तथापरः ।
अग्निरुद्रो यमश्चैव नैर्ऋतो बल एव च ॥
शीघ्रो निधीश्वरश्चेति सर्वविद्याधिपोऽपरः ।
शम्भुश्च वीरभद्रश्च विधूमज्वलनप्रभाः ॥
एभिर्दशैकसंख्यातैः शुद्धैः शुद्धं शतं मतम् ।'

(मा० वि० ५ । १५)

इति । प्रत्यात्मकमिति नामान्तरेण गुह्याष्टकमेव अत्रोक्तम् । 'सतन्मात्रके च साक्षे च' इति खस्य विशेषणम् । एतदन्तं हि अनेनैवाष्टकेन व्याप्तमिति

केषांचिन्मतम् । अन्येषां पुनः कार्यस्य कारणान्तरवस्थानौचित्यात् इयदहङ्कारेण व्याप्तमिति ॥४४४॥

अत[1] एवाह

अन्येऽहङ्कारान्त-
स्तन्मात्राणीन्द्रियाणि चाप्याहुः ॥४४५॥
धियि योन्यष्टकमुक्तं
प्रकृतौ योगाष्टकं किलाकृतप्रभृति ।
इति सप्ताष्टकभुवना
प्रतिष्ठितिः सलिलतो हि मूलान्ता ॥४४६॥
नरि वामो भीमोग्रौ
भवेशवीराः प्रचण्डगौरीशौ ।
अजसानन्तैकशिवौ
विद्यायां क्रोधचण्डयुग्मं स्यात् ॥४४७॥
संवर्तो ज्योतिरथो
कलानियत्यां च सूरपञ्चान्तौ ।
वीरशिखीशश्रीकण्ठ-
संज्ञमेतत्त्रयं च काले स्यात् ॥४४८॥

---

१ ग० पु० तदाहेति पाठः ।

समहातेजा वामो
भवोद्भवश्चैकपिङ्गलेशानौ ।
भुवनेशपुरःसरका-
वङ्गुष्ठ इमे निशि स्थिता ह्यष्टौ ॥४४६॥
अष्टाविंशतिभुवना
विद्या पुरुषान्निशान्तमियम् ।
हालाहलरुद्रक्रुद-
म्बिकाघोरिकाः सवामाः स्युः ॥ ४५० ॥
विद्यायां विद्येशा-
स्त्वष्टावीशे सदाशिवे पञ्च ।
वामा ज्येष्ठा रौद्री
शक्तिः सकला च शोन्तयम् ॥४५१॥
अष्टादश भुवना स्यात्

अत्र च केषांचित् स्वकण्ठेन अन्येषां पर्यायेण अन्येषां च पदैकदेशेनाभिधानम्,—इति स्वयमेवाभ्यूह्यम् । एतच्च प्रागेव संवादितम् । नरीत्यर्थादन्तर्भावितरागतत्त्वे, तेन पुंस्तत्त्वे वामादयः षट्, रागे च प्रचण्डादयः पञ्च । तदुक्तम्

'ततोऽप्यर्धाङ्गुलव्याप्त्या पुरषट्कमनुक्रमात् ।
चतुष्कं तु द्वयेऽन्यस्मिन्नेकमेकत्र चिन्तयेत् ॥'
(मा० वि० ६ । १४)

इति । सानन्तेति, अनन्तसहित एकशिव इत्यर्थः । निशीति मायायां । 'ईश' इति ईश्वरतत्त्वे । एवं निवृत्तौ षोडश, प्रतिष्ठायां षट्पञ्चाशत्, विद्यायामष्टाविंशतिः, शान्तायामष्टादश,—इति भुवनानामष्टादशोत्तरं शतम् ॥ ४५१ ॥

ननु शान्त्यतीतायामप्यन्यत्र भुवनविभाग उक्तस्तत्पुनरिह कस्मात् न ? इत्याशङ्क्याह

शान्त्यतीता त्वभुवनैव ।

न हि अत्र देशादिकलना काचिद्भवेदिति भावः ॥

एतच्चार्यायाः प्रथमार्धेनोपसंहरति

इति देशाध्वविभागः
कथितः श्रीशम्भुना समादिष्टः ॥४५२॥

श्रीशम्भुनेति परमेश्वरेण गुरुणेति शिवम् ॥

'जम्बुद्वीपे भारतवर्षं तत्राहितस्थितिर्विदधे ।
जयरथनामा कश्चिद्विवृतिमिमामष्टमाह्निके स्पष्टाम् ॥'

इति श्रीमहामाहेश्वराचार्यवर्य-श्रीमदभिनव-
गुप्ताचार्यविरचिते तन्त्रालोके

श्रीजयरथविरचितविवेकाभिख्यव्याख्योपेते देशा-
ध्वप्रकाशनं नामाष्टममाह्निकम् ॥ ८ ॥

श्रीमत्प्रतापभूभर्तुराज्ञया प्रीतये सताम् ।
मधुसूदनकौलेन संपाद्यायं प्रकाशितः ॥

श्रीसाम्बशिवायार्पणं भूयात् ।

अथ

श्रीतन्त्रालोकेऽष्टमाह्निकमूलश्लोकानामकाराद्यनुक्रमणिका ।

श्लो०				पृ० सं०
अंशेन मानुषे लोके	...	...	...	१६७
अकृतादि ततो बुद्धौ	...	...	...	१६४
अकृताधिष्ठानतया	...	...	...	१८७
अङ्गुष्ठयवमलयशङ्कु-	...	...	...	६५
अणिमाद्यात्मकमस्मि-	...	...	...	१६३
अणिमाद्यूर्ध्वतस्तिस्रः	...	...	...	१९२
अतत्त्वे तत्त्वबुद्ध्या यः	...	...	...	१८९
अतिगुह्याष्टकमेतत्	...	...	...	२७९
अत्र बद्धानि सर्वाणि	...	...	...	१०९
अत्र बाहुल्यतः कर्म	...	...	...	६०
अधिकारत्रये साकं	...	...	...	११६
अध्वानं षड्विधं ध्यायन्	...	...	...	१२
अध्वा समस्त एवायं	...	...	...	३
अनुगृह्याणुमपूर्वं	...	...	...	२३१
अन्तरालगतास्त्वन्याः	...	...	...	४३
अन्यवर्षेषु पशुवत्	...	...	...	६९
अन्यानन्तप्रसादेन	...	...	...	२२३
अन्ये तु समस्तानां	...	...	...	२६५

श्लो०				पृ० सं०
अन्येऽपि बहुविकल्पाः	...	...	...	२७६
अपरा ब्रह्मणोऽण्डे ताः	...	...	...	१५१
अपि सर्वसिद्धवाचः	...	...	...	२१३
अप्रमेयं ततः शुद्धं	...	...	...	१३५
अप्सरःसिद्धसाध्यास्ताः	...	...	...	३९
अब्धेर्दक्षिणतः खाच्चि-	...	...	...	७३
अभिमानेऽहङ्कार-	...	...	...	२६६
अर्धमात्रः स्मृतो बिन्दुः	...	...	...	२५१
अर्धरात्रोऽमरावत्यां	...	...	...	८५
अववरकाण्येकस्मिन्	...	...	...	२१२
अवसितपतिविनियोगः	...	...	...	२३१
अविमुक्तरुद्रकोटी-	...	...	...	२७९
अवीचिकुम्भीपाकाख्य-	...	...	...	२४
अव्यक्तं बुद्धितत्त्वस्य	...	...	...	१७६
अव्यक्तकले गुहया	...	...	...	२१४
अव्यक्तमिष्टाः साम्यं तु	...	...	...	१७६
अव्यवच्छिन्नसंवित्तिः	...	...	...	१२
अव्याहतविभागोऽस्मि-	...	...	...	९
अष्टादशभुवना स्यात्	...	...	...	२८२
अष्टावन्तः सार्कं	...	...	...	२६५
अष्टाविंशतिभुवना-	...	...	...	२८२
अष्टौ षट्पञ्चाशत्-	...	...	...	२६५
अस्यां मोक्षावृतौ रुद्राः	...	...	...	२३८

श्लो०				पृ० सं०
आकर्षादर्शो चे.	...	...	...	२२३
आकाशावरणादूर्ध्व-	...	...	...	१५०
आक्रान्ता सा भगबिलैः	...	...	...	२०५
आद्यो वायुपथस्तत्र	...	...	...	९२
आध्यात्मिकाश्चतस्रः	...	...	...	१८९
आनन्दनिष्ठास्तत्रोर्ध्वे	...	...	...	११२
आप्यायकः स जन्तूनां	...	...	...	९३
आरभ्य देहपाशाख्यं	...	...	...	१९८
आलोकयन्ति देवं	...	...	...	२३२
इच्छावृतेः प्रबुद्धाख्यं	...	...	...	२३९
इतश्च क्रतुहोत्रादि	...	...	...	११०
इति जलतत्त्वान्मूलं	...	...	...	२६८
इति पञ्च तेषु पञ्चसु	...	...	...	२१५
इति षोडशपुरमेत-	...	...	...	२७८
इत्थं य एष लवण.	...	...	...	७४
इत्यष्टकं जलेऽग्नौ	...	...	...	२६५
इत्येष गणवृतान्तो	...	...	...	३३
इदं तत्त्वमिदं नेति	...	...	...	२२५
इन्द्रः कशेरुस्ताम्राभो	...	...	...	६४
इन्धिका दीपिका चैव	...	...	...	२५२
इलावृतं केतुभद्रं	...	...	...	५९
इष्टा च तन्निवृत्ति-	...	...	..	२३५
उक्तं च गुरुभिरित्थं	...	...	...	२३०

श्लो०				पृ० सं०
उक्तं च तस्य परतः	...	...	...	२०८
उक्तं च शिवतनाविद्द-	...	...	...	१६०
उक्तं श्रीपूर्वशास्त्रे च	...	...	...	२२१
उक्तानुक्तास्तु ये पाशाः	...	...	...	२०२
उग्रश्चेत्येषु पतयः	...	...	...	१५१
उत्तरेणोत्तरेणैनां	...	...	...	३९
उदयो योऽमरावत्यां	...	...	...	८५
उद्रिक्ततैजसत्वेन	...	...	...	२५०
उपसंजिहीर्षुरिह यः	...	...	...	१८४
ऊर्ध्वाधरगकपालक	...	...	...	२१७
ऊर्ध्वे ध्रुवावृतेरिच्छा	...	...	...	२३९
ऊर्ध्वे बिन्द्वावृतिर्दीप्ता	...	..	...	२४६
ऊहः शब्दोऽध्ययनं	...	...	...	१८९
ऋते ततः शिवज्ञानं	...	...	...	१३६
एकैकार्बुदलक्षांशाः	...	...	...	२२७
एतानि देवयोनीनां	...	...	...	१५८
एतानि यातनास्थानं	...	...	...	३६
एतैर्भुवमवष्टभ्य	...	...	...	४७
एवं भूमेर्ध्रुवान्तं स्यात्	...	...	...	१११
एवं मेरोरधो जम्बू	...	...	...	७०
एवं रसादिमात्राणां	...	...	...	१५१
एवं शिवत्वमापन्नं	...	...	...	८
एषु च चतुर्ष्वचलेषु	...	...	...	४८

श्लो०				पृ० सं०
कञ्चुकवच्छिवसिद्धौ	...	...	...	२३६
कण्ठ्यौष्ठ्यमष्टमं किल	...	...	...	२४४
कथं सुवीत तत्राद्ये	...	...	...	१७५
कन्याद्वीपे च नवमे	...	...	...	६५
करणान्यणिमादिगुणाः	...	...	...	१८३
कलान्तं कोटिधा तस्मा.	...	...	...	१३५
कलायां स्यान्महादेव-	...	...	...	२०३
कामादिसप्तविंशक-	...	...	...	२६६
कार्यं हेतुर्दुःखं	...	...	...	१६७
कालाग्नेर्दण्डपाण्यन्त.	...	...	...	११८
कुरुवर्षस्योत्तरेऽथ	...	...	...	५३
कुबेरः कर्म देवाश्च	...	...	...	४०
कूष्माण्ड ऊर्ध्वे लक्षोन	...	...	...	२४
कूष्माण्डः सप्तपातालो	...	...	...	२७३
कोटिः षोडशसाहस्रं	...	...	...	२०३
क्रमद्विगुणिताः षड्भिः	...	...	...	७४
क्रमादूर्ध्वोर्ध्वसंस्थानं	...	...	...	२२८
क्रीडन्ति पर्वताग्रे ते	...	...	...	८८
क्रोधेशाष्टकमानीलं	...	...	...	१६३
क्षोभान्तरं ततः कार्यं	...	...	...	१७८
गहनाद्यं निरयान्तं	...	...	...	२३१
गहनासाध्यौ हरिहर-	...	...	...	२१५
गान्धर्वेण सदार्चन्ति	...	...	...	१००

श्लो०				पृ० सं०
गिरिसप्तकपरिकल्पित.	...	...	...	७७
गुणकारणमित्येते	...	...	...	१८६
गुणतन्मात्रभूतौघ	...	...	...	१२६
गुणसाम्यात्मिका तेन	...	...	...	१७४
गुणानां यत्परं साम्यं	...	...	...	१८५
गुरवो गुरुशिष्या ऋषि.	...	...	...	२६९
चक्रवाटश्चतुर्दिक्को	...	...	...	३८
चक्राष्टकाधिपत्येन	...	...	...	२०५
चतुर्दिङ्नैमिरोद्यानं	...	...	...	८८
चतुर्मूर्तिमयं शुभ्रं	...	...	...	२४८
जाठरः कूटहिमवत्	...	...	...	५०
जीमूतमेघास्तत्संज्ञा	...	...	...	१००
ज्ञात्वा समस्तमध्वानं	..	...	...	५
ज्ञानहीना अपि प्रौढ़	...	...	...	१४८
ज्योतिष्कशिखरं शम्भो	...	...	...	३८
तच्छक्तीद्धस्वबला-	...	...	...	२०९
ततस्तु तैजसं तत्त्वं	...	...	...	१४५
ततोऽपि सकलाचार्णां	...	...	...	१५७
ततोऽप्यङ्गुष्ठमात्रान्तं	...	...	...	१७१
ततो वागादिकर्माच्च	...	...	...	१५१
ततः श्रियः पुरं रुद्रं	...	...	...	१४२
तत्त्वं तत्र तु संक्षुब्धाः	...	...	...	१७३
तत्त्वं सर्वान्तरालस्थं	...	...	...	१४

श्लो०				पृ० सं०
तत्पदं ते समासाद्य	...	...	...	१४८
तत्र भीमैर्लोकपुरुषैः	...	...	...	२६
तत्र वै वामतः श्वेत	...	...	...	५४
तत्र स्थाने महादेव-	...	...	...	८४
तत्र स्थितः स स्वयम्भूः	...	...	...	११२
तत्राध्वैवं निरूप्योऽयं	...	...	...	४
तत्रैव दक्षिणे मेरोः	...	...	...	५४
तत्रैव दक्षिणे हेम-	...	...	...	५४
तत्समस्तं स्वसंवित्तौ	...	...	...	६
तत्सर्वं प्राकृतं प्रोक्तं	...	...	...	२६३
तथापि शिवमग्नानां	...	...	...	१२३
तदथ महादेवाष्टकं	...	...	...	२६६
तदर्थं भेदकान्यन्या-	...	...	...	१२७
तदिह प्रधानमधिकं	...	...	...	२७७
तदीशतत्त्वे लीयन्ते	...	...	...	३२
तदूर्ध्वे नरकाधीशाः	...	...	...	२३
तदूर्ध्वं वीरभद्राख्यो	...	...	...	१७१
तदेवं पुंस्त्वमापन्ने	...	...	...	२०१
तदेव बुद्धितत्त्वं स्यात्	...	...	...	१७७
तद्वक्ष्यते समासात्	...	...	...	२६४
तद्वत्ते शतरुद्राः	...	...	...	१३१
तनुभोगाः पुनरेषां	...	...	...	१६०
तन्मण्डलं वा दृष्ट्वैव	...	...	...	१७०

श्लो०				पृ० सं०
तन्मात्रेशा यदिच्छातः	...	...	...	१५१
तन्मात्रेषु च पञ्च स्युः	...	...	...	२७३
तन्वच्चसमुदायत्वे	...	...	...	१२३
तन्वच्चादौ मा प्रसाङ्क्षी-	...	...	...	१२३
तमोलेशानुविद्धस्य	...	...	...	१२२
तयाधितिष्ठति विभुः	...	...	...	२६२
तस्मान्निरयाद्येकं	...		...	२१४
तस्मिन्सदाशिवो देव-	...	...	...	२३६
तस्याभवन्नव सुताः	...	...	...	७१
तस्याष्टौ तनयाः साकं	...	...	...	७१
तस्योत्सङ्गे परा देवी	...	...	...	२५५
तारतम्याच्च योगस्य	...	...	...	१७०
तारादिशक्तिजुष्टं	...	...	...	२४५
तावतीं गतिमायान्ति	...	...	...	१३६
तावत्संस्कारयोगार्थं	...	...	...	१४८
तावदसंख्यातानां	...	...	...	२३१
तावन्ति रूपाण्यादाय	...	...	...	१६६
तिष्ठन्ति साध्यास्तत्रैव	...	...	...	१११
तिस्रो द्वात्रिंशदेकातः	...	...	...	१७६
ते कालवह्निसन्ताप.	...	...	...	३३
तेजस्त्यावरणं वेद	...	...	...	२३८
ते तेनोदस्तचितः	...	...	...	२३१
तेन कलादिधरान्तं	...	...	...	२२०

श्लो०				पृ० स०
तेन द्वितीयं भुवनं	...	...	...	१६४
तेभ्य ऊर्ध्वं शतान्मेघा.	...	...	...	६३
तेभ्यः परतो भुवनं	...	...	...	१८३
ते मायातत्त्व एवोक्ताः	...	...	...	२०६
ते मेरुगाः सकृच्छम्भुं	...	...	...	४६
ते यान्ति बोधमैशानं	...	...	...	१४०
ते यान्त्यण्डान्तरे रुद्रं	...	...	...	११५
तेषां स्वे पतयो रुद्राः	...	...	...	१२६
तेषु क्रमेण ब्रह्माणः	...	...	...	१३३
तेषूमापतिरेव	...	...	...	१६१
ते सर्वेऽत्र विनिहिताः	...	...	...	१८७
ते हाटकविभोरग्रे	...	...	...	३१
त्रयोदशभिरन्यैश्च	...	...	...	१४२
त्रिगुणं ज्ञानशक्तिः सा	...	...	...	१०६
त्रिनेत्राः पाशनिर्मुक्ताः	...	...	...	१८०
त्रिपञ्चाशच्च लक्षाणि	...	...	...	८०
त्रिशिरःशासने बोधो	...	...	...	६
दक्षिणे दक्षिणे ब्रह्मा	...	...	...	४०
दश तन्मात्रसमूहे	..	...	...	२६६
दशमे वसवो रुद्राः	...	...	...	१०६
दशाष्टादश रुद्राश्च	...	...	...	२४०
दिदृक्षयैव सर्वार्थान्	...	...	...	४
दीक्षाकालेऽधराध्वस्थ.	...	...	...	२२२

श्लो०				पृ० सं०
दीक्षिता अपि ये लुप्त	...	...	...	३०
देवदेवस्य सा शक्तिः	...	...	...	२२५
देवाग्निद्रव्यवृत्त्यंश	...	...	...	३१
देशाध्वनोऽप्यथ	...	...	...	१
द्वादशैकशिवाद्याः स्युः	...	...	...	२७४
द्वितीये तत्परे सिद्ध.	...	...	...	१०५
द्वीपोपद्वीपगाः प्रायो	...	...	...	६६
धरातोऽत्र जलादिस्थ.	...	...	...	१३४
धर्मज्ञानविरागान्	...	...	...	१८३
धर्मानणिमादिगुणान्	...	...	...	२०९
धियि दैवीनामष्टौ	...	...	...	२६६
धियि योन्यष्टकमुक्तं	...	...	...	२८१
ध्यात्वा त्यक्त्वाथ वा प्राण	...	...	...	१४५
ध्यानपूजाजपैर्विष्णोः	...	...	...	११२
न प्ररोहेत्पुनर्नान्यो	...	...	...	२२६
न यज्ञदानतपसा	...	...	...	१३८
नरकेभ्यः पुरा व्यक्त.	...	...	...	२३
नरि वामो भीमोग्रौ	...	...	...	२८१
नह्यकर्ता पुमान्कर्तुः	...	...	...	१९४
नाडीविद्याष्टकं चोर्ध्वं	...	...	...	१९२
नाड्या ब्रह्मबिले लीनः	...	...	...	२५३
नादबिन्द्वादिकं कार्यं	...	...	...	२६३
नादोर्ध्वतस्तु सौषुम्नं	...	...	...	२५२

श्लो०				पृ० सं०
नादः किञ्जल्कसदृशो-	...	...	...	२५२
नादः सुषुम्नाधारस्तु	...	...	...	२५३
नानावर्णाश्रमाचार-	...	...	...	६९
नान्यथा मोक्षमायाति	...	...	...	१३७
नियतौ शंकरदशकं	...	...	...	२६९
निर्बीजदीक्षया मोक्षं	...	...	...	१३९
निर्यन्त्राणि सदा तत्र	...	...	...	७४
निवृत्त्यादिकलावर्ग-	...	...	...	२४६
निवृत्त्यादेः सुसूक्ष्मत्वात्	...	...	...	२४९
नेता कटाहरुद्राणां	...	...	...	१४
पञ्चत्रिंशत्कोटिसंख्या	...	...	...	८७
पञ्चवर्णयुतं गन्ध.	...	...	...	१५०
पञ्चान्तकैकवीरौ च	...	...	...	१८५
पञ्चाशत्कोटयश्चोर्ध्वं	...	...	...	११८
पञ्चाशदूर्ध्वं तत्रैव	...	...	...	१००
पञ्चाशदूर्ध्वं वज्रांको	...	...	...	९४
पञ्चाशदूर्ध्वं वज्रांकात्	...	...	...	९७
परतो लिङ्गाधारैः	...	...	...	११८
परनादो ब्रह्मबिलं	...	...	...	२७०
परमेशनियोगाच्च	...	...	...	१५९
पररूपेण यत्रास्ते	...	...	...	२५२
पशुखगमृगतरुमानुष.	..	...	...	९१
पशुपतिरिन्द्रोपेन्द्र-	...	...	...	१८५

श्लो०				पृ० सं०
पातालाष्टकमेकैकं	...	...	...	२९
पातालोर्ध्वे सहस्राणि	...	...	...	३३
पात्यन्ते मातृभिर्घोर	...	...	...	३३
पाशा आगन्तुकगाणेश	...	...	...	१९८
पाशाः पुरोक्ताः प्रणवाः	...	...	...	२२१
पितृदेवपथावस्यो	...	...	...	८२
पीता शुक्ला पीतनीले	...	...	...	१६७
पुरेषु बहुधा गङ्गा	...	...	...	१४३
पुरं चाशुद्धविद्यायां	...	...	...	२०३
पुंस ऊर्ध्वं तु नियतिः	...	...	...	२०२
पुंसां सितासितान्यत्र	...	...	...	७०
पुंस्तत्त्वे तुष्टिनवकं	...	...	...	१८८
पूर्णस्योर्ध्वादिमध्यान्त	...	...	...	१३
पूर्वपश्चिमतः सव्यो	...	...	...	५३
प्रकाशमण्डलं तस्मात्	...	...	...	१५२
प्रकाशमण्डलादूर्ध्वं	...	...	...	१५२
प्रजापतीनां तत्राधि.	...	...	...	११२
प्रतिकल्पं नामभेदैः	...	...	...	१६४
प्रतिभगमव्यक्ताद्याः	...	...	...	२१२
प्रत्येकमस्य निजनिज-	...	...	...	२४६
प्रत्येकमेषामेकोना	...	...	...	२४
प्रत्येकं भौमतः सूर्य	...	...	...	१०६
प्रभाससुरेशावितिस-	...	...	...	२७८

श्लो०				पृ० सं०
प्राक्तनी पारमेशी सा	...	...	...	१३७
बाह्यदेवेष्वधिष्ठाता	...	...	...	१५२
बिन्दून्ध्वेऽर्धेन्दुरेतस्य	...	...	...	२५०
बिभर्त्यण्डान्यनेकानि	...	...	...	२६०
बुद्धितत्त्वं ततो देव	...	...	...	१५७
बोधमध्यं भवेत्किञ्चित्	...	...	...	६
बोधाग्रं तत्तु चिद्बोधं	...	...	...	६
ब्रह्मणोऽण्डकटाहेन	...	...	...	६०
ब्रह्मणोऽत्र स्थिता मेघाः	...	...	...	१००
ब्रह्माण्डाधश्च रुद्रोर्ध्वं	...	...	...	११६
ब्रह्माण्डाधारकं तच्च	...	...	...	१२०
ब्रह्मा मुनिलोकेशो-	...	...	...	२७७
ब्रह्मैवापररूपेण	...	...	...	१०७
ब्राह्मणाद्याः संकरान्ताः	...	...	...	१५०
भग्नानि महाप्रलये	...	...	...	१८७
भद्रकाल्याः पुरं यत्र	...	...	...	३४
भारते नवखण्डं च	...	...	...	६२
भारते यत्कृतं कर्म	...	...	...	६७
भीमादिगयपर्यन्त	...	...	...	१४६
भुवनं देहधर्माणां	...	...	...	१६७
भुवनं भुवनं निशि पुट	...	...	...	२६६
भुवनैः पञ्चभिर्गर्भी	...	...	...	२३६
भुर्लोकस्तथा त्वार्कात्	...	...	...	६२

श्लो०				पृ० सं०
भृगौ वह्नौ जले ये च	...	...	...	९८
भैरवादिहरीन्द्रन्तं	...	...	...	१४५
भ्रमयत्येव तान्माया	...	...	...	२२६
मग्नस्तन्मूलविस्तार	...	...	...	३६
मथनी दमनी मनोन्म-	...	...	...	२२७
मध्यतो व्यापिनी तस्यां	...	...	...	२५६
मध्ये त्वनाश्रितं तत्र	...	...	...	२५७
मध्ये पुटत्रयं तस्याः	...	...	...	२१५
मध्योर्ध्वाधः समुद्वृत्त	...	...	...	३७
मनोः स्वायंभुवस्यासन्	...	...	...	७१
मन्दरो गन्धमादश्च	...	...	...	४७
मलदिग्धा दीर्घकेश-	...	...	...	७४
महाकालादिका रुद्र-	...	..	...	६८
महादेवाष्टकान्ते तद्	...	...	...	१७२
महान्तराले तत्रान्ये	...	...	...	१११
महापरिवहान्तोऽयम्	...	...	...	१०५
महावहे त्वीशकृताः	...	...	...	१०१
माकोटाण्डद्वितय—	...	...	...	२८०
मातृनन्दा स्वसंख्याताः	...	...	...	३९
मानुषान्तेषु तत्रापि	...	...	...	३३
माभूदण्डत्वमित्याहुः	...	...	...	१२८
मायातत्त्वं विभु किल	...	...	...	२१९
मायातत्त्वाधिपतिः	...	...	...	२२

श्लो०				पृ० सं०
मायापटलैः सूक्ष्मैः	...	...	...	२१३
मायाबिलमिदमुक्तम्	...	...	...	२१०
मायामयशरीरास्ते	...	...	...	२२३
मार्कण्डाद्या ऋषिमुनि–	...	...	...	१११
मुकुटविसरेन्दुविन्दु–	...	...	...	२४५
मुख्यमन्त्रेश्वराणां यत्	...	...	...	२३०
मूर्त्तयः सुशिवा वीरो	...	...	...	१७३
मूर्त्यष्टकोपरिष्टात्तु	...	...	...	१७१
मूर्धशिखावर्मह–	...	...	...	२४४
मृता गच्छन्ति तां भूमिं	...	...	...	१४२
मेधाः स्कन्दोद्भवाश्चान्ये	...	...	...	६४
मेधातिथिर्वपुष्मान्	...	...	...	७५
मेरोरुदक्शृङ्गवान्य–	...	...	...	५३
मेरोर्दक्षिणतो हेम	...	...	...	५४
मेरोः पश्चिमतो गन्ध–	...	...	...	५२
मेरोः पूर्वं माल्यवान्यो	...	...	...	५३
मेरोः षडेते मर्यादा-	...	...	...	५०
यत्किञ्चित्परमाद्वैत-	...	...	...	२००
यद्यपि गुणसाम्यात्मनि	...	...	...	२६८
यस्येच्छातः सत्त्वा-	...	...	...	१८४
यान्ति न ते नरकयुजः	...	...	...	२७
या प्रभोरङ्गगा देवी	...	...	...	२५३
येनोमागुह्यनील-	...	...	...	१८४

श्लो०				पृ० सं०
ये ब्रह्मणादिसर्गे	...	...	...	११७
ये विद्या पौरुषे ये च	...	...	...	८७
योगाष्टकं क्रोधसंज्ञं	...	...	...	२७३
योगाष्टकपदे यत्तु	...	...	...	१६४
योनीरतीत्य गौणे	...	...	...	१८३
योनिविवरेषु नाना	...	...	...	२११
यौ श्वेतशृङ्गिणौ मेरोः	...	...	...	५३
रक्तोदमानससितं	...	...	...	४८
रक्षांसि सिद्धगन्धर्वा-	...	...	...	३९
रुद्रस्य सृष्टिसंहार–	...	...	...	११३
रुद्राः शतं सवीरं	...	...	...	२६४
रुद्राण्डं सलिलं त्वण्डं	...	...	...	१४०
रुद्राणां भुवनानाञ्च	...	...	...	१८१
रुद्रो ग्रन्थौ च मायायां	...	...	...	७
रुन्धनी रोधनी रोद्ध्री	...	...	...	२५०
रूपमुक्तं यतस्तेन	...	...	...	१२६
रूपावरणसंज्ञं तत्-	...	...	...	२३६
रोचनाञ्जनभस्मादि-	...	...	...	१००
लक्षं सहस्रनवतिः	...	...	...	४९
लक्षमात्रः स नवधा	...	...	...	४९
लक्षैकमात्रो लवण-	...	...	...	७३
लघुनिधिपतिविद्याधिप-	...	...	...	२७८
लोकानां भस्मसाद्भाव-	...	...	...	२२

श्लो०				पृ० सं०
लोकानामक्षाणि च	...	...	...	१६२
लोकालोकदिगष्टक.	...	...	...	८१
वराहनन्दनाशोका:	...	...	...	७३
वस्तुपिण्ड इति प्रोक्तं	...	...	...	१२३
वस्त्रापदान्तं स्थाप्वादि	...	...	...	१४६
वागीश्वरी च तत्रस्थं	...	...	...	२२७
वामेशरूपसूक्ष्मं	...	...	...	२७०
विचारितोऽयं कालाध्वा	...	...	...	२
विजयाख्यं पुरं चास्य	...	...	...	१३६
विद्यातत्त्वोर्ध्वमैशं तु	...	...	...	२२८
विद्यामृतां च किंवा	...	...	...	६१
विद्यायां विद्येशा:	...	...	...	२८२
विनापि वस्तुपिण्डाख्य	...	...	...	१२५
विश्वे देवा विश्वकर्मा	...	...	...	३६
वीणा सरस्वती देवी	...	...	...	४०
वैद्युताद्रैवतस्तावान्	...	...	...	६६
व्यक्तेरभिमुखीभूत:	...	...	...	१२२
व्यज्यन्ते तेन सर्गाद्यौ	...	...	...	१५६
शक्ति: सुप्ताहिसदृशी	...	...	...	२५६
शक्त्यावृति: प्रमाणाख्या	...	...	...	२३८
शतरुद्रावधिर्हुं फट्	...	...	...	११६
शर्वरुद्रौ भीमभवौ	...	...	...	११६
शर्वादिकं यस्य सृष्टि:	...	...	...	१६६

श्लो०				पृ० सं०
शिखण्डी श्रीगलो मूर्तिः	...	...	...	२२८
शिवगुणयोगे तस्मिन्	...	...	...	२१०
शिवतत्त्वं ततस्तत्र	...	...	...	२५७
शिवतत्त्वोर्ध्वतः शक्तिः	...	...	...	२६०
शिवशुद्धगुणाधाका-	...	...	...	२३५
शीघ्रो निधीशो विद्येशः	...	...	...	१३१
शुद्धावरणमित्याहुः	...	...	...	२३७
शुश्रूषा शौचसन्तोषा-	...	...	...	१९८
शेषकार्यात्मतैष्टव्या-	...	...	...	१९५
शैवाः केचिदिहानन्ताः	...	...	...	२७५
शोधनमथ तद्धानौ	...	...	...	२७६
श्रीकण्ठः स्फटिकाद्रौ सा	...	...	...	१६९
श्रीकण्ठ एव परया	...	...	...	१६४
श्रीकण्ठाधिष्ठितास्ते च	...	...	...	१३२
श्रीकान्यकायां कश्मीर-	...	...	...	१४९
श्रीमद्दीक्षोत्तरे चैतान्	...	...	...	७
श्रीमन्मतङ्गशास्त्रे च	...	...	...	२७२
श्रीमन्मतङ्गशास्त्रे च	...	...	...	२४७
श्रीशैलहरिश्चन्द्रा-	...	...	...	२७९
श्रीसारशासने पुनः	...	...	...	२१८
षष्ठं च परममनाश्रित-	...	...	...	२७०
षष्ठे गरुत्मानन्यस्मिन्	...	...	...	१०५
सत्पथं तान्परित्यज्य	...	...	...	२२५

श्लो०				पृ० सं०
स देवं भैरवं ध्यायन्	...	...	...	१४
सप्तदशपुरा शान्ता-	...	...	...	२७०
सप्तमजलधेर्बाह्ये	...	...	...	८१
सप्तसागरमानस्तु	...	...	...	८७
सप्तानुध्यायन्त्यपि	...	...	...	२३२
समना करणं तस्य	...	...	...	२६०
समन्ताच्चक्रवाटाधो	...	...	...	५२
स महातेजा वामो-	...	...	...	२८२
सर्वाभयाः खड्गधाराः	...	...	...	२०७
सर्वे देवा निलीना हि	...	...	...	३८
सर्वेषामुत्तरो मेरुः	...	...	...	८४
सर्वेषामेतेषां	...	...	...	२४५
स व्यापिनं प्रेरयति	...	...	...	२६३
सव्योत्तरायतौ तौ तु	...	...	...	५०
सहस्रधा व्यक्तमतः	...	...	...	१३४
सादाख्यं व्यश्नुते तच्च	...	...	...	१३५
साधनभेदात्केवल-	...	...	...	१६१
साध्यो दाता दमनो	...	...	...	२२२
सारस्वतं पुरं तस्मात्	...	...	...	१४३
सिद्धातन्त्रे तु हेमाण्डा	...	...	...	१३२
सिद्धातन्त्रेऽत्र गर्भाब्धेः	...	...	...	८८
सिद्धीर्ददात्यसावेवं	...	...	...	३०
सुशिवावरणे रुद्राः	...	...	...	२४६

श्लो०				पृ० सं०
सुशुद्धावरणादूर्ध्वं	...	...	...	२१८
सुषुम्नोर्ध्वे ब्रह्मबिल	...	...	...	२५५
सूक्ष्मसुतेजःशर्वाः	...	...	...	२४४
सूक्ष्मावरणमाख्यातं	...	...	...	२३६
सूर्याच्चन्द्रोऽथ शीतांशुः	...	...	...	१०६
सृष्ट्यादिपञ्चकृत्यानि	...	...	...	२४०
सेनानीवायुरत्रैव	...	...	...	९३
सोऽव्यक्तमधिष्ठाय	...	...	...	२०९
सौषुम्नं ब्रह्मबिलं	...	...	...	२७१
संभवन्त्यप्यसंस्काराः	...	...	...	६१
संवर्तो ज्योतिरथो	...	...	...	२८१
संविद्द्वारेण तत्सृष्टेः	...	...	...	३
स्थानानां द्विशती भूमिः	...	...	...	२७३
स्थानान्तरेऽपि कर्मास्ति	...	...	...	६१
स्थाने सायुज्यगताः	...	...	...	२१३
स्थूलैर्विशेषैरारब्धाः	...	...	...	११७
स्वच्छन्दं ता निषेवन्ते	...	...	...	१६९
स्वस्वरूपानुसारेण	...	...	...	१३
स्वात्मानमेव जानन्ति	...	...	...	२२३
हेतून्ब्रह्मादिकान् रुन्धे	...	...	...	२५१

इति तन्त्रालोकेऽष्टमाह्निके मूलश्लोकानामनुक्रमणिका समाप्ता ॥

CENTRAL ARCHAEOLOGICAL LIBRARY New Delhi

Col.
N 612/96



Vol. 5

Central Archaeological Library,

NEW DELHI.

9066.

Call No. Sa 2HS/ Abh/ Kau

Author— Shastri, Kaul, Madhu Sudan.

Title— The Tantraloka of Abhinava Gupta Vol. 5

Borrower No. | Date of Issue |

"A book that is shut is but a block"

CENTRAL ARCHAEOLOGICAL LIBRARY

GOVT. OF INDIA
Department of Archaeology
NEW DELHI.

Please help us to keep the book clean and moving.

S. B., 148. N. DELHI.